दित्याचारादर्शः । भरद्वाजः—अपकृष्यचविण्मूत्रंकाष्ठलोष्ठतृणादिना । यत्तुगौतमः—नपर्णलोष्ठाश्मभि
तदशीर्णविपर्यं यज्ञियपर्णविपर्ययंवा । मार्जनंवामहस्तेनवीरणाद्यैरयज्ञियैरितिस्मृत्यंतरात् । गौतमोक्तिरुक्तकाष्ठादि
त्रिः—शुद्ध्यर्थंचत्रिभिःकाष्ठैस्तृणैर्वापिनिघर्षयेत् । आश्वलायनः—विण्मूत्रोत्सर्जनंकुर्याद्धृतशिश्नउदङ्मुखः ।
ाशिश्नंधृत्वोत्तिष्ठेत्सदाद्विजः । देवलः—आशौचान्नोत्सृजेच्छिश्नंप्रस्रावोच्चारयोस्तथा । नैतेनालस्यनियमाउदङ्
नतस्याचमनकल्पोविधतेनतस्योदङ्मुखोदिवारात्रौदक्षिणामुखइत्यादयोनियमाइतिगौतमोक्तेः ॥ इतिश्रीमन्नाराय
कृतेआचाररत्नेमूत्रपुरीषोत्सर्गविधिः ॥ ॥

शौचम् ॥ दक्षः—शौचेयत्नःसदाकार्यःशौचमूलोद्विजःस्मृतः । शौचाचारविहीनस्यसमस्तानिष्फलाःक्रियाः । 
ृदंदद्यान्मृदंतेत्वपएवच । सुनिर्णिक्तेक्षालितेपाणिपादादावितिकल्पतरुः । काष्ठादिप्रोंच्छितइत्यन्ये । गौतमः—
्यसतदद्भिःपूर्वमृदाचेति । अपगमइतिनिमित्तसप्तमी । स्मृत्यर्थसारे—त्रिपर्वपूरमात्रावामृत्तिकाक्षप्रमाणिका

दंनगुदे । अर्धप्रसृतिमात्रमितिदक्षेणगुदेप्रमाणांतरोक्तेरित्या**चारादर्शः** । मृद्ग्रहणंग्रावासक्तमृद्धात्रीतः ।
ङ्मुखोरात्रौदक्षिणामुखःकुर्यादित्युक्तम् । **चंद्रिकायांशौनकः**—लिंगशौचंपुराकार्यंगुदशौचंततःपरम् ।
मृदः । करद्वयेमृद्द्वयंस्यान्मृत्प्रमाणमथोच्यते । आर्द्रामलकमात्राचलिंगशौचेतुमृत्तिका । मूत्रात्तुद्विगुणंशुक्रे
विनाशुक्रोत्सर्गे । पुरीषेतु—पंचापानेमृदःक्षेप्याःकरेवामेदशस्मृताः । हस्तयोःसप्तदातव्याःपुरीषेमृत्प्रमाण
ततःपरम् । ऐकैकंपादयोर्दद्याद्धस्तयोर्लिंगशौचवत् । एकैकमितिमूत्रपरमिति**कृष्णभट्टीये** । उभयपर
मात्रातुप्रथमामृत्तिकास्मृता । द्वितीयाचतृतीयाचतदर्धार्धाःप्रकीर्तिताः । लिंगेप्येवंसमाख्यातात्रिपर्वीपूर्यते
—प्रथमाप्रसृतिर्ज्ञेयाद्वितीयातुतदर्धिका । तृतीयामृत्तिकाज्ञेयात्रिभागकरपूरिणीति । एकालिंगइतिमूत्रशौचे ।
देदशैकस्मिन्नुभयोःसप्तमृत्तिकाइति**याज्ञवल्क्योक्तेः** । **यत्तुविवस्वान्**—तिस्रोमृदोलिंगशौचेग्राह्याःस
स्रःपाण्योर्द्वयोरपीति । सांतराःकिंचिन्न्यूनाइत्यर्थः । **यच्चयमः**—द्वेलिंगेमृत्तिकेदेयेइति । यदपि**शंखः**—
इति । तल्लेपभूयस्त्वेविण्मूत्रोत्सर्गशुद्ध्यर्थम् । मृद्वार्यादेयमर्थवदिति**मनूक्तेः** । गुदेपंचेति**प्रयोगपारिज**
**चारादर्शेतु**—एकालिंगेगुदेतिस्रस्तथैकत्रकरेदशेति**मनूक्तेः**गुदेतिस्रः । गुदेपंचसंख्यातु—अर्धप्रसृतिम
र्धमात्रास्तुचतस्रोन्याःप्रकीर्तिताइति**वृद्धवसिष्ठे**नाल्पपरिमाणोक्तेरविरुद्धा । **यत्तुशातातपः**—आर्द्रा

---

ध्येचतस्र पृष्ठेपडिति । पद्मृष्ठतइतिहारीतीयादितिमैथिला । २ अर्धामलकमात्रास्तुइतिपाठ ।

तिस्मृताः । तथैवाहुतयःसर्वा.शौचार्थेयाश्चमृत्तिकाइति तद्रुक्तशौचपरम् । गुदलिंगयोर्मृत्परिमाणांतरोक्तेरित्यूनः
दातव्याःपुनरेकागुदेतथेति पुनर्दानमर्वपक्षेपुज्ञेयमितिचंद्रिका । हारीतः—दशमध्येपदपृष्ठेमस्तो भाम्यांति
पृष्ठेसव्यहस्तस्य । तिसृभिरितिलेपभूयस्त्वइत्याचारादर्शः । एकान्यत्रित्वयोस्तुल्यवद्विकल्पइत्यन्ये । मिताक्षराग
गृहस्थानांद्विगुणब्रह्मचारिणाम् । त्रिगुणस्याद्वनस्थानांयतीनांस्याच्चतुर्गुणम् । दिवाद्युक्तशौचतदर्धनिशिकीर्तितम्
स्यार्धमध्वनि । द्वैगुण्यादिसख्यामात्रेतदुत्तरस्मृतिष्वभिधानादितिटोडरानंदः । नेदयुक्तम् । सख्याधर्मसंभवात्
ग्राह्येतिस्मृतिकौमुदीशूद्राचारशिरोमणिश्च । आतुरेऽर्धमशक्तपरम् । शक्तस्यपूर्णमेव । दिवाशौचस्यनि
आर्तःकुर्याद्यथाशक्तिस्वस्थःकुर्याद्यथोदितमित्यादिपुराणादितिचंद्रिका । योगीश्वरः—स्त्रीशूद्रादेरशक्तानांबालान
करंशौचंकुर्यान्नसख्यया । वातादिनाशुष्केलेपेगधनिवृत्तावपिलेपक्षयार्थंलेपग्रहः । तन्निवृत्तावपिगधानुवृत्तौतद्वार
मवर्षप्रभृतिमृदाद्यावश्यकम् ।—बालस्यपचमाद्वर्षाद्रक्षार्थशौचमाचरेदितिस्मृतेः । आदित्यपुराणे—स्त्रीशूद्र
पेभिः । एतच्छौचद्विजातीनामर्धंशूद्रेप्रकीर्तितमिति । तद्गृहस्थशद्रान्यपरम् । तस्य—एतच्छौचगृहस्थानामित्येवसिद्ध
हस्थेशूद्रेअर्धेनैतच्छौचमित्यस्यबाधात् । अतएव—यावदुपनीयतेद्विजाःशूद्रास्तथांगनाः । गधलेपक्षयकरशौचमेषांहि
ति । स्त्रीशूद्रपदमकृतोद्वाहपरम् । अनुपनीतसाहचर्यात्पराशरमाधवीये । अतएवार्धसख्यागृहस्थपरा । वस्तुत
न्यविशेषाभावस्यतुल्यत्वाच्छूद्रगृहस्थस्यविकल्पइति सोपिव्यवस्थितः । विवाहाभावेद्वादशवर्षोत्तरंषोडशवर्षोत्तर
नेतिकौमुदी । एतेन स्त्रिया अर्धसख्याचशूद्रस्यचनविधवापरा । अन्यथागधलेपक्षयकरशौचबाधापत्तेरित्याच

। **बृहन्नारदीये**—व्रतस्थानांचसर्वेषांयतिवच्छौचमिष्यते । विधवानांचराजेंद्रएवंशौचंप्रकीर्तितम् । अतोऽर्ध
मः । **यत्तुदक्षः**—एकस्मिन्विंशतिर्हस्तेद्वयोर्देयाश्चतुर्दशेति । तत्पूर्वोक्तशौचेनगंधलेपानपगमेज्ञेयमितिकेचित्
त्रीये । गृहस्थस्याप्यवदानसमाप्त्यादितिमरीच्युक्ताल्पपरिमाणश्रुतेरविरोधइतिचंद्रिका । **अपरार्केदक्षः**
द्धिमभीप्सता । प्रायश्चित्तेनयुज्येतविहितातिक्रमेकृते । इदंसंख्यामानमुभयपरमविशेषादिति**टोडरानंदः** । तद
। अनाशेत्वधिकम् । यावत्तुशौचंमन्येततावच्छौचंविधीयतइतितत्रैव**देवलोक्तेः** । तेनशौचंदृष्टार्थं संख्यानियम
**दर्शः**परास्तः । यावन्नापैत्यमेध्याक्तोगंधोलेपश्चतत्कृतः । तावन्मृद्वारिचादेयंसर्वासुद्रव्यशुद्धिष्वितिमनूक्तिविरो
इदंवाक्यद्वयंदक्षोक्तिविरोधाच्चातुराश्रम्येतरपरं तत्रसंख्यादेरश्रुतेरितिप्रांचः । सगंधलेपानामेवतेषांकर्मस्यादिति
वृत्तस्यतदभावे**स्मायणीयेप्रयोगपारिजातेचवृद्धपराशरः**—उपविष्टस्तुविण्मूत्रंकर्तुंयश्चनविंदति । सकु
दा । दातव्यमुदकंतावन्मृदभावोयदाभवेत् । **बृहस्पतिः**—भुंजानस्यतुविप्रस्यकदाचित्प्रस्रवेद्गुदम् । उच्छि
ते । पूर्वंकृत्वैवशौचंतुततःपश्चादुपस्पृशेत् । ततःकृत्वोपवासंचपंचगव्येनशुद्ध्यति । **पैठीनसिः**—मूत्रोच्चारे
दंनद्यादिविषयमिति**प्रयोगपारिजाते** । असंभवइति**स्मृतिरत्नावल्याम्** । पात्रवतोवा । अपात्रस्यतु
क्त्वाकुर्याच्छौचमनुद्धृतैः । पश्चात्तच्छोधयेत्तीर्थमन्यथाह्यशुचिर्भवेत् । तीर्थंशौचस्थानम् । यस्मिन्स्थानेकृतंश
**ष्यशृंगोक्तेः** । **पराशरः**—धर्मविद्दक्षिणंहस्तमधःशौचेनयोजयेत् । तथाचवामहस्तेननाभेरूर्ध्वंनशोधयेत्
हिकारणादुभयक्रिया । कारणाद्धस्तरोगादेः । उभयक्रियावामेनाप्यूर्ध्वंदक्षिणेनाप्यधइत्यर्थः । **स्मृतिसंग्र**

त्कुर्यान्मूत्रपुरीपयोः । तज्जलंमूत्रसदृशंसुरापानेनतत्समम् । एतदपवादमाहवृद्धपराशरः—अरण्येनिर्जलेरात्रौचौरव्
त्रपुरीपेतुद्रव्यहस्तोनदुष्यति । मृदादिहस्तेधृत्वानदुष्यतीत्यर्थः । स्मृतिदीपिकायामाचारादर्शेचदेवलः—
पादौप्रक्षालयेच्छनैः । उदङ्मुखोवादैवत्येपैतृकेदक्षिणामुखः । इत्येवंमृद्भिराजानुप्रक्षाल्यचरणौपृथक् । हस्तौवामणिव
ः । यत्त्वापस्तंबआह प्रत्यक्पादावसेचनमिति तत्केवलपादक्षालनपरमित्याचारादर्शः । कृष्णभट्टीये—स्वयप्र
किथंचन । शौचाद्दतेवामपादंपश्चाद्दक्षिणमेवच । शौचेप्रथमदक्षिण अन्यत्रवामम् । अत्रदक्षिणंपादमवनेनिजे
ात्पादप्रक्षालनक्रमोज्ञेयः । क्षत्रियवैश्ययोःक्षालयितृसत्वेसव्यंवापूर्वंदक्षिणंवेत्यनियमइतिनारायणवृत्तिः । दक्षि
दितिकात्यायनभाष्याचशौचाद्दतेवामपादमितिनिर्मूलम् ॥ ॥ निवीतंपृष्ठलवितकर्णस्थंवाआहस्तशौचात् । तावत्त
त्वंबंधायोग्यत्वात् । अपवित्रत्वंचशौचाज्ञानात् । उपवीतस्यकर्मांगत्वेनविधानान्निवीतादिनाचमनासंभवाच्च । अत
—कृत्वातुशौचप्रक्षाल्यपादौहस्तौचमृज्जलैः । निवद्धशिखकच्छस्तुद्विजआचमनचरेत् । कृत्वोपवीतंसव्येसेवाग्यतःकार्यसं
त्यत्रव्युत्क्रमोबोध्यः । कच्छवधोक्तेःपूर्वंशौचान्मुक्तकच्छत्वम् । शिखावधश्चदैवान्मुक्तशिखस्यशिखावंधार्थनतुमूत्रपुरीपोत्
र्थम् । आश्वलायनः—कुर्याद्द्वादशगंडूषान्पुरीपोत्सर्जनेबुधः । मूत्रोत्सर्गेतुचतुरोभोजनांतेतुषोडश । भक्ष्यभोज्यावस
रेत् । स्मृतिरत्नावल्याम्—पुरतःसर्वदेवाश्चदक्षिणेपितरस्तथा । ऋषयःपृष्ठतःसर्वेवामेगंडूषमुत्सजेत् । स्मृतिरत्
ट्टीयेच—चतुरष्टद्विपट्द्व्यष्टगंडूपैःशुद्ध्यतेक्रमात् । मूत्रेपुरीपेभुज्यतेरेतःसस्रवणेपिच । स्मृतिसंग्रहे—सकर्दमेतुवर्षा

कायसयुत इतिपाठ ।

योर्मृत्तिकास्तिस्रः पादयोर्द्विगुणंभवेत् । **विष्णुः**—नाभेरधस्तात्कायिकैर्मलैःसुराभिर्वोपहतौमृत्तोयैस्तदंगंप्रक्षाल
मृत्तोयैस्तदंगंप्रक्षाल्यस्नात्वेन्द्रियोपहतस्तूपोष्यपंचगव्येनदशनच्छदोपहतश्चेति । **मनुः**—वसाशुक्रमसृङ्मज्जामू
ास्वेदोद्वादशैतेनृणांमलाः । दूषिकानेत्रमलः ॥ ॥ **अत्रशौचमाहबौधायनः**—आददीतमृदोयश्च
द्भिःकेवलाभिर्विशुद्ध्यति । **मनुस्तु**द्वादशस्वपिमृज्जलाभ्यांशुद्धिमाह—विण्मूत्रोत्सर्गशुद्ध्यर्थंमृद्वार्यादेयमर्थव
द्वादशस्वपीति । **कृत्यरत्नेयमः**—मूत्रादौपादयोस्तिस्रोहस्तयोस्तिस्रएवच । मृदःपंचदशामेध्येहस्तादीनांविशे
परस्यशोणितस्पर्शेरेतोविण्मूत्रजेतथा । चतुर्णामपिवर्णानांद्वात्रिंशन्मृत्तिकाःस्मृताः । **शूलपाणौदेवलस्तु**-
रेतसी । मज्ञानंशोणितंवापिपरस्ययदिसंस्पृशेत् । स्नात्वासंमृज्यलेपादीनाचम्यसशुचिर्भवेत् । तान्येवखा
। मार्जनोत्तरमाचमनंच । **शंखः**—तिस्रस्तुमृत्तिकादेयाःकृत्वाचनखशोधनम् । नखशोधनंनखांतर्गतमलशोध
नात्प्राश्यविण्मूत्रंसुरासंस्पृष्टमेवच । पुनःसंस्कारमर्हतित्रयोवर्णाद्विजातयः । रेतःप्राशनेप्येवम् । **विज्ञानेश्व**
क्षणेअहोरात्रमभोजनाच्छुद्धिरिति । **संवर्तः**—कृत्वामूत्रंपुरीषंवायदानैवोदकंभवेत् । स्नात्वालब्धोदकः
**शौचोक्तेनियमातिक्रमेप्रायश्चित्तंस्मृतिरत्नावल्याम्**—गायत्र्यष्टशतंचैवप्राणायामत्रयंतथा ।
ति ॥ इतिश्रीमन्नारायणभट्टात्मजं०लक्ष्मणभट्टकृताचाररत्नेशौचविधिः ॥

नम् । शौचोत्तरमाचामेत्—एवंशौचंतुनिर्वर्त्यपश्चादाचमनंचरेदितिबृहन्नारदीयात् । पूर्वोक्तवृद्धपराश
नुशुचौदेशेउपविष्टउदङ्मुखः । प्राग्वाब्राह्मेणतीर्थेनद्विजोनित्यमुपस्पृशेत् । उपस्पृशेदाचामेत् । अत्रविज्ञाने

:शूद्राचमनेउपवेशनादिनियमोनेतिकेचित् । युक्तंतुब्राह्मतीर्थस्यैवद्विजेनियमः । उपवेशनादिसर्वसाधारणम् । स्थितस
:—ऐशान्यभिमुखोभूत्वोपस्पृशेत्तुयथाविधि । हेमाद्रौदेवलः—उदङ्मुखोवादैवत्येपैतृकेदक्षिणामुखः । स्मृति
ङ्मुखत्वेनकृतमाचमनंयदि । प्रायश्चित्ततदाकुर्यात्स्नानमाचमनक्रमात् ॥ ॥ तीर्थान्याहयाज्ञवल्क्यः—कनिष्ठा
य । प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् । वसिष्ठः—अंगुल्यग्रेपुमानुपंपाणिमध्येआग्नेयतीर्थमार्षकनिष्ठिकामूलइतित
त्तेपंचतीर्थानीतिप्रचेतःस्मृतेः । दक्षिणेत्युपलक्षणम् । अजलितर्पणेदक्षिणहस्ताभावेचवामहस्तेपितदपेक्षणात् ।
ाम् । ब्राह्मेणतीर्थेनद्विजोनित्यमुपस्पृशेदितियाज्ञवल्क्येनद्विजपदोक्तेः । हेमाद्रौचंद्रिकायामप्येवम्—कायंकनि
वतिवर्धमानपरिभाषायांशंखोक्तेश्च । शूद्रस्यतर्पणादौपित्रादितीर्थाक्षेपाच्च । अतएव—ब्राह्मेणविप्रस्तीर्थेनने
कर्तृमात्रोपलक्षणमित्याचारादर्शः । अत्रविकल्पिततीर्थस्वीकरणमाचमनाद्यप्रयोगेवेद्यनप्रतिप्रयोगमितिचंद्रिका ।
त्रिःप्राशनेप्येकमेवतीर्थम् । ब्राह्मेणनित्यमुपस्पृशेदितियाज्ञवल्क्योक्तेर्ब्राह्ममुल्यम् । यत्तुहेमाद्रौशंखः—प्रा
जलंशुचिरिति । यच्चमनुः—कायत्रैदशिकाभ्यांवानपित्र्येणकदाचनेति । तद्ब्राह्मतीर्थस्यक्षताद्यवरोधेज्ञेयमितिपृथ्वीचं
ंकुशान्कृत्वासमाचामतियोद्विजः । उपस्पृष्टंभवेत्तेनरुधिरेणमलेनच । वामहस्तेकेवले । उभयत्रस्थितैर्दर्भैःसमाचामति
स्यभोक्तायज्ञफलंलभेदितिगोभिलोक्तेः । श्राद्धहेमाद्रौगौतमः—वामहस्तेस्थितेदर्भेदक्षिणेनपिबेन्नतु । वक्षा
वेत् । चंद्रोदयेयमः—तावन्नोपस्पृशेद्विद्वान्यावद्वामेननस्पृशेत् । दक्षिणकरमितिशेषइतिपृथ्वीचंद्रः । जलमितिचं
लमित्याचारादर्शः । आचारप्रदीपे—दक्षिणेसस्थिततोयतर्जन्यासव्यपाणिना । तत्तोयंस्पृशतेयस्तुसोम

दयेप्येवम् । **आश्वलायनः**—ग्रंथीकृतपवित्रेणनभुंजीयान्नचाचमेत् । ग्रंथिर्ब्रह्मग्रंथिः । नब्रह्मग्रंथिनाचा

ास्मृतिसारात् । **कौशिकः**—अपवित्रकरःकश्चिद्ब्राह्मणोयद्युपस्पृशेत् । अकृतंतस्यतत्सर्वंभवत्याचमनत

स्तुप्रकृतिस्थाभिर्हीनाभिःफेनबुद्बुदैः । हृत्कंठतालुगाभिस्तुयथासंख्यंद्विजातयः । शुद्ध्येरन्स्त्रीचशूद्रश्चसकृत्स्पृ

ाभिः । अंततस्तालुनेति**विज्ञानेश्वरः** । तत्समीपवर्तिनादंतेनेति**हेमाद्रिः** । ओष्ठप्रांतेनेत्या**चारादर्शः**

स्युशनःस्मरणादेकैकपादहान्याकंठतालुतदंतर्गतत्वमिति**हेमाद्रिः** । द्विजपदादनुपनीतानामपितेषामुपनीत

: । तन्न । नह्यस्मिन्युज्यतेकर्मकिंचिदामौंजिबंधनात् । शूद्रेणहिसमस्तावद्यावद्वेदेनयुज्यतइति**मनूक्तेः** । :

दाचमनमितियुक्तम् । **बौधायन**स्तुशूद्राणामार्कछिष्टि(?)तानामार्यवदाचमनंवैश्यवच्छौचमिति । **हारीत**

ब्जर्येत् । प्रकृतिस्थाभिरित्युक्तेयत्स्वभावतएवगंधादिमत्तन्ननिपिद्धम् । **माधव्यांप्रचेताः**—अनुष्णाभिरफेना

**बौधायनः**—शब्दमकुर्वन्निरपोहृदयंगमाःपिबेदितिटो**डरानंदेगोभिलः** । हृदयस्पृशएवापउपस्पृशे

**ः**—प्रक्षाल्यपादौहस्तौचत्रिःपिबेदंबुवीक्षितम् । **यमः**—रात्राववीक्षितेनापिशुद्धिरुक्तामनीषिभिः । उद

् । **मार्कंडेयगारुडयोः**—अंतर्जानुतथाचामेत्रिश्चतुर्वापिबेदपः । अत्रचतुष्ट्वस्यत्रित्वेनैच्छिकोविकल्पः

पैतृकर्मविपयत्वेनव्यवस्थेत्यन्ये । त्रित्वेनचतुष्ट्याभावेइति**मदनपारिजातः** । **मैथिलाश्च**—त्रिरित्यवो

। यत्रमंत्रवदाचमनंअग्निश्चमेत्यादि तेनसहचतुष्ट्वमन्यत्रत्रिरितिहरदत्तः । **हेमाद्रौदेवलः**—अथापःप्र

प्रथमाद्ब्राह्मात् । सममव्यवधानेनेत्यर्थइत्युक्तं । तत्रैव **भरद्वाजः**—आयतंपूर्वतःकृत्वागोकर्णाकृतिवत्कर

पाणिनाद्विजः । मुक्तांगुष्ठकनिष्ठाभ्यांशेषेणाचमनचरेत् । मापमज्जनमात्रास्तुसंगृह्यत्रिःपिबेदपः । मापमज्जनमात्रपा
यादेस्तुन्यूनम् । **स्मृत्यर्थसारे**—पीतावशिष्टांबुपानेवामहस्तेनपानेपराकार्धमिति । **भविष्ये**—दक्षिणंतुकरंकृत्वा
पिबेद्दक्षिणेनांबुद्विरास्यपरिमार्जयेत् । पुनर्ग्रहणात्पूर्वंगोकर्णाकृतिनाहस्तेनोदकंगृहीत्वांगुष्ठकनिष्ठिकेत्रहि·कृत्यपुनर्गो
:। **बह्वृचपरिशिष्टे**—पाणिपादमुखप्रक्षाल्यशुचौदेशेभूमिष्ठपादःकनिष्ठांगुष्ठौविश्लिष्टौवितत्यतिस्रोंतरांगुलीःसहतो
ध्यमांगुलिभि·पाणिप्रक्षाल्यसव्यपाणिपादौशिरश्चाभ्युक्ष्येति । **आचारादर्शे भविष्ये**—समाचरणंकृत्वात
लिकरकृत्वाएकाग्रःसुमनाद्विजः । आचामेदितिशेषः । **याज्ञवल्क्यः**—त्रिःप्राश्यापोद्विरुन्मृज्यखान्यद्भिःस
ाह्यम् । अतरापाणिमाप्लाव्यवारिणेतिशिवधर्मोत्तरात् । **शौनकः**—ताम्रपात्रस्थितैर्वापितथातोयाशयस्थितैः
खानिसमालभेत् । तदभावेतुकुर्वीतपात्रधारोदकेनच । खानि शीर्षण्यानि । खानिचोपस्पृशेच्छीर्षण्यानीतिगौतम
ानिमूर्धानचनृपालभेदितिविष्णुपुराणाच्चेतिहेमाद्रिः । नाभेरूर्ध्वानीतिमिताक्षरायाम् । **चंद्रोदये**हा
ायःखानिसमुपस्पृशेत् । वृथैवाचमनंतस्यप्रायश्चित्तीयतेहि·म । **दक्षः**—संमृज्यांगुष्ठमूलेनद्विरुन्मृज्यात्ततोमुखम्
तदुपस्पृशेत् । अगुष्ठेनप्रदेशिन्याघ्राणंचसमुपस्पृशेत् । अंगुष्ठानामिकाभ्यांतुचक्षुःश्रोत्रेततःपरम् । अंगुष्ठमध्यमाभ्यां
ंश्रोत्रे । कनिष्ठांगुष्ठाभ्यांनाभिंहृदयंतुतलेनवै । सर्वाभिश्चशिरःपश्चाद्बाहूचाग्रेणसंस्पृशेत् । अंगुलिभिस्तिसृभिर्मध्यम
तिसृभिःसमुपस्पृशेदितिचंद्रिकायांयोगयाज्ञवल्क्योक्तेः । पाठादेवक्रमेसिद्धेपश्चादितिवचनबाह्वंनंतरगिरःस्प
र्न्यगुष्ठयोगेनस्पृशेन्नासापुटद्वयम् । अगुष्ठस्यानामिकयायोगेनश्रवणेस्पृशेत् । मध्यमागुष्ठयोगेनस्पृशेन्नेत्रद्वयततः ।

द्वयंततः । नाभिंचहृदयंतद्वत्स्पृशेत्पाणितलेनतु । संस्पृशेच्चतथाशीर्षमयमाचमनेविधिः । **चंद्रोदयेपैठीनां**
र्णिस्पृशेदिति । **आश्वलायनः**—पाणिनापोऽश्मिमंत्रेणअवमृज्याथसंस्पृशेत् । विप्रस्यनेतराणांतुतन्मुख
न्नामेसोमायवायवे । नसोर्दिग्भ्यःश्रवणयोर्बाह्वोरिंद्रायसंस्पृशेत् । पृथिव्यैपादयोर्जान्वोरंतरिक्षायगुह्यके । दिवे
शिवायेतिशिरस्यंतेहस्तप्रक्षालयेत्ततः । अंगुष्ठतर्जन्यग्राभ्यांनेत्रयोराचमंस्पृशेत् । अंगुष्ठमध्यमाभ्यांचनासाश्रवणयं
ष्ठाभ्यांचबाहुके । सांगुष्ठैरखिलैरेवस्थानेष्वन्येषुसंस्पृशेत् । **व्याघ्रपादः**—केशवादित्रिभिःपीत्वाचतुर्थेनमृजे
न्मृजेत्क्रमात् । तौसप्तमेनावमृजेदेकवारंतुमंत्रवित् । अष्टमेनतुमंत्रेणत्वभिमंत्र्यजलंशुचि । वामंसंप्रोक्षयेत्पाणिम
न्नाममेकादशेनवै । मूर्धानंद्वादशेनाथस्पृशेदूर्ध्वोष्ठपृष्ठकम् । संकर्षणायनमइत्यनेनांगुलिमूर्धनि । अंगुष्ठतर्जन्यग्रा
ासुदेवंप्रद्युम्नाभ्यासुभेस्पृशेत् । अंगुष्ठानामिकाभ्यांचसंश्लिष्टाभ्यांजलैःसह । अनिरुद्धायनमइतिसंस्पृशेद्दक्षिणेक्षण
शेद्दृशम् । तथांगुष्ठकनिष्ठाभ्यांसंश्लिष्टाभ्यांजलैःसह । अधोक्षजनृसिंहाभ्यांश्रोत्रेद्वेसंस्पृशेत्क्रमात् । नाभिमच्युतमं
र्दनमंत्रेणतलेनहृदयंस्पृशेत् । उपेंद्रायेतिमूर्धानंस्पृशेत्सजलपाणिना । सर्वांगुल्यग्रभागैस्तुसमाश्लिष्टैर्जलैःसह
णोत्तरौ । **प्रयोगपारिजातेभरद्वाजः**—देव्याःपादैस्त्रिभिःपीत्वाअर्व्लिंगैर्नवधास्पृशेत् । पुनर्व्याहृतिगा
**र्थसारे**—तदोंकारेणाचमनंयद्वाव्याहृतिभिर्भवेत् । सावित्र्याचापिकर्तव्यंयद्वाकार्यममंत्रकम् । **तैत्तिरं**
ासकृदुपस्पृश्यशिरश्चक्षुषीनासिकेश्रोत्रेहृदयमालभतइति तदेतद्ब्रह्मयज्ञप्रकरणपाठात्तदंगमेवेति नपुरुषार्था
**ुमाद्बौधायनः**—त्रिःपरिमृजेद्द्विरित्येकइति । तत्रैव**कण्वः**—अथर्ववेदेतिहासपुराणानिध्यायन्ब्रा

न्मृज्यादिति । **हेमाद्रौदक्षः**—नाग्रांगुल्यानपृष्ठैर्वापरिमृज्यात्कथंचन । **आपस्तंबः**—दक्षिणेनपाणिनास
युपस्पृशेत् । चक्षुषीनासिकांश्रोत्रेचेत्यथापउपस्पृशेदिति*व्यासः । अक्षिणीनासिकेकर्णावोष्ठौचतदनंतरम् । 
संस्पृशेत् । **बौधायनः**—खान्यद्भिःसंस्पृश्यपादौनाभिशिरःसव्यंपाणिमंततःप्रोक्षेदिति । **पैठीनसिः**—पादौप्रोक्ष
दिति । अत्रदेशाचारतोव्यवस्थेतिपृथ्वीचंद्रः । चंद्रिकायांतुयथाशाखंव्यवस्थेत्युक्तम् । **शूद्राधिकारेगौतमः**—
वैकइति । **ब्राह्मे**—स्त्रीशूद्रयोरनित्यांभःक्षालनाचकरौष्ठयोः । आचमनक्रियेतिशेपइतिपृथ्वीचंद्रः ॥ ॥ अ
यमः—उत्तीर्योदकमाचामेदवतीर्यतथैवच । **ब्रह्मांडे**—निष्ठीवितेतथाभ्यंगेभुक्त्वाचपरिधायच । उच्छिष्टा
ो । उच्छिष्टस्यचसंभाषादशुच्यप्रयतस्यच । संदेहेषुचसर्वेषुशिखांमुक्त्वातथैवच । विनायज्ञोपवीतेननित्यंचससुप
यदंतासक्तंतथैवच । **देवलः**—भोजनेदंतलग्नानिनिर्हृत्याचमनंचरेत् । **हारीतः**—स्त्रीशूद्रोच्छिष्टाभिभाषणेमूत्र
ांतुमाचामेदिति । जपादौस्त्रीशूद्रभाषणेइत्युक्तंमाधवीयेस्मृत्यर्थसारेचप्रजापतिः—उपक्रमेविशिष्टस्यकर्म
पितृकर्माणिसकृदाचम्यशुद्ध्यति । **चंद्रिकायांहारीतः**—सुषुप्सुराचामेदिति । **आपस्तंबः**—स्वप्नेक्षवथौ
स्यवसानामभ्रेगेवांब्राह्मणस्यस्त्रियाश्चालंभेनीवीपरिधायउपस्पृशेदिति । सिघाणिकानासामलः । केशस्यभूमिगतशिरो
ातः । च्युतकेशनखस्पर्शेइतिस्मृत्यर्थसारे । अग्न्यादिस्पर्शेआचमनंनिमित्तविनास्पर्शेइतिपृथ्वीचंद्रः । ब्राह्मण
त्प्रायश्चित्तत्वेनविहितेइतिमदनरत्ने । ब्राह्मणस्योच्छिष्टस्येतिप्रयोगपारिजातः । नीवीअधोवासोग्रंथिरिति

*श्रोत्रेचोष्ठौचेतिपाठः ।

ो—देवार्चनादिकार्याणितथागुर्वभिवादनम् । कुर्वीतसम्यगाचम्यतद्वद्देवभुजिक्रियाम् । **बृहस्पतिस्मृतौ**व
ात्मालंभेक्षणे तथा । अधोवायुसमुत्सर्गेआक्रंदेक्रोधसंभवे । मार्जारमूषिकास्पर्शेप्रहासेनृतभाषणे । निमित्तेष्वेषुसं
विहितेहृदयस्पर्शइति**कल्पतरुः** । आत्मस्तुताविति**वर्धमानः** । स्पृशेदितिस्पर्शमात्रमिति**स्मृतिरत्नावलि**
मार्जारकर्तृकेस्पर्शेआचमनंस्वयंकृतेस्नानमित्या**चारचंद्रोदयः** । वनमार्जारस्पर्शेस्नानम् । अभोज्यसूतिका
स्यशुद्ध्यतिस्नानादुदक्याग्रामसूकराविति वचनादिति**शूलपाणिः** । केचित्तुमार्जारस्पर्शःपुच्छान्यदेशपरः ।
। पुच्छेविडालकंस्पृष्ट्वास्नात्वाविप्रोविशुद्ध्यति । भोजनेकर्मकालेचविधिरेपउदाहृतइतितत्रैवबुद्धिपूर्वेस्नान
वदर्वींचमारुतश्चसदाशुचिरितिमनूक्तेरित्याहुः । **याज्ञवल्क्यः**—रौद्रपित्र्यासुरान्मंत्रांस्तथाचैवाभिवार
स्पृष्ट्वान्यदाचरेत् । अपःस्पृष्ट्वान्यदाचरेदित्युक्तेर्यत्ररौद्रादिपाठोत्तरंकर्मनोक्तंतत्रनोदकस्पर्शः । **संग्रहे**—श्रा
योः । विकिरेपिंडदानेचकुर्यादाचमनंकृती । तत्रप्रथममेवद्विःशेपाणितुसकृत्सकृत् । **चंद्रिकायांकौर्मे**
थाविधम् । आचामेदश्रुपातेचलोहितस्यतथैवच । **शातातपः**—आचामेच्चर्वणेनित्यंमुक्त्वातांबूलच
सोविपरिधायच । चर्वणेआदावंतेच । अनाचम्यभक्षणेऽष्टशतजपोभोजनेतूपवासइति**स्मृत्यर्थसारात्** ।
आचामेत्प्रयतोपिसन् । **मनुः**—वेदमध्येष्यमाणश्चाप्यन्नमश्नंश्चसर्वदा । आचामेदितिसंबंधः । **विष्**
ामेच्चंडालम्लेच्छसंभाषेचेति । **पाराशरे**—श्वपाकंवापिचंडालंविप्रःसंभाषतेयदि । द्विजसंभाषणंकुर्यात्सावि
त्रिरात्रेणविशुद्ध्यपि । द्विजोनूचानइति**माधवः** । **चंद्रिकायांपाद्मे**—चंडालादीन्जपेहामेदृष्ट्वाच

रे—अंत्यसभापणेकर्मकुवन्नाचामेदित्युक्तंतच्चिल्यम् ।—तूष्णीमासीतचजपंश्चंडालपतितादिकान् । दृष्ट्वातान्वायुं
चंद्रोदयेवर्धमानपरिभाषायां योगयाज्ञवल्क्योक्तेः ।—चंडालपतितौदृष्ट्वानरःपश्येतभास्करम् ।
नाचरेदितिचंद्रिकायांव्यासोक्तेश्च । माधवीये—चंडालैकपथगत्वागायत्रीस्मरणाच्छुचिः । यत्तु
रतःपरिवर्जयेत् । गोवालव्यजनादर्वाक्सवासाजलमाविशेदिति । तत्सकटपरम् । अतएवबृहस्पतिः—
। चंडालसूतिकोदक्यापतितानामधःक्रमात् । अंगिराः—श्वादीन्स्पृष्ट्वापिवाचामेत्कर्णवादक्षिणंस्पृशेत् ।
र्वकरौमुक्त्वाशुनायद्युपहन्यते । तत्रस्नानमधस्ताच्चेत्प्रक्षाल्याचम्यशुद्ध्यतीतितेनैवोक्तेः । चंद्रिकायांशा
व्यालोपजीविनौ । निर्णेजकःसौनिकश्चनटःशैलूषकस्तथा । मुखेभगस्तथाश्वाचवनिताःसर्ववर्णगाः । चक्रीध्व
एतैर्यदंगस्पृष्टस्याच्छिरोवर्जद्विजातिषु । तोयेनक्षालनंकृत्वाआचांतःप्रयतोमतः । रजकोवस्त्रादिरागकर्ता । अ
कंवैणधीवरनटमेवच । एतान्स्पृष्ट्वानरोमोहादाचामेत्प्रयतोपिसन् । इदंशिरोहीनांगस्पर्शे । शिरःस्पर्शेस्नानंवक्ष
वितेचैवदतोच्छिष्टेतथानृते । पतितानांचसभाषेदक्षिणंश्रवणस्पृशेत् । आदित्यावसवोरुद्रावायुरग्निश्चधर्मराट्
विदा । विप्रोक्तेःक्षत्रियादीनांदक्षिणकर्णस्पर्शोन । विप्रपदमाचमनकर्तृमात्रोपलक्षणमित्याचारचंद्रोदयः
ात् । इदंचाचमनासंभवे । तथाचहरनाथीयेमार्कंडेये—कुर्यादाचमनस्पर्शगोपृष्ठस्यार्कदर्शनम् । कु

तिपाठ ।

च । यथाविभवतोह्येतत्पूर्वाभावेपरंपरम् । **विज्ञानेश्वरादावप्येवम्** । **टोडरानंदेपराशरः**—गंगाच
ः । उभयोःस्पर्शनेचैवतत्क्षणादेवशुद्ध्यतीति । **बौधायनः**—नीवीविस्रंस्यपरिधायापउपस्पृशेदार्द्रंतृणगोम
नथद्विराचमननिमित्तानि । **याज्ञवल्क्यः**—स्नात्वापीत्वाक्षुतेसुप्तेभुक्त्वारथ्योपसर्पणे । आचांत
वस्त्रपरिधानेसकृद्द्विराचमनयोर्विकल्पइतिकेचित् । पूर्ववासःपरित्यज्यान्यवासःपरिधानेद्विराचमनम् । तस्यैव
**टोडरानंदः** । कर्माधिकारार्थद्विरन्यत्रसकृदित्यन्ये । **कौर्मे**—रेतोमूत्रपुरीषाणामुत्सर्गेऽशुचिभाषणे । संध
तः । मूत्रपुरीषयोर्द्विराचमनंकर्माधिकारार्थं । **हारीतेन**तत्रसकृदाचमनविधेर्व्यवस्थासंभवेऽष्टदोषदुष्टविकल्प
नकालेचसंध्ययोरुभयोरपि । आचांतःपुनराचामेज्जपहोमार्चनेषुच । उभयोरित्युपलक्षणम् । संध्यात्रयांवुप
र्थसारात् । संध्यात्रयेंऽबुपानेचेत्यर्थः । **सायणीयेनंदसूरिः**—भूम्युपवीतविन्यासेसस्नेहौषधभक्षणे । प
त् । **बौधायनः**—हविर्भक्षणकालेचतद्द्विराचमनंस्मृतम् । **कौर्मे**—प्रक्षाल्यपाणिपादौचभुंजानोद्विरुपस्पृ
ागमेतथा । चत्वरंवाश्मशानंवासमागम्यद्विजोत्तमः । **स्मृत्यर्थसारे**—रोदनेपीत्वावलीढेभुक्त्वाचाम्यं
ंपाणिपादक्षालनंसकृत् । दृष्टोपकारस्यैकत्वात् । आस्यस्पर्शादित्वदृष्टभेदादावर्तते । तत्रत्रिराचम्यांगान्युप
ाक्षायणयज्ञेदर्शपूर्णमासावृत्तिवदित्या**चारादर्शः** ॥ ॥ **अथाचमनापवादःकालतः** । **हेमाद्रौ**
रात्रौमध्यमयामयोः । स्नानचैवनकर्तव्यंतथैवाचमनक्रिया । तत्रैव**विश्वामित्रः**—महानिशातुविज्ञेयाम

---

5 । २ त्वाभ्यग्नारभेइतिपाठ ।

तत्रैवषट्त्रिंशन्मते—मूत्रोच्चारेमहारात्रौकुर्यान्नाचमनंतुयः । प्रायश्चित्तीयतेविप्रःप्राजा
काम्यमाचमनंतथा । तत्रैवषट्त्रिंशन्मते—महानिशाद्वेघटिकेरात्रौमध्यमयामयोः । द्वितीयस्यांत्यातृतीयस्याद्यैत्य
ानिशाद्वेधा । तत्राद्यामाहमार्कंडेयः—महानिशाद्वेघटिकेरात्रौमध्यमयामयोः नाचामेद्भोजनेवृत्तेशुद्ध्यर्थंक्रमुकादिषु । अ
न्त्रोक्ता । द्रव्यतःस्मृत्यर्थसारे—अस्निग्धऔषधेजग्धेस्निग्धेवुद्धेसलेपने । नाचामेद्भोजनेवृत्तेशुद्ध्यर्थंक्रमुकादिषु । तथात्वक्तृणकाष्ठेपुनाचामेदाममथ
ुगंधिषु । तांबूलेक्रमुकेहोमेभुक्तस्नेहानुलेपने । इक्षुदंडेतिलेमूलपत्रपुष्पफलेषुच । तथात्वक्तृणकाष्ठेपुनाचामेदाम
णाहुतिषुचाप्सुच । आस्यहोमेषुसर्वेषुनोच्छिष्टोभवतिद्विजः । क्रमुकादिष्वित्यत्रादिशब्दात्तांबूलादीनि । पुनरग्रेतां
चमननिषेधः । अतएवशुद्ध्यर्थमित्युक्तम् । प्राणाहुतिष्वितितासांमंत्रसाध्यत्वादुच्छिष्टस्यचमंत्रपाठासंभवादाचमने
ासप्तमीयम् । तेनभोजनेअमृतोपस्तरणमसीत्येतदुत्तरंनाचमनम् । अतएवाप्स्वितिप्राणाहुतिसाहचर्यादमृतापिधानम
च्छिष्टस्यमंत्रपाठासंभवात् । तेनतस्मिन्नप्पानेकर्तव्येनोच्छिष्टत्वमित्युक्तंश्राद्धहेमाद्रौ । नचैवंपुरीपाद्युत्सर्गोत्तरमा
ाद्ध्यर्थमाचमनांतरापत्तिः । आरभणीयान्यायेनोपपत्तेः । यथादर्शपूर्णमासांगारभणीयातिदेशादारभणीयायांप्राप्ता
ातिदेशासंभवाच्चनतथेहापि । नचैवमाचमनेसकृज्जलपानोत्तरमाचमनापत्तिः । पुनर्जलपानस्यगायत्र्यादिमंत्रसाध्यत्वा
ायुक्तम् । अनवस्थापत्तेर्दत्तोत्तरत्वात् । हेमाद्रावेवसममव्यवधानेनेत्युक्तेश्च । कृष्णभट्टीये—अनाचांतःपिबेद्य
ा गायत्र्यष्टशतंजप्त्वाप्राणायामेनशुद्ध्यति ॥ ॥ आचमनापवादआचारसारे—अपोजग्ध्वौषधंजग्ध्वाकृत्वात
ानिसर्वाणिनाचमेतविचक्षणः । अपोजग्ध्वेत्यमृतापिधानमसीतिमंत्रैः । पीत्वायोध्येष्यमाणश्चआचामेत्प्रयतोपिसन्निति

ुसविष्वितिपाठ । २ पीतात्परमितिपाठ ।

अप्सूच्छिष्टतानिषेधात्पीत्वापइतिनैमित्तिकमाचमनमित्या**चारादर्शः** । **विश्वादर्शेआपस्तंबः**—संध्यार्थे
द्राहृतेननाचामेज्जपादिहवनेषुच । **संवर्तः**—शूद्राशुच्येकहस्तैश्चदत्ताभिर्नकदाचन । शूद्राहृतजलनिषेधःसर्वक
:प्रक्षालनशेषेणनाचमनशेषेणनाड्युदकशेषेणकर्माणिकुर्यात् । यदिकुर्याद्भूमौजलंस्त्रावयित्वातत्रांबुपात्रंस्थापयित्वा
—नवर्षधारयाचामेन्नप्रदरोदकेनाकारणादिति । प्रदरःस्वयंभिन्नोभूभागः । **वसिष्ठः**—प्रदरादपिगोतृप्तेराचामेत
सेशिष्टैराचमनक्रियेति**माधवीये**कलिवर्ज्येषुपाठात् । **स्मृतिसारे**—एलालवंगकर्पूरगंधाद्यैर्वासितैर्जलैः । न
शेषितै । **चंद्रोदयेसंग्रहे**—पात्रावशिष्टंयच्छौचेपाणिपादावनेजने । भूमौतदबुनिःस्राव्यशेषेणाचमनंचरेत्
प्येवम् । **देवजानीये**—शौचशेषपादशेषंपीतशेषंतथैवच । अपेयंतद्विजानीयात्पर्युक्षणकृतिंविना । **स्मृत्य**
वंधधौतोपवीतकम् । विनाचांतोऽशुचिर्नित्यंबद्धेकंठेशिरस्यपि । **प्रयोगपारिजातेभृगुः**—आच्छन्नदधि
अकृत्वापादशौचंचतिष्ठन्मुक्तशिखोपिवा । विनायज्ञोपवीतेनआचांतोप्यशुचिर्भवेत् । तिष्ठन्नितिजलस्थेतरपरम्
चेतामियात् । अधस्ताच्छतकृत्वोपिसमाचांतोनशुद्ध्यतीति**विष्णूक्तेः** । अधस्ताज्जान्वोः । **चंद्रिकायां**
धचांडालदर्शने । आचामेदितिशेषः । तत्रैव**प्रचेताः**—नासमपादआचामेदिति । **स्मृत्यर्थसारे**—उपवि
तथा—सोपानत्कोधृतोष्णीषःपर्यंकासनयानगः । दुर्देशेप्रपदश्चैवनाचामन्शुद्धिमाप्नुयात् । आचांतःकर्मशुद्ध
**गदेवाह्निकेयमः**—मधुपर्केभोजनांतेसंध्यादौनित्यकर्मणि । आसनस्थोपिचाचामेदन्यत्रकुक्कुटासनः । स्
येंचान्यथाकृत्वाचामेत् सम्यग्धृत्वापुनराचामेत् ॥ ॥ यज्ञोपवीतेनष्टेअन्यत्सूत्रंवस्त्रंचोपवीयाचामेत् । ह

थलेचैवार्द्रवाससा । तर्पणाचमनंजप्यमार्जनादिकमाचरेत् । **पैठीनसिः**—अंतरेकंवहिरेकंकृत्वापादमाचमेदिति
कठंचमुक्तकच्छशिखोपिवा । अकृत्वापादयोःशौचमाचांतोप्यशुचिर्भवेत् । **गौतमः**—नमुख्याविप्रुषउच्छिष्टंकुर्वंति
ास्पर्शे**आपस्तंबः**—यआस्याद्विंदवःपतंतउपलभ्यतेतेष्वाचामेत् । **गौतमः**—मंत्रब्राह्मणमुच्चारयतोविंदवःशरीर
ते । **मनुः**—स्पृशतिविंदवःपादौयस्याचामयतःपरान् । तेपार्थिवैःसमाज्ञेयानतैरप्रयतोभवेत् । अत्रपादग्रहणाज्जं
र्थिः । तत्र । प्रयांत्याचमतोयाश्चशरीरेविप्रुषोनृणाम् । उच्छिष्टदोषोनास्त्यत्रभूमितुल्यास्तुतेस्मृताइति**माधवी**
( । अतःपादावितिप्रायिकम् । तेनांगांतरस्पर्शेपिनदोषइति**सर्वज्ञनारायणः** । **माधवीयेप्येवं** । अ
च्छिष्टोभवतियावन्नहस्तेनोपस्पृशतीति । मुखगतैरित्यर्थः । **याज्ञवल्क्यः**—मुखजाविप्रुषोमेध्यास्तथाचमनविं
तवद्दंतलग्नेपुरसवर्जमन्यत्रजिह्वाभिमर्शनादिति । **गौतमस्तु**प्राक्च्युतेरेकेइत्याह । च्युतेतु**शंखः**—च्युतेष्वास्रावविद्वि
मुखोदकमास्रावः । **शातातपः**—दंतलग्नेमूलफलेभुक्तस्नेहेतथैवच । तांबूलेचेक्षुदंडेचनोच्छिष्टोभवतिद्विजः । स
ात्रस्थकरकस्थचयत्पयः । आचम्यस्वयमादायशुद्धोभवतिनान्यथा । स्वयंगृहीत्वाचाचामेन्नपरःप्रयच्छेदित्यर्थः । अ
यतिपात्राणिमृद्वेणुदार्वलाबुमयानिचेति**याज्ञवल्क्योक्तेः** । अतैजसानिपात्राणितस्यस्युर्निर्व्रणानिचेति**मनूक्तेश्च** ।
मृन्मयतथा । एतानियतिपात्राणिगृहस्थोनसमाचरेदिति**पंचायतनसारेव्यासोक्तेश्च** । तत्रैव**संवर्तः**—सौव
ीर्तितम् । तदभावेस्मृतंपात्रंस्रवतेयन्नधारितम् । **कृष्णभट्टीयेमरीचिः**—कांस्येनायसपात्रेणत्रपुसीसकपित्तलैः ।
दाचनशुद्ध्यति । **यत्तुस्मृत्यर्थसारे**—सौवर्णरौप्यपात्रैश्चवेणुविल्वाश्मचर्मभिः । अलाबुदारुपात्रैश्चनारिकेलैःक

रन्यांतरितमृन्मयैः । वामेनोद्धृत्यवाचामेदन्यदातुरसंभवेइति । तन्मृन्मयमात्रपरम् । तस्यैवसंनिहितत्वात् ।
ादिनोद्धृतैर्मृन्मयैरित्यर्थः । अतएवाग्रेस्मृत्यर्थसारे—तत्रमृन्मयपात्रस्थंजलंनैवोपहन्यतइत्युक्तमितिकेचित
वेद्दक्षिणेनत्वित्युपक्रम्य सौवर्णरौप्यपात्रैश्चेत्याद्युक्तेर्यदिस्वहस्तेनाचामेत्तदैतैरेवेतिपरिगणनबलान्नियमेननान्यैर्
तैर्नाचामेदित्याहुः । प्रयोगपारिजातेसंग्रहे—करकालाबुपात्रेणताम्रचर्मपुटेनच । गृहीत्वास्वयमाच
लिग्नत्वेमूलंचित्यम् । वामेनोद्धृत्येतिस्मृत्यर्थसारविरोधात् । माधवीयेस्मृत्यंतरे—करपत्रेषुयत्तोयंयत्त
विाशुद्धंतुतत्स्मृतम् । अपरार्केस्मृत्यंतरे—ताम्राश्मनालिकेराब्जवेणुकालाबुचर्मभिः । स्वहस्तेनापिचा
मन्यदत्तेनेतितत्रैव ॥ इतिश्रीमन्नारायण०लक्ष्मणभट्टकृतावाचाररत्नेआचमनम् ॥

वनम् ॥ अत्रिः—मुखेपर्युषितेनित्यंभवत्यप्रयतोनरः । अथार्द्रकाष्ठंशुष्कंवाभक्षयेद्दंतधावनम् । तस्माद
कृत्वामृदाचम्यभक्षयेद्दंतधावनमित्युक्तेः । प्रक्षाल्यभंक्त्वातुशुचौदेशेत्यक्त्वातदाचमेदितिगारुडाच्च ।
ुक्त्वाचयतवाग्भक्षयेद्दंतधावनम् । भुक्त्वेतियतिपरमितिहलायुधः । विष्णुः—कंटकिक्षीरिवृक्षोत्थंद्वाद
ंपर्वार्धकृतकूर्चकम् । दंतधावनमुद्दिष्टंजिह्वोल्लेखनिकातथा । द्वादशांगुलकंविप्रेकाष्ठमाहुर्मनीषिणः । क्षत्र
। स्मृत्यर्थसारेतु—तिक्तकषायकटुसुगंधिकंटकिक्षीर्यव्रणमृजुकीटाद्यदूषितंद्वादशांगुलंविप्रे क्षत्रादिष्वंगुलि
गांचनारीणांकर्तव्यंचतुरंगुलम् । अथतत्काष्ठानि मदीयाःश्लोकाः—आम्राम्रातकसर्जवेणुबृहतीश्
ादिरापामार्गनिंबार्जुनान् । नारिंगंबदरीप्रियंगुकुटजान्धात्रीतमालंतथाकंकोलंत्वरिमर्दलोध्रमधुकान्राजादनप

कजंबूप्लक्षान्कषायंकटुकंटकंच । गृह्णीतशुद्धैर्दंतानामन्यांस्तत्रविवर्जयेत् । आम्रातकआंबाडाइतिप्रसिद्धः । सजे
राजादनंचारोली । कदरःश्वेतसारःखदिरः । खदिरोरक्तसारः । अतिमुक्तजंमोगरावेलीइतिमध्यदेशे । मधूकोज्जे
श्वपामार्गेधृतिर्मेधाप्रज्ञाशक्तिर्वपुःशुचिः । **अंगिराः**—प्रक्षाल्यभक्त्वातजह्यान्छुचौदेशेसमाहितः । **जातूकर्ण्यः**-
द्वाग्यतोदंतधावनम् । **कृत्यरत्नेगर्गः**—प्राङ्मुखस्यधृतिःसौख्यशरीरारोग्यमेवच । दक्षिणेनतथाकार्यपश्चिमेनप
नाशःस्त्रीणांप्रेष्यजनस्यच ॥ ॥ **अथनिषिद्धानि । मदीयाःश्लोकाः**—श्लेष्मातकःपिप्पलितिंदुकौपारिजातरि
सिभव्यौशणपारिभद्रौकुशेष्टकेवैचकुलश्चशुष्कम् । शाल्मल्यक्षौशिग्रुमोचानखानिकाशोलोष्ठसैंधवचांगुलिश्च । मुक्त्वांगु
र्खापर्णागारपापाणतार्णम् । कुभोविभीतकधवौसिकताश्मल्योनिर्गुंडिगुग्गुलपटौकनकश्चकन्छः । नदाखष्टमिरश्रयोर्व्रत
द्धेजन्मदिनेचतुर्दशियुगेक्रांतौव्यतीपातके । द्वादश्यांनिजजन्मभेपरतरेतत्पूर्वभेपौर्णमास्यांमांगल्यदिनोपवासदिनयोश्छ
चीमुखोदक्षिणाशामुखोवाद्विजानांविशुद्धिनकुर्यादमीभिः । अत्रमूल**पृथ्वीचंद्रादि**षुस्पष्टम् । पारिभद्रोनिंबतरुरित्यम
**ाद्रिः । यत्तुश्राद्धकाशिकायांस्मृतिः**—शणशाकंमृतंमांसकरेणमथितंदधि । अगुल्यादंतसघर्षस्तुल्यगोमांस
कान्यपरम् । इष्टकालोष्ठपाषाणैरितरांगुलिभिस्तथा । मुक्त्वात्वनामिकांगुष्ठौनकुर्याद्दंतधावनमितिच**ंद्रिकायां**
। **वाराहे**—अज्ञातपूर्वाणिनदंतकाष्ठान्यद्यान्नपत्रैश्चसमन्वितानि । नयुग्मपत्राणिनपाटितानिनचार्द्रशुष्काणिविनात्वचा
—दीक्षितोब्रह्मचारीचयतिश्चविधवांगना । नित्यमद्याद्दंतकाष्ठममायांतुविवर्जयेत् ॥ ॥ **ब्रह्मचारिणंप्रकृत्यकौ**
नाचरेद्दंतधावनम् । अतोब्रह्मचारिणोविकल्पइतिकेचित् । वस्तुतस्तुपूर्ववाक्येब्रह्मचारिपदंनैष्ठिकपरं यतिसाहचर्यादिति

र्गां—रजस्वलाचतुर्थेह्निसूतिकादशमेहनि । स्नानात्पूर्वंबंधमोक्षेनिंद्येष्वपिचरेदिति । बंधोनिगडः ॥ ॥ अथ
पीलुवटबिल्वकदंबवंधूकाश्वत्थकिंशुकमधूकशमीचजातिम् । अर्ककरंजकुटजावथतिंतिणींचनिर्गुंड्युदुंबरविशो
ानिद्यात्प्रतिषिद्धविधित्सितान् । अत्रदंतधावनकरणत्वेनसामान्यप्राप्तौविशेषविधिनाशेषनिषेधेसतिपुनर्निषेधः
निषेधवदित्याचारचंद्रोदयः । विहितनिषिद्धेषुविकल्पइतिकश्चित् । तन्न । व्यवस्थासंभवेविकल्पायोगात् ।
सेद्धेपुनस्तद्ग्रहणंविहितालाभेनिषिद्धान्यग्रहार्थंविहितनिषिद्धान्यालाभेविहितनिषिद्धग्रहार्थंतद्गणनमितिब्रूमः ।
ादुकादंतधावने । पलाशाश्वत्थकौवर्ज्यौसर्वंकुत्सितकर्मसु । धर्मसारे—स्त्रीसंगंखादनंपानंस्वाध्यायंक्षुरकर्म
सस्थिते । यमः—चतुर्दश्यष्टमीदर्शपूर्णिमासंक्रमेरवौ । एपुस्त्रीतैलमांसानिदंतकाष्ठंचवर्जयेत् । भविष्ये
तेयदा । एकादशीविधानायनिराशःस्याद्यमस्तदा । वृद्धमनुः—गतेदेशांतरेपत्यौगंधमाल्यांजनादिच । दंत
प्रयोगपारिजातेदक्षः—अंजनाभ्यंजनेस्नानप्रवासंदंतधावनम् । नकुर्यात्सार्तवानारीग्रहाणामीक्षणतथा
वर्जयेद्दंतधावनम् । मरीचिः—नाद्यादजीर्णवमथुश्वासकासज्वरार्दितः । गोभिलः—श्राद्धेयज्ञेथनियमे
ाह्नस्नानवेलायांयोभक्षेद्दंतधावनम् । निराशास्तस्यगच्छंतिदेवताःपितरस्तथा । अत्रप्रोदितेइतिमध्याह्नेपितन्नि
ार्थइतिकेचित् । वस्तुतस्तुमध्याह्नेतन्निषेधस्तत्पूर्वप्रोदितेपितत्प्राप्त्यर्थः । अन्यथानिषेधवैयर्थ्यादितियुक्तम्
। श्राद्धभुक्प्रातरुत्थायप्रकुर्याद्दंतधावनम् । श्राद्धकर्तानकुर्वीतदंतानांधावनंबुधइतिप्रचेतोवचनात् । अ
त्वात्फलिसंस्काराद्दंतधावनवर्जनादयःसर्वेषाम् । एवंप्रतिनिधेरपि ।—श्राद्धंशिष्येणपुत्रेणतदन्येनापिकारयेत्

वसुंधरेइतिहेमाद्रौवाराहाच्च । **विष्णुरहस्ये**—उपवासेतथाश्राद्धेखादित्वादंतधावनम् । गायत्र्याशतसंपू
ाशीखंडे—अलाभेदंतकाष्ठानांनिषिद्धेवाथवासरे । गंडूषाद्वादशग्राह्यामुखस्यपरिशुद्धये । **स्कांदेप्रभासखंडे**
ंश्चैवषोडश । तत्तत्पत्रैःसुगधैर्वाकारयेद्दंतधावनम् । **यत्तु**—उपवासेपिनोदुष्येद्दंतधावनमजनम् । एकादश्यांतृणै
कृष्णभट्टीयेस्कांदं तत्समर्तृकोपवासपरम् । अंजनसाहचर्यात् । **हेमाद्रावप्येवम्** । दंतधावननिषेधेऽपिजिह्वो
ष्ठीधुनवम्यांदंतधावनम् । पर्णैरन्यत्रकाष्ठैस्तुजिह्वोल्लेखःसदैवहीति**व्यासोक्तेः । स्कांदे**—दतधावनकाष्ठेननजिह्व
ोवर्चःप्रजापशुवसूनिच । ब्रह्मप्रज्ञांचमेधांचत्वनोधेहिवनस्पते । मंत्रेणानेनमतिमान्भक्षयेद्दंतधावनमिति**काशीखं**
**चंद्रमदनपारिजातौ** । **छंदोगपरिशिष्टे**प्येवम् । अभिमन्त्र्याहृताशाखामत्रेणानेनवैद्विजाः । ततऊर्ध्वंक्रमेणैव
:स्मृतेः। शाखाभिमंत्रणइति**स्मृतिरत्नावली** । वचनद्वयादुभयत्रेतितुयुक्तम् । **सएव**—पतितांत्यजपांखडिदेवार्ज
केचंडालानपेक्ष्यादंतधावने । शुनकविड्वराहचगर्दभताम्रचूडकम् । अन्यान्नैवेदशान्पश्येद्द्विजशुद्धौविचक्षणः । देवा
**तरौ**—ऊर्ध्वेनिपतितेसिद्धिस्तथाचाभिमुखेस्थिते । अतोन्यथानिपतितेआनीयपुनरुत्सृजेदिति तत्सिद्धार्थकादिसप्त
त्किंचिदेव ॥ ॥ **उषःपानम्** । **बृहदात्रेयसंहितायाम्**—पिबतिपर्युषितंजलमन्वहंतिमिरवांश्वरमप्रहरेनिश
ारूढीदशमपास्तसमस्तगदोनरः । **आयुर्वेदेभोजोपि**—अंभसःप्रसृतीरष्टौरवावनुदितेपिवेत् । नवनागवलंप्राप्यर्ज
—पश्चाद्द्वादशगडूषैःशुद्धिंकृत्वाद्विराचमेत् । ललाटेहृदिबाह्वोश्चऊर्ध्वपुंड्राणिधारयेत् । चतुर्भिःसंकर्पणादिनामभिश्र
ाणे—स्वाचांतस्तुपुनःकुर्यात्पुमान्केशप्रसाधनम् । आदर्शांजनमांगल्यदूर्वाद्यालंभनानिच । **मार्कंडेयपुराणे**—

खएवच । केशान्संस्कुरुतेमर्त्यौधननाशंसविंदति ॥ इतिश्रीमन्नारायण०लक्ष्मणभट्टकृताचाररत्नेदंतधावनम् ॥

वलोकनम् ॥ **मदनपारिजातेब्राह्मविष्णुपुराणयोः**—स्वमात्मानंघृतेपश्येद्यदीच्छेच्चिरजीवितम् ।
र्याद्वस्त्रानुलेपनैः । ततःप्रतिष्ठयेत्पात्रंस्वैर्मंत्रैश्चप्रपूजयेत् । पश्चाद्विप्रायदातव्यंस्वर्णैकेनसमन्वितम् । प्रातरा
**ब्राह्मणे**—आज्यंतेजःसमुद्भूतमाज्यंपापहरंपरम् । आज्येनदेवास्तृप्यंतिआज्येलोकाःप्रतिष्ठिताः । भौमांतरिक्ष
र्वितदाज्यसंस्पर्शात्प्रणाशमुपगच्छतु । **अन्यच्च**—याऽलक्ष्मीर्यच्चदौस्स्थ्यंमेसर्वगात्रेष्ववस्थितम् । तत्सर्वंशम
॥ ॥ **अथकुशाः** । **चंद्रोदयेऽत्रिः**—उभयानामिकाभ्यांतुधार्येदर्भपवित्रके । **पवित्रमाहमार्कंडे**
पवित्रकम् । एकैकन्यूनमुद्दिष्टंवर्णेवर्णेयथाक्रमम् । **यत्तुकात्यायनः**—अनंतर्गर्भिणंसाग्रंकौशंद्विदलमेवच
चिदितितद्वैश्यपरंपूर्ववचनादितिपृथ्वीचंद्रः । **स्मृत्यर्थसारेतु**—सर्वेषांवाभवेद्वाभ्यांपवित्रयत्रकुत्रचिदित्यु
र्भपिंजूलैःकुर्याद्ब्राह्मपवित्रकम् । पंचभिःक्षत्रियस्यैवचतुर्भिश्चतथाविशः । द्वाभ्यांशूद्रस्यविहितमितरेषांतथैवचे
शालीपाकपरमित्युक्तम् ॥ ॥ **रत्नावल्याम्**—प्रथमंलंघयेत्पर्वद्वितीयंतुनलंघयेत् । अग्रपर्वस्थितोदर्भः
ाकामोमूलेसर्वार्थसाधकः । **चंद्रिकायाम्**—अंगुलीमूलदेशेतुपवित्रंधारयेद्द्विजः । राज्ञांद्विपर्वकेचैवविशाम
यज्ञोपवीतेमौंज्यांचतथाकुशपवित्रके । ब्रह्मग्रंथिविजानीयादन्यथातुयथारुचि । **पवित्रप्रकारस्तत्रैव**—
: । ज्ञानमुद्रामधःकुर्यात्पूर्ववद्ग्रंथिबंधनम् । **आश्वलायनः**—तारेणकुर्याद्ग्रंथितुपवित्रस्यद्विजोत्तमः । ग्रं
तारः प्रणवः । **भरद्वाजः**—अत्रोक्तसंख्यापिंजूलानेकीकृत्यसमंयथा । मूलानिदक्षिणेहस्तेधृत्वाग्राण्यन्य

मनुवर्त्यप्रदक्षिणम् । तथैवाग्रेणचावेष्ट्यकुर्याद्ग्रंथिंयथादृढाम् । **वृत्तग्रंथिलक्षणंहेमाद्रौगारुडे**—अर्धप्रदक्षिण
। वैष्णवेनैवमार्गेणवृत्तग्रंथौपवित्रके । वैष्णवोमार्गः पश्चाद्भागः । **ब्रह्मग्रंथिरपितत्रैव**—संत्यज्यवैष्णवंमार्गंब्रा
प्रदक्षिणीकृत्यब्रह्मग्रंथिःसउच्यते । कर्तुरभिमुखप्रदेशोब्रह्ममार्गः । **क्षेमप्रकाशेशंखःप्रकारांतरमाह**—त्रिः
योजयेत् । ब्रह्मग्रंथिःसविज्ञेयःसदामौजादिषुद्विजैः । **चंद्रोदयेव्यासः**—करेकंठेशिखायांचकर्णयोरुभयोरपि ।
लिप्यते । **कात्यायनः**—सपवित्रःसदर्भोवाकर्मांगेपितृकर्मणि । अशून्यतुकरंकृत्वासर्वत्राचमनंचरेत् । नोत्सृज
ुवर्जयेत् । **ब्राह्मे**—मंत्रंविनाधृतंयत्तत्पवित्रमफलंभवेत् । तस्मात्पवित्रेमत्राभ्यांधारयेदभिमंत्र्यच । पवित्रंतेतुइत्य
वस्त्वस्यमंत्रःस्यात्समस्ताव्याहृतिस्तुवा । **पृथ्वीचंद्रोदये**—धृतपवित्रकर्मांतेग्रंथिमुक्त्वातुतत्त्यजेत् । विस्मृत्ययदि
प्राजापत्यंचरेत्कृच्छ्रंतत्किल्बिषविशुद्धये । **आश्वलायनः**—तस्मिन्क्षीणेक्षिपेत्तोयेवह्नौवायज्ञसूत्रवत् । भूमिंज्ञा
ृयेत् । **भरद्वाजः**—कर्मांतेपुनरादायपवित्रद्वितयंद्विजः । शुचौदेशेविनिक्षिप्यदध्यादेतत्पुनःपुनः । यद्युच्छिष्टाः
तदैवग्रथिमुत्सृज्यत्यजेदितरथानहि । **मदनपारिजातेकौशिकः**—पवित्रस्यतुनाशौचमाचांतेतुकदाचन । f
ञ्जनेतथा । **दर्भेषुतुहेमाद्रौस्कांदे**—अनामिकाधृतादर्भाह्येकानामिकयापिवा । द्वाभ्यामनामिकाभ्यांतुधार्येदर्भपवि
:—अथवानामिकाभ्यांतुग्रथिहीनंकुशादिकम् । हेमादीन्वाथबिभृयात्सर्वकर्मस्वपिद्विजः । **गौडास्तु**—मध्यमान
ुशम् । सव्यादिकर्मजाप्येषुस्वाध्यायेपितृतर्पणे । केवलानामिकायांतुअज्ञानाद्धारयेत्कुशम् । श्वानमूत्रसमतोयंपीत

---

तु—मेखलामजिनदण्डमुपवीतकमण्डलुम् । अप्सुप्रास्यविनष्टानिगृह्णीतान्यानिमन्त्रवत् । ( मनु अ २ श्लो ६४ ) इत्युक्तेरत्रत्योवह्निनिक्षेपो

क्तेः कुशधारणंमध्यमानामिकयोरित्याहुः । तन्न । वचनस्यमहानिबंधेषुक्काप्यनुपलंभात् । सर्ववचनेषुकुशहेम
कुशानूर्ध्वाग्रान्विभृयात् । वज्रंयथासुरेंद्रस्यशूलंहस्तेहरस्यच । चक्रायुधंयथाविष्णोरेवंविप्रकरेकुशइतिचां
ेषुवाक्यशेषादितिन्यायेनशूलसाम्योक्त्यानिर्णयाच्छूलदृष्टान्तएवमुख्यः । अतएवतत्रैवहस्तग्रहणंत्रिशाखत्वादिन
ाह—समूलाग्रौविगर्भौतुकुशौद्वौदक्षिणेकरे । सव्येचैवतथात्रीन्वैबिभृयात्सर्वकर्मसु । **छंदोगपरिशिष्टे**—
सकृत् । उपवीतेशिखायांचपादमूलेसकृत्सकृत् । अत्रचत्वारःपक्षाः । हस्तद्वयेदर्भधारणम् हस्तद्वयेपवित्र
दक्षिणएवोभयमिति । तृतीयःकातीयपरः—सव्यःसोपग्रहःकार्योदक्षिणःसपवित्रकइति**कात्यायनोक्तेः** ।
स्वाध्यायेपितृतर्पणे । अशून्यंतुकरंकुर्यात्सुवर्णरजतैःकुशैः । सुवर्णरजतैरितिबहुत्वमेकसुवर्णाद्यवयवविधारणो
विवृत्तित्वात्सुवर्णादीनांसमुच्चयः । अनामिकायांतद्धेमधारयेद्दक्षिणेकरेइति**देवीपुराणे**—अनामिकायांहेमधा
तत्रैवधार्यम् । तर्जन्यांरजतंधार्यमितिवचनंतुनिर्मूलम् । **कल्पतर्वादिभिरनादरादितिवर्धमानः** । तन्न
मेवच । कनिष्ठिकाधृतंखड्गं तेनपूतोभवेन्नरइति**श्राद्धहेमाद्रौचंद्रिकायांचयोगयाज्ञवल्क्य**विरोधात्
उत्तरीयंयोगपट्टंतर्जन्यांरजतंतथा । नजीवत्पितृकैर्धार्यंज्येष्ठोवाविद्यतेयदीति**चंद्रोदयेसंग्रहात्** । **आश्व**
ंत्रंतृणसंभवम् । हेमादयस्तुसंग्राह्याःसम्यङ्निष्टप्यवह्निना । **स एव**—पवित्रेपतितेज्ञातेतथाजपगणेभुवि ।
र्षणम् । जपगणो माला—हैम्नैवसर्वदासर्वंकुर्यादेवाविचारयन् । रौप्यंदक्षप्रदेशिन्यांबिभृयाद्दीक्षितोद्विजः ।
म् । गायत्र्यक्षरवर्गेणगृह्णीयात्ताम्रमुत्तमम् । अनुष्टुभस्तथारूप्यंत्रिष्टुभःकनकोत्तमम् । गायत्रीचतुर्विंशत्यक्षरा

· । द्वात्रिंशदक्षरानुष्टुप् । चतुश्चत्वारिंशदक्षरात्रिष्टुप्—शलाकाःकारयित्वातोऽभिमृजेदंगुलीयकम् । शुद्धोधार्यदिवारात्र
त्वन्यथोक्तम्—सोमसूर्याग्निरूपाःस्युर्वर्णालोहत्रयतथा । रौप्यमिदुःस्मृतोहेमसूर्यस्ताम्रहुताशन. । लोहभागा.समुद्दिष्टा
हैःकारयेन्मुद्रामसकलितसगताम् । अकाराद्य.षोडश१६स्वरास्तावतोभागारौप्यस्य । काद्यामांता.पंचविंशतिः२५हेम्न.
ाम्रस्य । साग्रसहस्रंसजप्यस्पृष्ट्वातांजुहुयात्ततः । तस्यांसपातयेन्मंत्रीसर्पिषापूर्वसंख्यया । जप.पूर्वोक्तमातृकामत्रस्य कं
कुंभेतांमुद्रामभिषेकोक्तवर्त्मना । आवाह्यपूजयेद्देवीमुपचारैःसमाहितः । अभिषिच्यविनीतायदद्यात्तांमुद्रिकांगुरुः ।
विनाशिनी । शारदातिलकेतु—तारताम्रसुवर्णानामर्कषोडशखेंदुभिरित्युक्तम् । खेंदवोदश । वोपदेवः—ह्रींशु
गो । प्राच्याद्रत्नानिखेटाश्चमध्येमाणिक्यमुष्णगोः । उष्णगुः सूर्यः । ह्रिंशुमित्याद्यक्षरद्वंद्वानिहीरकशुक्रादिग्रहत्वो
—अर्कदुरक्तज्ञगुरुभृगुमदाहिकेतवः । माणिक्यमौक्तिकचारुविद्रुमगारुडंपुनः । पुष्परागलसद्वज्रनीलगोमेदकंशुभम्
ःकल्पयेच्छुभाम् । जपहोमादिकसर्वंकुर्यात्पूर्वोक्तवर्त्मना । योमुद्रांधारयेदेनांतस्यस्युर्वशगाग्रहाः । विन्यासेविशेष
मंतस्तरणेर्निधेयवज्रसुमुक्ताविलसत्प्रवालम् । गोमेदकंनिर्मलमिंद्रनीलवैडूर्यकंपुष्पमतस्तुपाचिः । पूर्वादितःशुक्रशश
शांकजानाम् । रत्नानियत्नेनचमुद्रिकायांन्यस्यानिखेटेपुनिजोच्चगेषु ॥ इतिलक्ष्मणभट्टकृताचाररत्नेंगुलीयकप्रकरणम् ॥
कुशग्रहणम् । कुशाःकतिविधाःकदाकथकैर्ग्राह्याःकेऽविकारिणोगृहीतानामहर्मर्यादांचाह **स्मृतिचिंतामण**
शोद्धारःप्रशस्यते । तत्रैव—मासिमास्युद्धृतादर्भामासिमासेवचोदिताः । उत्तरोत्तरमासेषुधर्मविद्भिरसमताः । षन्मा
ादमावास्यादर्भाग्राह्योनवःस्मृतः । **मदनरत्नेशंखमरीची**—मासेनभस्यमावास्यातस्यांदर्भोच्चयोमतः । अयातय

: । आर्द्रांल्लुँनीयाद्रात्रौनलुनीयांद्वापिसंध्ययोः । मासःशुक्लादिरितिवर्धमानः । हेमाद्रौहारीतः—मासेनभ
। यत्तुशंखः—अमायांचैवनच्छिद्यात्कुशांश्चसमिधस्तथेति तत्तत्कालकर्मपर्याप्तव्यतिरिक्तविषयम् । कुशाः
म् । निषिद्धेवापिगृह्णीयादमावास्याहनिद्विजइतिजाबाल्युक्तेरितिपृथ्वीचंद्रः । वनस्पतिगतसोममुहूर्तप
हूर्तंजलेवसेत् । त्रिमुहूर्तंवसेद्गोषुत्रिमुहूर्तंवनस्पतौ । वनस्पतिगतेसोमेयस्तुहिंस्याद्वनस्पतीन् । घोरायांभ्रूणह
र्णोक्तेरितिमदनपारिजातः । रागप्राप्तस्यायंनिषेधः वैधतन्निषेधेविकल्पापत्तेरितिचंद्रिका । तत्रैवयः
द्धकर्मणि । श्राद्धमेकोद्दिष्टम् । एकोद्दिष्टेकुशाःकार्याःसमूलायज्ञकर्मणि । बर्हिर्लूनाःसकृल्लूनाःसर्वत्रपितृकर्म
र्लूनाः । तेचैकोद्दिष्टेतरश्राद्धपराइतिचंद्रिका । तत्रैवपुराणे—पित्र्यंमूलेनमध्येननारंदानचयत्नतः । दै
। तत्रैवसंग्रहे—होमेतर्पणकालेचविवाहेयज्ञकर्मणि । अगर्भिणस्तुयेदर्भाःपुत्रदारधनप्रदाः । तत्रैवह
नाहरेद्द्विजः । स्मृतिचिंतामणौ—सप्तरात्रंशुभादर्भास्तिलक्षेत्रसमुद्भवाः । भरद्वाजः—पलाशाश्व
वैकंकतांतस्थास्तच्छायास्थाःकुशाःशुभाः । गृह्यपरिशिष्टे—दर्भाःकृष्णाजिनंमंत्राब्राह्मणाहविरग्नयः । अ
नः । इदंनभस्यदर्शच्छिन्नदर्भविषयमितिवर्धमानः । एतदपवादस्तत्रैव—येचपिंडाश्रितादर्भायैःकृतंपितृत
त्यागोविधीयते । हारीतः—पथिदर्भाश्चितौदर्भायेदर्भायज्ञभूमिषु । स्तरणासनपिंडेषुषट्कुशान्परिवर्जयेत
ब्रह्मयज्ञेचयेदर्भायेदर्भाःपितृतर्पणे । हतामूत्रपुरीषाभ्यांतेषांत्यागोविधीयते । मूत्रोच्छिष्टधृतायेचेतिवर्ध
येचच्छिन्नानखैस्तथा । कथिताश्चाग्निनादर्भास्तान्दर्भान्परिवर्जयेदितिवृद्धहारीतोक्तेः । शंखः—

चयेधृताः । पवित्रांस्तान्विजानीयाद्येतुकर्णेचदक्षिणे । नीवीपरिधानंवस्त्रग्रंथिरितिकल्पतरुः । **चंद्रोदयेसंग्र**
मूलान्परिवर्जयेत् । **संग्रहे**—आचांतःप्राक्कुशांस्त्यक्त्वापाणावन्यांश्चधारयेत् । श्राद्धारंभेतुयेदर्भाःपादशौचेविस
र्भाउच्छिष्टांतेविसर्जयेत् । पार्वणादौतुयेदर्भाआघ्राणांतेविसर्जयेत् । मार्जनादौतुयेदर्भाःपिंडोत्थानेविसर्जयेत् । उ
विसर्जयेत् । प्रार्थनादौतुयेदर्भानमस्कारेविसर्जयेत् । विकिरेपिंडदानेचतर्पणेस्नानकर्मणि । आचांतश्चप्रकुर्वीतद
**नः**—समूलाःपितृदैवत्याःकल्माषावैश्वदेविकाः । ह्रस्वाःप्रवरणीयाःस्युःकुशादीर्घास्तुबर्हिषः । प्रवरणीयाः स्ना
**त्रमाहशंखः**—विरिंचिनासहोत्पन्नपरमेष्ठिनिसर्गज । नुदसर्वाणिपापानिदर्भस्वस्तिकरोभव । **स्मृत्यर्थसारे**
छित्त्वासमुद्धरेत् । **हेमाद्रौकार्ष्णाजिनिः**—पूर्वंतुशिथिलीकृत्यखनित्रेणविचक्षणः । आदद्यात्पितृतीर्थेनहुंफट्हुप
**तः**—शुनाशुद्धवराहेणमार्जारेणैकचक्षुषा । खरेणकुक्कुटेनैवस्पृष्टःकर्मरिपुःकुशः । कपिनाकृकलासेनपतितेनांत्यज
पृष्टःकुशःकर्मस्वशोभनः । देवलेनचषंढेनव्रात्येनाज्ञातजन्मना । वर्ज्यःसूतकिनास्पृष्टःकुशोऽनुष्ठेयकर्मसु । रक्तश्लेष्म
ुराधृतः । उच्छिष्टजनसंस्पृष्टःकुशःकर्मविनाशकः । सूतिकात्रेयिकावेश्याज्ञातपूर्वाभिसारिकाः । अन्याःसदोषायास
ः । आत्रेयिका गर्भिणी । **अपरार्के**—कुशाःकाशायवादूर्वागोधूमाश्चाथकुंदुराः । उशीराव्रीहयोमुंजादशदर्भाःस
ादेशेमोळइतिप्रसिद्धाइतिहे**माद्रिः** । दर्भत्वोक्तिःकाशादिस्तुल्यर्था । दर्भाभावेद्विजःकर्मकाशैःकुर्वीतसंयतइतिशंखो
**सुमंतुः**—कुशःकाशःशरोगुंद्रोयवादूर्वाश्चबल्वजाः । गोकेशकंदौमुंजश्चपूर्वाभावेपरःपरः । **वृद्धपराशरः**—द

स्वस्तिकरोभवइतिपाठ । २ कुशाभावेइतिपाठ ।

शूकधान्यतृणैर्वापिदर्भकार्यंचरेद्विजः । सएव—काशहस्तस्तुनाचामेन्नदूर्वाभिःकदाचन । **बौधायनः**—
च । लेखनेचतथाद्धौद्वौस्तरणेषोडशस्मृताः । **कौशिकः**—गवांवालपवित्रेणसंध्योपास्तिकरोतियः । सवैद्वा
**रद्वाजः**—रोम्णांपवित्रकरणेनियमोनकुशेष्विव । **पाद्मे**—नदर्भानुद्धरेच्छूद्रोनपिबेत्कापिलंपयः । नोच्चरे
इतिश्रीमन्नारायणभट्टात्मज०लक्ष्मणभट्टकृतावाचाररत्नेकुशप्रकरणम् ॥
नम् । **शंखलिखितौ**—अनश्नन्स्नायादिति । अनश्नन्तांवूलाद्यभक्षयन्निति**कल्पतरुः** । **हेमाद्रौकौर्मे**
द्धिमिच्छता । एपसाधारणोधर्मश्चतुर्वर्णस्यनित्यशः । स्त्रीभिःशूद्रैश्चकर्तव्यंमंत्रवर्ज्यंविगाहनम् ॥ ॥ **भा**
नमिष्यते । तूष्णीमेवतुशूद्रस्यसनमस्कारकंस्मृतम् । तूष्णीमितिश्रौतस्मार्तमंत्रनिषेधेप्रासेनमइतिनमस्कारमं
पविज्ञेयः । तेनाश्वक्रांतेइत्यादिमंत्रोनेति**मदनपालः** । **श्रीदत्ताह्निके**तु तूष्णीमितिवैदिकमंत्रनिषेधोनपं
द्येप्येवम् । **कल्पतरुस्तु**—कर्मांगमंत्रपाठःशूद्रस्येत्याह । वस्तुतस्तुपौराणोऽपिब्राह्मणैरेवपठनीयः । शूद्रो
रोम्मणावप्येवम् ॥ ॥ सभर्तृकाणांस्त्रीणांनित्यस्नानमशिरस्कम् । सचैलस्नाननिमित्तेप्यशिरस्कत्वविधा
च । **जाबालिः**—सततंप्रातरुत्थायदंतधावनपूर्वकम् । आचरेदुषसिस्नानंतर्पयेद्देवमानुषान् । **श्राद्ध**
टिकाःप्रातररुणोदयउच्यते । यतीनांस्नानकालस्तुगंगांभःसदृशःस्मृतः । यतयो नियताः । अरुणोदयःसं
**हरिहरः** । तन्न । संध्यापूर्वकालेऽपिरात्रित्वेननिषेधादित्या**चारादर्शः** । तदपिन । वक्ष्यमाण**पराशर**
**पराशरः**—उषस्युषसियत्स्नानंक्रियतेऽनुदितेरवौ । प्राजापत्येनतत्तुल्यंमहापातकनाशनम् । उषःकाल

ालात्प्राक्कालइतिकल्पतरुः । नागदेवाह्निकेक्षेमप्रकाशेचविष्णुः—नाडिकापट्कंपंचाशत्प्रातस्त्वेकाधिकं
ाशञ्छेपःसूर्योदयःस्मृतः। यत्तुमार्कंडेयः—सूर्योदयंविनानैवस्नानदानादिकःक्रमः। अग्नेर्विहरणंचैवकल्पभावश्चलक्ष
विइतिकेचित् । उदयपदेनोपःकालोलक्ष्यतइतिवर्धमानःपृथ्वीचंद्रश्च । तेनरात्रौनकुर्यादित्यर्थः । अविहित
नंदः । इदं नित्यंकाम्यंच । ससाहंप्रातरस्नायीद्विजःशूद्रत्वमाप्नुयादितिवसिष्ठोक्तेः । उपस्युपसीतिवीप्साश्रुतेश्च
क्ष्मीग्लानिमेवच । अशुचित्वचदुःस्वप्नतुष्टिंपुष्टिंचयच्छतीतिकाशीखंडाच्च । प्रातःस्नायीभवेन्नित्यंमध्यस्नायीस
क्तेर्मध्याह्नस्नानमपिनित्यमितिहेमाद्र्यादयः । नित्यमेवतुमध्याह्नेप्रातश्चक्वचकस्यचिदितिस्मृत्यर्थसारान्मध्या
र्शः । काम्यधेनावप्येवम् । दक्षस्मृतिगारुडयोः—प्रातर्मध्याह्नयोःस्नानवानप्रस्थगृहस्थयोः । यतेस्त्रि
ण । सकृदित्यशक्तपरम् । स्नायात्प्रातश्चमध्याह्नेब्रह्मचारीगृहीतथेतिचंद्रोदयेसंग्रहोक्तेः । बह्वृचपरिशि
तर्मध्याह्नेचगृहस्थःकुर्यादेकतरत्रवेति । कात्यायनः—यथाहनितथाप्रातर्नित्यंस्नायादनातुरः । दंतान्प्रक्षाल्य
। अह्नि मध्याह्ने । आतुरस्यमंत्रस्नानादिवेतिपृथ्वीचंद्रः । अमंत्रवदल्पमंत्रम् । गृहेपिहिद्विजातीनांमंत्रवत्स्
ामिनिस्मृतेः । साग्नेर्नद्यादावप्येवम् । अल्पत्वाद्धोमकालस्यबहुत्वात्स्नानकर्मणः । प्रातःसंक्षेपतःस्नानंहोमल
यनोक्तेः । चतुर्विंशतिमते—प्रातर्मध्याह्नयोःस्नानंगृहस्थस्यविधीयते । शक्तश्चेदुभयंकुर्यादशक्तस्त्वापराह्णिक
जावालिः—अशिरस्कंभवेत्स्नानंस्नानाशक्तौतुकर्मिणाम् । स्मृत्यर्थसारे—चक्षूरोगीकर्णरोगीशिरोरोगीकफा
शिरःस्नानसमंहितत् । मुखवक्रत्वापादकोरोगः । आयुर्वेदेपि—स्नानमर्दितनेत्रास्यकर्णरोगातिसारिषु । आ

म् । **हेमाद्रौवाराहे**—त्रिभिःसारस्वतंतोयंपंचाहेनतुयामुनम् । सद्यःपुनातिगांगेयंदर्शनादेवनार्मदम्
पियत्पयः । पावनंस्नानदानेषुप्राजापत्यसमंस्मृतम् । **रूपनारायणीयेब्राह्मे**—नद्यांप्रत्येकशःस्नानेभवेद्
ःस्नानेपुण्यंतुसंगमे । **अग्निपुराणे**—भूमिष्ठमुद्धृतात्पुण्यंततःप्रस्रवणोदकम् । ततोपिसारसंपुण्यंतस्मा
गांगंपुण्यंतुसर्वतः । **चंद्रिकायांयोगयाज्ञवल्क्यः**—त्रिरात्रफलदानद्योयाःकाश्चिदसमुद्रगाः ।
तिः । त्रिरात्रफलदाः नदीभिन्नजलाधिकरणकत्रिरात्रस्नानफलदाः । पक्षादावप्येवमितिरूप**नारायणः** । f
। **वृद्धयाज्ञवल्क्यः**—नदीस्नानानिपुण्यानितडागेमध्यमानिच । वापीकूपेजघन्यानिगृहेष्वत्यवराणिच
ष्यंक्रियांगंमलकर्षणम् । तीर्थाभावेतुकर्तव्यमुष्णोदकपरोदकैः । **माधवीयेगार्ग्यः**—कुर्यान्नैमित्तिकंस्ना
च्छिकंचैवयथारुचिसमाचरेत् । **हेमाद्रावप्येवम्** । असमुद्रगताश्चापियाःकाश्चिद्विपुलोदकाः । अशोष्
त् । शुष्यंतियाःकुसरितोग्रीष्मेसूर्यांशुतापिताः । तासुस्नानंनकर्तव्यंदृष्टतोयास्वपिकचित् । इदंकाम्यपरम्
—शिवलिंगसमीपस्थंयत्तोयंपुरतःस्थितम् । शिवगंगेतितज्ज्ञेयंतत्रस्नानाद्दिवंव्रजेत् । **तत्रैव**—देवार्चादृष्टि
वेनिर्मुक्तःक्षणाद्भवतिनिर्मलः । **चंद्रोदयेवृद्धपराशरः**—कूपेपूद्धृततोयेनस्नानंकुर्वीतवाभुवि । **योगया**
सरितांसरसांतथा । उद्धृत्यचतुरःपिंडान्पारक्येस्नानमाचरेत् । सरउत्सृष्टम् । **पराशरः**—कदाचिद्
वासस्सवापिडान्स्नायादुद्धृत्यतत्रतु । **शौनकः**—उद्धृत्यमृत्तिकापिंडान्दशपंचतथाक्षिपेत् । **पैठीनि**
। **बौधायनः** । निरुद्धासुतुमृत्पिंडान्कूपाच्चत्रीन्घटांस्तथा । अत्राप्रतिष्ठितमात्रेपिंडोद्धारइतिप्रांचः । तत्र

ह्नानाभावात्परस्वोपयोगेचौर्यापत्तेश्चेतिह्**हरिहराद्यः** । अतःपिडत्रयोद्धारःसेतुपरः । पंचपिंडोद्धारस्तदन्यपरः । सह
ातिपृथ्वीचंद्रः । यथासामर्थ्यव्यवस्थेतिचंद्रिका । सर्वमेतदनुत्सृष्टविपयम् । अनुत्सृष्टेपुनस्नायात्तथैवासंस्कृ
**पराशरः**—नतीर्थेस्याकुलेस्नायान्नासज्जनसमावृते । दर्भहीनोऽन्यचित्तश्चननग्नोनशिरोविना । **बौधाय**
वकरजश्चहरीतकी । कोविदारकबिल्वार्कावदरीचबिभीतकः । शेलुश्चखादकश्चैपांछायास्नानंविवर्जयेत् । **माध**
त्यजैःखानिताःकूपास्तडागोवाप्यएवच । एपुस्नात्वाचपीत्वाचप्राजापत्येनशुद्ध्यति । खानितग्रहणादखानितेनदो
—जलाशयेष्वथाल्पेषुस्थावरेषुमहीतले । कूपवत्कथिताशुद्धिर्महत्सुनतुदूपणम् । **चंद्रिकायांबौधायनः**—अध
द्विजातिभिः । तस्यांरजकतीर्थंतुदशहस्तेनवर्जयेत् । तत्रैव**पुराणे**—स्रवन्नदीपुनस्नायात्प्रविश्यांतःस्थितोद्विजः । **म**
न्नष्टनद्यायच्चविवर्जितम् । गतप्रत्यागतंयच्चतत्तोयंपरिनर्जयेत् । स्नानादावितिशेपः । परिभ्रष्टं विच्छिन्नम् । विवर्जितं
ायागतमविच्छिन्नमावर्ततइतिचंद्रिका । **व्याघ्रपादः**—सिंहकर्कटयोर्मध्येसर्वानद्योरजस्वलाः । तासुस्नाननकुर्वीत
ानंतर्पणादेरुपलक्षणम् । नस्नानादीनिकर्माणितासुकुर्वीतमानवइत्यत्रि**स्मृतेः** तीरवासिनांननिपेधः । नतुतत्तीरव
**ातौ**निगमात् । समुद्रगानांतुहे**माद्रौदेवीपुराणे**—समुद्रगामिनीनांतुषड्रात्ररजइष्यते ॥ ॥ **नदीराहकाल**
यष्टौतुगतिर्यासांनविद्यते । नतानदीशब्दवहागर्तास्तेपरिकीर्तिताः । धनुश्चतुर्हस्तमितिवाचस्पतिः । **भविष्योत्त**
महानद्योरजस्वलाः । त्रिदिनंतुचतुर्थेह्निशुद्धाःस्युर्जाह्नवीयथा ॥ ॥ **महानद्यश्चोक्ताब्राह्मे**—गोदावरीभीम

इतिपाठ ।

ापीपयोष्णीविंध्यस्यदक्षिणेतुप्रकीर्तिताः । भागीरथीनर्मदाचयमुनाचसरस्वती । विशोकाचवितस्ताचविंध्यस्
**मनपुराणे**—गोदावरीभीमरथीकृष्णावेणीसरस्वती । तुंगभद्रासुप्रयोगासत्याकावेरिरेवच । दुग्धोदानलि
अपिमहानद्यःसह्यमूलाद्विनिर्गताः । **अपरार्केमरीचिः**—तपनस्यसुतागंगागौतमीचसरस्वती । रजसाना
ल:—शोणसिंधुहिरण्याख्याःकोकलोहितघर्घराः । शतद्रुश्चनदाःसप्तपावनाःपरिकीर्तिताः । **हेमाद्रौवाम**
यावैतरणीनदी । आपगानर्मदाचैवगंगामंदाकिनीनदी । मधुस्रवाअंशुमतीकौशिकीयमुनातथा । दृषद्वतीमह
ात्वमेतासांविद्यतेनकदाचन । इदंत्रिदिनाधिकरजोनिषेधपरम् । पूर्वोक्तभविष्यविरोधादितिहेमाद्रिः । प्र
र्गतरजोविषयम् । गंगाधर्मद्रवःपुण्योयमुनाचसरस्वती । अंतर्गतरजोदोषाःसर्वावस्थासुचामलाइति**निगमादि**
प्रायश्चित्तमुक्तं**त्रिस्थलीसेतौसंग्रहे**—कालेनभस्यशुद्धंस्यात्त्रिरात्रंतुनवोदकम् । अकालेतुदशाहंस्यात्स
न:—उपाकर्मणिचोत्सर्गेप्रेतस्नानेतथैवच । चंद्रसूर्यग्रहेचैवरजोदोषोनविद्यते । प्रेतपदेप्रातःपदमित्याचा
**ज्ञयाज्ञवल्क्यः**—प्रभूतेविद्यमानेपिउदकेसुमनोहरे । नाल्पोदकेद्विजःस्नायान्नदीचोत्सृज्यकृत्रिमे । **वृ**
नैकहस्तेनवातथा । उद्धृताभिरपिस्नायादाहृताभिर्द्विजातिभिः । **आपस्तंबः**—सशिरोमज्जनमप्सुवर्जये
वनमितिपाठेमज्जनयोग्यजलेगात्रक्षालनंनकार्यमित्यर्थइति**हरिहरः** । **व्यासः**—नद्यांचास्तमितेसूर्येवर्जनी
नातुरोनमहानिशि । नवासोभिःसहाजस्रंनाविज्ञातेजलाशये । अत्रास्तमितशब्देनाद्ययामोनिषिद्धोमहा
**ादर्शे**तुअस्तमितपदेनसर्वरात्रिनिषेधः । महानिशानिषेधोदोषाधिक्यार्थइत्युक्तम् । नैमित्तिकंतुस्नानंरात्र्या

ुकर्तव्यंस्नानंदानंचरात्रिन्विततिवचनात् । हेमाद्रौभविष्ये—नस्नायादुत्सवेऽतीतेमंगलंविनिवर्त्य च । अनुव्रज्य गु
। अत्रशीतलजलस्नानमेवनिषिद्धमितिशिष्टाः । स्नानमात्रमितितुयुक्तम् । तत्रैव—मंगलेविष्वनेस्नानं वृद्धौगर्वात्
त्कमध्याह्वात्प्राग्विशेषतः । अयपूर्वोक्तप्रतिप्रसवइतिहेमाद्रिः । आर्द्रस्नानंविवर्जनेनिशुक्लपतीमः । योगयाज्ञव
ंतमातापित्रोस्तुजीवतोः । स्नानकुर्वन्निराचरेपिनोक्तनिवीनिति । मातापित्रोरितिमाङ्गिनिक्षितमितिपृथ्वीचंद्रः
तिपारिजातः । दर्शपयुक्तस्नानपरमितिटोडरानंदः । मत्तगर्गः—त्रयोदश्यातृतीयायांदशम्यांचैवसर्वदा । अ
येयुःकथवचनेति तन्निरर्तनैमित्तिकान्यपरम् । यादृन्तिकतुयत्स्नानभोगार्थंक्रियतेद्विजैः । तन्निषिद्धंदशम्यादौनित्यनैमि
कृरितिमदनपारिजातः—अभ्यवगाहनस्नानविहितंमार्गवर्णिकमितिवचनोक्तस्नाननिषेधउनिकल्पतरुः । गगः
विकल्पापत्तेरितिटोडरानंदः । गर्गपैठीनसिमिश्राः—पुत्रजन्मनिमकानौश्राद्धेजन्मदिनेतथा । नित्यस्नानं
धते । अपरार्केत्राह्मे—स्नानमकमणंस्नप्रदिग्वामानममाचरेत् । व्यासः—नादशाकेनवस्त्रेणस्नायात्कौपीन
नसूत्याग्रथितेनच । अत्रेतरकर्मवद्धवद्वयधारणनियमितमिति कल्पतरुः । मेधातिथिस्तु—एकेनवासगास्नाया
वहुभि अप्रतिपेवस्तुस्नानेफलमभीप्सितमित्याह । अपरार्कस्तु—अस्पृश्यस्पर्शनेचैववार्तायांपुत्रजन्मनि । तीर्थेद्विवाम
त्याह । वार्ता मरणवार्ता । सदोपवीतिनाभाव्यमदाबद्धशिखेनचेतिवाक्येनत्र द्विशिखित्वयज्ञोपवीतित्वयोःसर्वदाप्राप्तौ
खियज्ञोपवीतीतिकात्यायनोक्तिःशिखाभिन्नकेशवद्योत्तरीयनिवृत्त्यर्थेतिहरिहरः । तत्र । अनेनैवमिद्धावेकवस्त्रा

---

द्वैतास्नाइतिपाठ ।

क्तिवैयर्थ्यापत्तेः । यत्त्वेतन्नैमित्तिकस्नानांतरेद्विवस्त्रताज्ञापकमितिनैतज्ज्ञापकायत्तंकिंतुवाचनिकं वांतरादनादा
तस्नानंविनाक्वचिदितिवृद्धवसिष्ठोक्तेश्च । अतएवाचारादर्शेऽस्यानुवादत्वान्नोत्तरीयादिनिवृत्तिरित्युक्त
स्त्रोऽहरहराप्लुत्येतिशांखायनसूत्रेसवस्त्रग्रहणंद्वितीयवस्त्रप्राप्त्यर्थमित्याह । हेमाद्रौशौनकः—तथा
जपार्थमक्षमालांचरुद्राक्षादिविनिर्मिताम् । एवंसभृतसंभारःस्नानकर्मसमाचरेत् । अभ्युक्षणं जलम् । औदुंब
—मृद्गोमयतिलान्दर्भान्पुष्पाणिसुरभीणिच । आहरेत्स्नानकालेतुस्नानार्थंप्रयतःशुचिः । इदंकातीयानांप्रातर्म
चपरिशिष्टे—प्रातर्गोमयेनकुर्यान्मृदामध्यंदिनेशुद्धाभिरद्भिःसायमिति । स्मृतिसारे—जलांतेतिलदर्भ
नफलंतस्यदातुरेवहितत्फलम् । वामने—निषिच्यतीरेकुशपिंजुलानिपूर्वोत्तराग्राणिमृदंन्यसेच्च । प्रक्षाल्य
पिबेत्त्रिः । यज्ञोपवीतंकंठेकृत्वात्रिःप्रक्षाल्येत्यन्वयः । पादप्रक्षालनमलस्नानेबहिःकार्ये । जलंदेवगृहंचैवशयनं
स्नानिर्णिक्तःकथंचनेतिव्यासोक्तेः ।—मलस्नानंबहिःकृत्वाआचम्यप्राङ्मुखःस्थितः । प्राणायामांस्ततः
कार्यंयमोक्तेश्च । वामने—कराभ्यांधारयेद्दर्भान्शिखाबंधंविधायच । प्राणायामंतथाकुर्यादितिव्या
धीयाच्छिखांततः । षट्त्रिंशन्मते—शिखाबंधस्तुगायत्र्यानैर्ऋत्याब्रह्मरंध्रतः । विष्णुः—संकल्पपूर्वं
—तिथिवारादिकंज्ञात्वासुसंकल्प्ययथाविधि । स्नायादितिशेषः । व्यासः—स्रोतसोऽभिमुखःस्नायान्मार्ज
प्राङ्मुखोऽग्निमुखोऽपिवा । संध्यामुखस्तुसंध्यायांतथाचाद्यंतयामयोः । स्रोतोभिमुखत्वंबह्वृचपरम् । स्रो
त्याभिमुखइतिबह्वृचपरिशिष्टात् । कातीयतैत्तिरीयादीनांसर्वत्रार्काभिमुखंस्नानम् । आचारदर्पणेप्ये

हाभिमुखंस्नानंनद्यादावित्युपक्रम्य सूर्याभिमुखोमज्जेदितिसामान्येन**कात्यायनोक्ते**रितिह**रिहरः** । अघमर्षणादिस
ंगुष्ठांगुलीभिस्तुश्रोत्रदृङ्नासिकामुखम् । पिधायांतःप्रतिस्रोतस्त्रिर्जपेदघमर्षणमिति**व्याससमृतेः** । **आश्वलायन**
यत्रापिमुखंरवेः । एतद्बह्वृचपरम् । अन्येषांतु**वृद्धयाज्ञवल्क्यः**—स्थावरेषुगृहेचैवसूर्यसंमुखमाप्लवेत् । **जीवत्पितृ**
लेगत्वाकृत्वाकेशान्द्विधाद्विजः । जीवत्पितानकुर्वीतदक्षिणेकेशसंचयम् । **वृद्धपराशरः**—निरुध्यकर्णौनासांचा
षणभट्टीये**विश्वामित्रः**—नाभिमात्रेजलेतिष्ठन्ससद्वादशपंचवा । त्रिवारंवापिचाप्लुत्यस्नानमेवविधीयते । **हेमा**
रुक्षेत्रंप्रयागोदधिसंगमम् । तीर्थान्येतानिसस्मृत्यततोमज्जेज्जलाशये । **तत्रैवव्यासः**—कुरुक्षेत्रंगयांगंगांप्रभासंनैमिषं
णिस्नानकालेभवंतुमे । **तत्रैवगंगावाक्यम्**—नंदिनीनलिनीसीतामालतीचमलापहा । विष्णुपादाब्जसंभूतागंगा
भोगवतीजाह्नवीत्रिदशेश्वरी । द्वादशैतानिनामानियत्रयत्रजलाशये । स्नानोद्यतःस्मरेन्नित्यंतस्यतत्रभवाम्यहम् । तीर्थ
दींब्रूयात्पर्वतेषुनपर्वतम् । नान्यांप्रशंसेत्तत्रस्थस्तीर्थेष्वायतनेषुचेति**चंद्रोदयेदेवलोक्तेः** । गंगादिपुण्यतीर्थानिकृत्रि
**ारोक्तेश्च** गयादिस्मृतिःसंनिहिततीर्थाभावे । गंगायास्तुसर्वत्र । यत्रस्थानेतुयत्तीर्थंनदीपुण्यतमाचया । तांध्यायन्मन
नमितिहे**माद्रौभृगूक्तेः** । अन्यत्रउद्धृतजलेइति**टोडरानंदः** । स्नानकालेन्यतीर्थेषुजप्यतेजाह्नवीजनैः । विनावि
शोधनइति**निर्णयामृतेस्कांदाच** । **प्रतापमार्तंडेप्येवम्** ॥ ॥
**ापरिशिष्टोक्तःस्नानविधिः** । गोमयंत्वंतरिक्षस्थंसंगृह्य भूमिष्ठचोपर्यधश्चसंत्यज्य धौतपादपाणिमुखआचम्य संक

वरेषुतडागादिषु । २ स्नानयुक्त सरेन्नित्यंतत्रतत्रवसेद्बिसाइतिपाठ ।

द्विराचम्यसंयतप्राणःकर्मसंकल्प्य गोमयंवीक्षितमादाय सव्येपाणौकृत्वा व्याहृतिभिस्त्रिधाविभज्य दक्षिणंभागं
ना मध्यमंमानस्तोकइत्यृचाभिमंत्र्य गंधद्वारामित्यृचामूर्धादिसर्वांगमालिप्यप्रांजलिर्वरुणमवतेहेळइतिद्वाभ्यां प्र
गंवरुणंप्रपद्येतीर्थंमेदेहियाचतः । यन्मयाभुक्तमसाधूनांपापेभ्यश्चप्रतिग्रहः । यन्मेमनसावाचाकर्मणावादुष्कृतं
पविताचपुनंतुपुनःपुनरितिद्वाभ्यांचप्रार्थ्य । याःप्रवतइतितीर्थमभिमृश्यावगाह्यस्नातोद्विराचम्य मार्जयेदंबयोयं
रथतीर्थमंगुष्ठेनेमंमेगंगइतित्रिःप्रदक्षिणमालोड्यप्रकाशपृष्ठमग्नोऽघमर्षणंत्रिरावर्त्यनिमज्ज्योन्मज्ज्यादित्यमालोक्य
निमुद्र्योदकमादाय मूर्ध्निमुखेबाह्वोरुरसिचात्मानंगायत्र्याभिषिच्य त्वंनोअग्नेवरुणस्येतिद्वाभ्यां तरत्समंदीध
भिर्षिंचेत्तद्विष्णोरक्षाणोअग्नेयत्किंचेदमित्येताजपेत् ।साक्षताभिरद्भिःप्राङ्मुखउपवीतीदेवतीर्थेनव्याहृतिभिर्व्यस्त
र्पयित्वोदङ्मुखोनिवीतीसयवाभिरद्भिःप्राजापत्येनतीर्थेनऋषीन्व्याहृतिभिर्द्विर्द्विस्तर्पयित्वा दक्षिणामुखःप्राचं
र्याहृतिभिर्भूरित्यादित्रिस्त्रिस्तर्पयेदथतीरमेत्यदक्षिणामुखःप्राचीनावीतीयेकेचास्मदितिवस्त्रंनिष्पीड्योपवीत्यपउ
ाय द्वितीयंप्रोक्षितंप्रावृत्याचामेदथसंध्यामुपासीतेति ॥ ॥ **शंखमुद्रालक्षणमागमे**—वामांगुष्ठंतुसं
ानंततोमुष्टिमंगुष्ठंतुप्रसारयेत् । वामांगुल्यस्तथाश्लिष्टाःसंयुक्ताःसुप्रसारिताः । दक्षिणांगुष्ठसस्पृष्टाःशंखमुद्रेय
व—मिथःकनिष्ठिकेबध्वातर्जनीभ्यामनामिके । अनामिकोर्ध्वसंश्लिष्टेदीर्घमध्यमयोरधः । अंगुष्ठाग्रद्वयंन्य
स्नानविधिर्बह्वृचानाम् । कातीयानांतुमध्याह्नस्नानविधिरेव ॥ ॥ प्रातःस्नाने**योगयाज्ञवल्क्यः**—य
: । असामर्थ्यान्नकुर्याच्चेत्तत्रायंविधिरुच्यते । स्नानमंतर्जलेचैवमार्जनाचमनेतथा । जलाभिमंत्रणंचैवतीर्थं

सूक्तेनत्रिरावृत्तेननित्यशः । स्नानाचरणमित्येतदुपदिष्टंमहात्मभिः । अन्यांश्चवारुणान्मंत्रान्कामतःसंप्रयोजयेत् ।
[स्नानेपि । **मार्कंडेये**—मातरंपितरंजायांभ्रातरंसुहृदंगुरुम् । यमुद्दिश्यनिमज्जेतअष्टमांशंलभेतसः । **चंद्रिका**
—निमज्जयेत्तुयमुद्दिश्यद्वादशांशंलभेतसइत्युक्तम् । **पैठीनसिः**—प्रतिकृतिंकुशमयीतीर्थवारिणिमज्जयेत् । कुशोसि
रा । त्वयिस्नातेपिसस्नातोयस्येदंग्रथिबंधनम् । अत्रपूर्ववाक्येनिमज्जेतेतिश्रुतेर्मज्जनरूपंस्नानंजीवत्प्रतिनिधित्वेनस्नाने
तेनिविल्वेनस्नानेइति**प्रयोगपारिजातः** । स्नानोत्तरंतदंगतर्पणंकुर्यात् । स्नानादनंतरतावत्तर्पयेत्पितृदेवताः । उ
तःपरमिति**चतुर्विंशतिमतात्** । स्नानेषुचैवसर्वेषुतर्पयेत्पितृदेवताः । काम्येनित्येविशेषेणतत्प्रकुर्यात्प्रयत्नतइतिच
। **चंद्रोदयेब्रह्मांडे**—नित्यंनैमित्तिकंकाम्यंत्रिविधंस्नानमुच्यते । तर्पणंतुभवेत्तस्यतदंगत्वेनकीर्तितम् । **अस्पृ**
नेतु—अस्पृश्यस्पर्शनेवांतेअश्रुपातेक्षुरेभगे । स्नानंनैमित्तिकंज्ञेयंदैवपित्र्यविवर्जितमिति**पराशरोक्तेर्**नतर्पणमित
**आचारचिंतामणौवाचस्पतिमिश्रैः** । स्नानांगतर्पणंविद्वान्कदाचिन्नैवहापयेदितिहे**माद्रौब्रह्मवैवर्ता**च
त्यर्थ**सारे**प्येवम् । **माधवीयेयमः**—द्वौहस्तौयुग्मतःकृत्वापूरयेदुदकांजलिम् । गोशृंगमात्रमुद्धृत्यजलमध्येजल
—प्रादेशमात्रमुद्धृत्यसलिलंप्राङ्मुखःसुरान् । उदङ्मनुष्यांस्तर्पेतपितॄन्दक्षिणतस्तथा । **बौधायनः**—अनुत्तीर्यम
। तत्प्रकारः**पृथ्वीचंद्रोदये**—भूर्देवांस्तर्पयामि । भुवर्देवांस्तर्पयामि । स्वर्देवांस्तर्पयामि । भूर्भुवःस्वर्देवांस्त

---

लायनानासूत्रेस्यस्तुल्यभावादंजलिनैवदान । सूत्रोक्तब्रह्मयज्ञांगस्वपितृतर्पणतद्दक्षिणेनैवकार्यं । सूत्रेअजलिचोदनाभावात् । अनादेशेदक्षिण
मलाकरीये ।

र्भूर्देवगणंतर्पयामि । भुवर्ऋषिगणंतर्पयामि । स्वर्मनुष्यगणंतर्पयामि । भूर्भुवःस्वःपितृगणंतर्पयामि । **कृष्णभट्ट**
न्देवांस्तर्पयापि । भूर्देवानित्यादि । निवीतीकृष्णद्वैपायनादयोयऋषयस्तानृषींस्तर्पयामि भूर्ऋषीनित्यादि । प्रा
नग्निष्वात्ताःकव्यवाहनादयोयेपितरस्तान्पितॄंस्तर्पयामि भूःपितॄनित्यादि । सनकादयोयेमनुष्यास्तान्मनुष्या
वृत्तौ । **स्मृत्यर्थसारे**चैवम् । अत्रदेवपितॄणामेवेज्यत्वात्सांगस्यचानुष्ठेयत्वाज्जीवत्पितृकस्याप्यधिकारः
कंजीवत्पितृकनिर्णयेगुरुभिः ॥ ॥ **संक्षेपातिशयमाहशंखः**—आब्रह्मस्तंबपर्यंतंजगत्तृप्यत्वितिक्रम
र्पणम् । **आचारदर्पणेस्मृतिः**—प्रातःस्नानेनकर्तव्यंकदाचित्तिलतर्पणम् । इदंचनैमित्तिकविषयमितित
र्पणेसर्वदातिलनिषेधः । प्रातःस्नानेविशेषोयंतद्विनैवतिलैर्युतम् । नैमित्तिकंचनित्यंचतिलैरेवविधीयते इतिस्मृ
ाहुः ॥ ॥ अत्रविशेषो**हेमाद्रौपाद्मे**—प्राचीनावीतसंयुक्तःकुशपाणिस्तिलैःसह । असंस्कृतप्रमीतानां
शंयाम्यांमंत्रेणानेनयत्नतः । असंस्कृतप्रमीतायेगोत्रजादुर्गतिगताः । तेषांहिदत्तमक्षय्यमिदमस्तुतिलोदकम्
जीवायेप्यदग्धाःकुलेमम । भूमौदत्तेनतोयेनतृप्तायांतुपरांगतिमिति । इदंजलस्थेनैवकार्यम् । जलार्द्रवास
निश्च्योतनंप्रेताअपवार्यपिबंतितेइति**सुमंतूक्तेः** । अपवार्यांजलिंत्यक्त्वेति**हेमाद्रिः** । **शौनकः**—स्ना
अन्यथाकुरुतेयस्तुस्नानंतस्याफलंभवेत् । **तत्रमंत्रः**—यन्मयादूषितंतोयंशारीरमलसंभवैः । तद्दोषपरिह
**ायनः**—येकेचास्मत्कुलइतिवस्त्रनिष्पीडनंस्थले । **वृद्धमनुः**—निष्पीड्यस्नानवस्त्रंतुपश्चात्संध्यांसमाचरेत

तिपाठ ।

नंतस्याफलंभवेत्। **सायणीये**—मनुष्यतर्पणेचैवस्नानवस्त्रनिपीडने। निवीतीतुभवेद्विप्रस्तथामूत्रपुरीपयोः । **आ**
कुशानांचविसर्जनम्। अपसव्येनकर्तव्यंहस्तप्रक्षालनंतथेत्युक्तम्। अतोविकल्पः। बह्वृचानांतुप्राचीनावीती । **बह्वृ**
तीवस्त्रंनिष्पीडयेदित्युक्तेः । इदंचजीवत्पितृकोनकुर्यात् । नजीवत्पितृकःकुर्याद्वस्त्रनिष्पीडनंबुधइति**जीवत्पि**
**यत्तुपराशरः**—निराशाःपितरोयांतिवस्त्रनिष्पीडनेकृते। तस्मान्नपीडयेद्वस्त्रमकृत्वापितृतर्पणमिति तद्रागप्राप्तवर
याह्नस्नाने**हेमाद्रौब्रह्मांडे**—ततःस्नात्वाविधानेनसंतर्प्यपितृदेवताः । जलाशयाद्विनिर्गत्यद्विराचामेत्समाहितः ।
मास्थलतर्पणात् । स्थलेपितर्पणकृत्वाततोवस्त्रनिपीडयेत् । एवंवस्त्रंनिष्पीड्यैकंपादंजलेऽन्यंस्थलेकृत्वाआचामेत् । उ
स्थलेशुचिः। स्नात्वाचामेत्तदाविप्रःपादौकृत्वास्थलेजलेइति**दक्षोक्तेः**॥ ॥ **तर्पणोत्तरंदर्भत्यागउक्तःस्मृतिर**
दानेचतर्पणेश्राद्धकर्मणि। आचांतस्तुप्रकुर्वीतदर्भसत्यजनबुधः। दर्भत्यागेप्राचीनावीतित्वमुक्तंप्राक् ॥ ॥ **नदीरु**
—ज्ञानतोज्ञानतोवापियन्मेदुश्चरितकृतम् । तरक्षमस्वाखिलंदेविजगन्मातर्नमोस्तुते । स्नानाकरणेप्रायश्चित्तमुक्तं
)प्रसुवसूक्तंचस्नानलोपोभवेद्यदि । **स्मृतिरत्नावल्यांतु**—स्नानलोपेगायत्र्यष्टसहस्रजपउक्तः । स्नानमकृत्वाभोज
**स्मृत्यर्थसारे** ॥ इतिश्रीमन्नारायणभट्टा०लक्ष्मणभट्टकृतावाचाररत्नेप्रातःस्नानम् ॥ ॥
**स्नानोत्तरकृत्यम्। हारीतः**—स्नात्वागात्रमवमृज्यान्नशिरोविधुनुयान्नोत्तरीयविपर्यासंकुर्यादिति । **त्रिकां**
ध्यांपादत्राणंचमार्जनीम् । स्नानांतेसंस्पृशेद्यस्तुपुनःस्नानेनशुद्ध्यति । **विष्णुः**—नतैलवसेस्पृशेन्नपूर्वंधृतमक्षालि

र्जनइतिपाठ ।

ौतवाससीबिभृयात्  म्लेच्छांत्यजपतितैर्नसंभाषेतइति । उष्णीषंकेशजलापकर्षणार्थवस्त्रमितिपृथ्वीचंद्रः
ग्रहणम् । केचित्तुसोष्णीषवासोधारणानुवादेनधौतत्वविधानात्कर्मकालंविनास्नानोत्तरमपिधौतप्रसिद्धोष्णीषधा
वश्मश्रुषुकेशेषुयज्जलंदेहलोमसु । हस्ताभ्यांतन्नवस्त्रेणजलंविद्वान्विमार्जयेदिति शिरोमार्जनवस्त्रनिषेधादित्याहुः
त्तरीयेणचाशिरइतिव्यासवचनैकवाक्यतयास्नानवस्त्रद्वयस्यैवनिषेधः । अतएवस्नातोनांगानिमृज्याच्चस्नान
त् । मार्जननिषेधएतत्परइतिपारिजातस्मृत्यर्थसाराचारादर्शाः । नांगेभ्यस्तोयमुद्धरेदितिवस्त्रनि
यार्थइतिटोडरानंदः । समर्थस्यमार्जनाभावोऽसमर्थस्यपाणिशाटीमार्जनाभावइतिहरिहरः । चंद्रो
ाचीनावितिनाद्विजः । यावत्स्रवतिदेहांबुतूष्णीभूतादितृप्तये । सुराबिंदुसमाज्ञेयाःपृष्ठतःकेशबिंदवः । 
। तिस्रःकोट्योर्धकोटीचयानिरोमाणिमानवे । स्रवतिसर्वतीर्थानितस्मान्नपरिमार्जयेत् । देवलः—देवाःपि
यक्षसोपिचगंधर्वाअधस्तात्सर्वजंतवः । अंगानिशक्तौवस्त्रेणपाणिनाचनमार्जयेत् । धौतांबरेणवाप्रोंच्छ्यविभृया
नकालपर्यंतंतथैवतिष्ठेदित्याचारदर्पणः । हेमाद्रौभरद्वाजः—वस्त्रोदकमपेक्षंतेयेमृतादासवर्गिणः । 
तयेत् । तदुत्तरमपिमार्जनंकार्यंशक्तेन । आर्द्रएवतुवासांसिस्नात्वासेवेतमानवइतिविष्णूक्तेः । कृष्णभट्ट
प्रोक्षितंवस्त्रमावहेत् । योगयाज्ञवल्क्यः—स्नात्वैवंवाससीधौतेअक्लिन्नेपरिधायच । प्रक्षाल्योरूमृदाद्भि
ठः—स्नात्वानिवस्यवसनंजंघेशोध्येमृदंभसा । अपवित्रीकृतेतेहिकौपीनस्नानवारिणा । कौपीनपदोपादान
पारिजातेभरद्वाजः—शुचीवोहव्यामरुतइत्युक्त्वाशुद्धमंवरम् । संप्रोक्ष्यदेवस्यत्वेतिव्याहृत्यादाय

दसमित्युक्त्वालोकयेत्ततः । आवहंतीत्युदाहृत्यपरिधायद्विराचमेत् । **भृगुः**—ब्राह्मणस्यसितंवस्त्रंनृपस्यरक्तमुल्बण
लंमलवदिष्यते । उल्बणरक्तम् । मलवत्कृष्णमितिपृथ्वीचंद्रः । **यच्चुनारसिंहे**—नरक्तमुल्बणंवासोननीलंचप्र
नंवर्जयेदंबरवुधइतिरक्तनीलवस्त्रयोर्निषेध.सपूर्ववाक्यात्क्षत्रियशूद्रभिन्नविषयः । **व्यासः**—नाग्निदीप्तेननार्द्रेणनर
ठितंभिन्नमलिनकेशदूषितम् । छिन्नाग्रंचोपवस्त्रंचकुत्सितधर्मतोविदुः । **भारते**—वस्त्र नान्यावृतंग्राह्यंनचातिवि
ल्क्यः—दग्धंजीर्णंचमलिनमूषकोपहततथा । खादितगोमहिष्याद्यैस्तत्त्याज्यंसर्वथाद्विजै. । **प्रयोगपारिजाते**
खांतुऊर्ध्वमुत्तारयेद्बुध. । आर्द्रवस्त्रमधस्तान्नेत्पुनःस्नानेनशुद्ध्यति । **तत्रैवोशना**—स्नात्वानुपहतवस्त्रंपरिदध्याद्य
ासंप्रोक्ष्यप्रणवेनतु । अनुपहतअपरिहितम् । **जाबालिः**—नार्द्रमेकचवस्त्रमनपरिदध्यात्कथचन । **स्मृतिरत्नावल्या**
ास्तुयत्कुर्याज्जपहोमव्रतादिकम् । सर्वंतद्राक्षसंविद्याद्बहिर्जानुचयत्कृतम् । सप्तवाताहतवस्त्रंशुष्कवत्प्रतिपादितम् ।
दतंगौतमादिभिः । **कृष्णभट्टीये**—ईषद्धौतस्त्रियाधौतशूद्रधौतंतथैवच । अधौतंतत्त्वविज्ञेयशुक्रदक्षिणपल्लवैः । दे
याःक्रियाधर्म्याविपश्चिता । नतुनेजकधौतेननाहतेनाचकुत्रचित् । नाहतेनेत्येकंपदम् । स्वयग्रहणादेवनेजकनिवृत्तेस्तु
दिनाधौतेनक्रियाकार्येत्येतदर्थम् । **अहतलक्षणमाहपुलस्त्यः**—ईषद्धौतंनवश्वेतंसदशयन्नधारितम् । अहततद्वि
म् । **ब्राह्मे**—अच्छिन्नाग्रचयद्वस्त्रंमृदाप्रक्षालितचयत् । अहतधातुरक्तवातत्पवित्रमितिस्थितिः । **माधवीयेप्रज**

---

नकृत्वाचार्द्रवस्त्रस्त्यजेन्नयामभोद्विज । गृहेस्नानमथोकुर्यान्निमज्जेगन्तुनैत । नस्कार्यंपरिधायार्द्रंस्नानयागनाक्षिपेत् । गृहेत् वैमार
च ।

सिदशंतथा । काषायंधातुरक्तंवानोल्बणंतत्तुकार्हिचित् । **भृगुः**—दिवाकीर्तिकृतंवासःसर्वदापरिवर्जयेत् ।
रतस्तद्विवर्जयेत् । स्त्रीणांक्रीडार्थसंयोगेशयनीयेनदुष्यति । **अंगिराः**—मृतेभर्तरियानारीनीलीवस्त्रंप्रधारये
नंतरम् । **चंद्रोदयेस्कांदे**—स्नानंदानंजपोहोमःस्वाध्यायःपितृतर्पणम् । वृथातस्यमहायज्ञानीलीवासोविभ
नीलीरक्तंयदावस्त्रंविप्रस्त्वंगेषुधारयेत् । अहोरात्रोषितोभूत्वापंचगव्येनशुध्यति । **मिताक्षरायांमार्कं**
ास्तुकस्यचित् । त्रिवर्णेषुचसामान्यात्तप्तकृच्छ्रंविशोधनम् । नीलीदोषःकार्पासेएव । ऊर्णायांपट्टवस्त्रेवानी
**रायणदासनिबंधेभृगुः**—स्त्रीधृताशयनेनीलीब्राह्मणस्यनदुष्यति । नृपस्यवृद्धौवैश्यस्यपर्वण्येवविधारण
गग्रंवाधौतंवस्त्रंप्रसारयेत् । पश्चिमाग्रंदक्षिणाग्रंपुनःप्रक्षालनाच्छुचि । **योगयाज्ञवल्क्यः**—अभावेधौ
तपयोगपट्टंवाद्विवासायेनवाभवेत् । क्षौममतसीसूत्रकृतम् । कुतपोनेपालकंबलः । धौतेतिविशेषणपदा
। द्विवासेतिपदोपादानाच्चोत्तरीयत्वेनैवशाणादीनांग्रहणं नतुपरिधानीयत्वेनेत्युक्त**मपरार्के** । **अन्य**
शंसितम् । क्षौमंवाकुतपंवापिनकौशेयंकदाचनेति**जातूकर्ण्योक्तेः**क्षौमाजिनयोःपरिधानीयत्वमप्याहुः ।
—क्षौमाणिवासांसितेषामलाभेकार्पासिकान्यौर्णकानिभवंतीति तच्छ्राद्धेदेयवस्त्रपरम् । **स्मृत्यर्थसारे**—केश
**ासः**—नोत्तरीयमधःकुर्यान्नोर्ध्वनाधस्तनांबरम् । नांतर्वासोविधायान्यद्वसीतवसनंबुध ॥ ॥ **उत्तर**
रिमंडलमुत्तरीयंकुर्याद्वस्त्रोत्तरीयात्वेकांगुलंद्व्यंगुलंत्र्यंगुलंचतुरंगुलंवासूत्रैरेवकृतंपरिमंडलमुत्तरीयंकुर्यादिति ।
**ातेसंग्रहे**—षोडशद्वादशाष्टाभिरंगुलैर्विस्तृतंचयत् । आयतंव्याममात्रंचतदंतर्वासईरितम् । उत्तरीयांत

भेदइत्यन्ये । उत्तरीयार्थेयज्ञोपवीतंवेत्युक्तम् । परिहितवस्त्रस्यचोर्ध्वभागमुत्तरीयंकुर्यात् । एकंचेत्तस्योत्तरवर्गेणप्र
ः । उत्तरीयंचपुरोदेशावस्थितदशंनधारयेत् । प्रागग्रंचोत्तरीयंतुकर्मकालेनधारयेदितिपृथ्वीचंद्रोक्तेः । उत्तरं
तपितृकोनधारयेत् ।—उत्तरीयंयोगपट्टंतर्जन्यांरजतंतथा । नजीवत्पितृकैर्धार्यंज्येष्ठोवाविद्यतेयदीतिचंद्रोदयेसंग्र
ासोमात्रं कितुसग्रंथिपरिमंडलमित्यादिजातूकर्ण्योक्तं । उक्तपरिवासस्तुतस्यापिभवत्येव ।—एकवस्त्रोनभुंजी
चार्चयेद्विजान्नान्यत्कुर्यादेवंविधोनरइतिगोभिलेननिषेधात् । नन्वेकवस्त्रइत्यस्यसामान्यरूपत्वाज्जीवत्पितृकस्य
। उत्तरीयशब्दस्ययौगिकत्वेपिजातूकर्ण्योक्तोत्तरीयेरूढेरितिपितृचरणाः । वर्धमानपरिभाषायांशात
ष्टकटिदेशधृतांबरम् । एकवस्त्रंविजानीयाद्दैवेपित्र्येचकर्मणि । बौधायनः—अकच्छ.पुच्छकच्छोवाविकच्छः[3]कटिवे
च्छूद्रएवनसंशयः । पुच्छकच्छःपुच्छाकारकच्छः । सचाग्रद्वयस्यमेलनेनैकस्यैवाग्रस्यकच्छत्वेनभवतीतिद्वयमपिनिषि
वावच्छेदकत्वेसर्वस्यापितत्त्वापत्तेः । अकच्छत्वादिविशिष्टस्यतत्त्वेवैपरीत्येवागारवैम् । अतोऽकच्छत्वादेवोद्देश्यत्व
यकः । नचद्विजपदश्रुतेःशूद्रस्यशूद्रतुल्यत्वानुपपत्तेःकच्छइतियुक्तम् । द्विजत्वस्याविवक्षितत्वात् । तद्ग्रहणतुकैमुतिक
ं अकच्छस्यनग्नत्वोक्तिश्च । श्राद्धहेमाद्रौ—नग्नःस्यान्मलवद्वासानग्नःकौशेयकेवलः । नग्नोद्विगुणवस्त्रःस्यान्नग्नं
तवासाःस्यान्नग्नःकौपीनकेवलः । नग्नःकाषायवस्त्रःस्यान्नग्नश्चार्धपटावृत । विकच्छोऽनुत्तरीयश्चद्विकच्छोऽवस्त्रएव
ःरजकादिधौतवस्त्रोवा । एकस्यपटस्यार्धप्रावृण्वानोऽर्धपटावृतः खंडपटंवसानोवा । परिहितवस्त्रोपरितदुत्तरार्धेनवस्त्रां

---

ीतंवायुक्तमितिपाठ २ वासस्यापिभवत्येवेतिपाठ । ३ विकच्छोविपरीतकच्छ ।

अन्नमलवन्निषेधःसमर्थपरः । नजीर्णमलवद्वासाभवेच्चविभवेसतीतियाज्ञवल्क्योक्तेः । वस्तुतस्तुनग्नःस्यान्न
नग्नःकर्मकुर्वीतेत्यनेनैकवाक्यत्वाच्चानग्नेनग्नत्वोक्तेःकर्मकालपरत्वादस्यपुरुषार्थत्वाद्भिन्नवाक्यमेवयुक्तमितिहेमा
केः वासःसहितकौशेयत्वेननग्नत्वम् । **भृगुः**—नग्नोमलिनवस्त्रःस्यान्नग्नश्चार्द्रपटावृतः । नग्नोरक्तपटस्तथेति
र्वकर्मस्वासुरकच्छानिषेधमाह**याज्ञवल्क्यः**—जपेहोमेतथादानेदैवेपित्र्येचकर्मणि । बध्नीयान्नासुरीकच्छांशेषे
—परिधानाद्बहिःकच्छानिबद्धाह्यासुरीमता । बहिःकच्छातुसंवृतपरिधानवस्त्रांतइति**वर्धमानः** । **स्मृत्यं**
न्नदशंतथा । नित्येनैमित्तिकेवापिप्रयत्नेनविवर्जयेत् । अकृत्रिमदशंवस्त्रंप्रशस्तंसर्वकर्मसु । **कृष्णभ**
नुमूलंतुवस्त्रंस्यात्रिकच्छंधारयेद्बुधः । **मनुः**—नाभौचवामकुक्षौचपृष्ठेचैवयथाक्रमम् । वस्त्रप्रावरणंयत्स्यात्तत्त्रि
देवभवेद्वासःशयनीयेनराधिप । अन्यद्रथ्यासुदेवानामर्चायामन्यदेवहि । अन्यच्चलोकयात्रायामन्यदीश्वरदर्शं
नेभोजनेचान्यदेवहि । इतिश्रीमन्नारायणभट्टा०लक्ष्मणभट्टकृतावाचाररत्नेस्नानोत्तरकृत्यम् ॥
विचारः । **विष्णुस्मृतौबृहन्नारदीयेच**—यागोदानंजपोहोमःस्वाध्यायःपितृतर्पणम् । भस्मीभव
**द्धेकार्तिकमाहात्म्ये**प्येवम् । इदंयागादिसर्वकर्मोपलक्षणार्थनपरिसंख्यार्थम् । उत्तरार्धेसर्वपदश्रुतेः ।
। यच्चशून्यललाटेनतदल्पफलंभवेदित्या**श्वलायनोक्तेः** । यद्यपिसत्यंशौचमित्यादित्रिपुंड्रेपिवाक्यंतथ
जःकुर्यात्क्षत्रियस्तुत्रिपुंड्रकमिति**माधवीयेविष्णुधर्मोत्तरात्** । **माधवचंद्रिकास्मृत्यर्थसारादि**

---

ठ ।

नचकालाग्निरुद्रोपनिपद्युक्तत्वाद्बलवत्त्रिपुंड्रत्वम्। श्रुतौहिभस्म
खंडेसप्तर्षिवर्णनेऊर्ध्वपुंड्रांकितालिकाइत्युक्तेश्च। यद्यपिकर्मांगंतथापिशैवकर्मपरम्। —विनाभस्मत्रिपुंड्रेणविनारुद्रा
वेनकर्मांगत्वेनवा। तच्चस्नानत्वेनाप्युपपन्नम्। सितेनभस्मनातिर्यक्त्रिपुंड्रस्तुधारणम्। शैवागमेषु निष्ठानांतत्त
त्वोनस्यात्तस्यफलप्रदइतितिथितत्त्वेलैंगात्। —स्नात्वापुंड्रमृदाकुर्याद्धुत्वाचैवतुभस्मनेत्याश्वलायनोक्तेः। तयोर
त्नावल्यांवचनाच्च। साग्निकपरत्वातत्। ऊर्ध्वपुंड्रंविनामोहाद्यदिकुर्यात्त्रिपुंड्रकम्। नतस्यफलमाप्नोतिदानस्याश्रोत्रियेयथेतिस्मृतिरत्न
राहिताना‌हितानाम्न्योः। ऊर्ध्वपुंड्रेत्रिपुंड्र्यःकरोतिसनराधमः। मुक्त्वाविष्णुगृहंपुण्यसयातिनरकंध्रुवमितितद्वस
तुपाद्मेकार्तिकमाहात्म्ये—ऊर्ध्वपुंड्रेत्रिपुंड्र्यःकरोतिसनराधमः। तदधिकारिणिक्षत्रियेतन्निषेधचा
वैयर्थ्यापत्तेः। यद्वाशुद्धतांत्रिकपरम्। नचश्राद्धेत्रिपुंड्रनिषेधानुपपत्तेस्तत्प्राप्तिः। सिंधुतीरेचवल्मीकेतुलसीमूलसंस्थिताः। मृ
वोपपत्तेश्च। माधवीयेब्राह्मे—पर्वताग्रेनदीतीरेममक्षेत्रेविशेषतः। कालीयकंचंदनंचपद्मकंरक्तचदनम्
प्रमृत्तिकाः। चंद्रोदयेगोभिलः—गोरोचनंपचगव्यंपचांगत्रिल्ववृक्षतः। पचांगंमूलत्वक्पत्रपुष्पफलानि। कालीयकं
वेतापीतारुणाचमृत्। पुण्यक्षेत्रोद्भवाग्राह्यानदनद्योस्तुशर्कराः। सत्यतपाः—गोमतीतीरसं
—जाह्नवीतीरसंभूतांमृदंमूर्ध्नाविभर्तियः। विभर्तिरूपंसोऽर्कस्यतमोनाशायकेवलम्। धारयेन्नित्यमेवहिपाप
। मृदंमूर्ध्नावहेद्यस्तुसर्वपापैःप्रमुच्यते। माधवीये—द्वारवत्युद्भवाद्गोपीचंदनादूर्ध्वपुंड्रकम्। चंद्रोदयेब्रह्मांडे—जलेनतिलकंस
मृत्तिकाचंदनभस्मतोयचैवचतुर्थकम्। एभिर्द्रव्यैर्यथाकालमूर्ध्वपुंड्रभवेत्सदा। वस्त्रपरिधानोत्तरमपिद्रव्यांतराभावइतिचंद्रोदयः
तोयेनतिलकंस्नानोत्तरमावस्त्रपरिधानादितिपंचायतनसारः।

ंमृदाकुर्याद्धुत्वाचैवतुभस्मना । देवानभ्यर्च्यगंधेनसर्वपापापनुत्तये । तत्रविशेषमाह**व्यासः**—ऊर्ध्वपुंड्रं
नेनोभयंकुर्यान्नतिर्यग्गोपिचंदनम् । **चतुर्विंशतिमते**—येषुदेशेषुयेविप्रादेवास्तीर्थानिमृत्तिकाः । तत्र
**तिलककरणेविशेषोब्रह्मांडे**—अंगुष्ठःपुष्टिदःप्रोक्तोमध्यमायुष्करीभवेत् । अनामिकान्नदानित्यंमुक्ति
यन्ननखैःस्पृशेत् । **तिलकप्रमाणंब्रह्मांडेसत्यव्रतस्मृतौच**—दशांगुलप्रमाणंतुउत्तमोत्तममुच्यते ।
म् । सप्तषट्पंचभिःपुंड्रंमध्यमत्रिविधंस्मृतम् । चतुस्त्र्यंगुलैःपुंड्रंकनिष्ठंत्रिविधंभवेत् । **तिलकाकृति**
तिवापिवेणुपत्राकृतिंतथा । पद्मस्यमुकुलाकारंतथैवकुमुदस्यच । मत्स्यकूर्माकृतिंवापिशंखाकारमथापिवा ।
बाह्वोश्चदंडवत्कर्णपल्लवे । हृदयेकमलाकारमुदरेदीपवल्लिखेत् । वेणुपत्रसमाकारंबाह्वोर्मध्येलिखेत्सुधीः ।
। निटिलेललाटे । **यत्तुपंचायतनसारेपाद्मे**—नासामूलंसमारभ्यललाटांतंलिखेन्मृदा । मध्येछिद्रंप्र
मूलंसृग्यम् । अत्रकश्चित्—वीक्ष्यादर्शेजलेवापियोविदध्यात्प्रयत्नतः । ऊर्ध्वपुंड्रंमहाभागसयातिपरमांगति
द्ध्वोर्ध्वपुंड्रंकुर्यादित्याह । तन्मंदम् । नपादुकास्थोनादर्शेनजलेत्ववलोकयन्निति**कृष्णभट्टीये**—तिलक
च्छायास्वांदृष्ट्वांबुगतांजपेदिति**याज्ञवल्क्येन**जलेस्वप्रतिबिंबदर्शनेप्रायश्चित्तोक्तेश्च वाक्यस्य**चंद्रिका**
**रत्नावल्यांपृथ्वीचंद्रेचब्राह्मे**—सदर्भेणतुहस्तेनयःकुर्यात्तिलकंबुधः । आचम्यसविशुद्ध्येतदर्भत्या
ार्यविधिनाधारयेदूर्ध्वपुंड्रकम् । ललाटेकेशवंविद्यान्नारायणमथोदरे । माधवंहृदयेन्यस्येद्गोविंदंकंठकूपके

ुजेमधुसूदनम् । त्रिविक्रमंकर्णमूलेवामकुक्षौतुवामनम् । श्रीधरंचहृषीकेशवामयोर्बाहुकर्णयोः । पद्मनाभपृष्ठदेशेक
रेन्मूर्ध्नितिलकधारयेत्क्रमात् । केशवादिमन्त्राश्चतुर्थ्यन्तनमोन्ताद्रष्टव्याः । तिलकलापनक्रमोप्ययमितिप्रयोगपारि
—मूर्ध्निललाटेनाभौचहृदयेकण्ठकूपके । पार्श्वेबाह्वो.परगलेदक्षसव्येचपश्चिमे । स्तनयोर्मूर्तिमन्त्रेश्चस्थानेष्वेष्वद्वादि
ःभि.कृष्णेशुक्लेचेत्केशवादिभिः । कृष्णभट्टीयेप्येवम् । पंचायतनसारेपाद्मे—एवंद्वादशपुण्ड्राणिब्राह्मणःसत
ोक्तपुंड्राणिद्वेविशांस्मृते । एकंपुंड्रंचनारीणांशूद्राणांचविधीयते । ललाटेहृदिबाह्वोश्चतु.पुंड्राणिधारयेत् । ल
यते । मदनपारिजातेब्रह्मांडे—श्यामशांतिकरंप्रोक्तंरक्तंवश्यकरंतथा । श्रीकरंपीतमित्याहुःश्वेतंमोक्षप्रदायक
कसिंदूरादेः । पीतंगोरोचनादेः । हारीतः—अभ्यंगेमृतकेचैवविवाहेपुत्रजन्मनि । मांगल्येषुचसर्वेषुनधार्यंगोपिचं
ायांविष्णुः—ऊर्ध्वपुंड्रंद्विजातीनामग्निहोत्रसमोविधिः । श्राद्धकालेतुसंप्राप्तेकर्ताभोक्ताचवर्जयेत् । तत्रैवनारा
द्राकारमथापिवा । श्राद्धकर्तानकुर्वीतयावत्पिंडान्ननिर्वपेत् । विश्वादर्शेप्येवम् । श्राद्धदिनेतिलकनिषेधः श्रा
द्धकाशिका । तन्न । नर्जयेत्तिलकंभालेश्राद्धकालेकदाचनेतिसत्यव्रतोक्तेः । यत्तुपराशरः—ऊर्ध्वंचतिलकं
त्तर्पणादिपरम् । यत्तु—ऊर्ध्वंचतिलकंकुर्यान्नकुर्याच्चत्रिपुंड्रकम् । निराशाःपितरोयांतिदृष्ट्वाचैवत्रिपुंड्रकमि
र्पुंड्रंभवतीत्युक्तम् तद्धोक्तृपरं नकर्तृपरमितिपृथ्वीचंद्रः । निष्कर्षस्तुशिष्टाचाराद्व्यवस्था । ऊर्ध्वपुंड्रंचतुलसीश्रा
ःपरिग्राह्यस्तस्माच्छ्रेयोर्थिभिर्नरैरितिवृद्धनारदीयात् । आचारतिलके—नचोर्ध्वंधारयेद्भस्ममृदंतिर्यङ्नधार
कुमानियथेच्छया । स्मृतिरत्नावल्यां—ब्राह्मणानांनृपाणांचभस्ममिश्रंचचंदनम् । नेत्रयुग्मप्रमाणंतुत्रिपुंड्रंधार

यत्रिपुंड्रकम् । तत्रिपुंड्रंभवेच्छस्तंमहापातकनाशनम् । **केदारखंडे**—ललाटेंगुष्ठरेखाचआदौभाव्याप्रयत्न
यकेनच । एवंत्रिरेखासंयुक्तंललाटेयस्यदृश्यते । सशैवःशिववज्ज्ञेयोदर्शनात्पापनाशनः । **पुरुषार्थप्रबोधे**
प्रकीर्तितम् । श्रौतंभस्मतथास्मार्तंद्विजानामेवकीर्तितम् । औपासनसमुत्पन्नंगृहस्थानांविशेषतः । समिदग्नि
तृणांश्रोत्रियागारेपचनाग्निसमुद्भवम् । अन्येषामपिसर्वेषांधार्यंदावानलोद्भवम् । अपक्वमतिपक्वंचसंत्यज्य
भस्माधारेविनिक्षिपेत् । **चंद्रोदयेशैवे**—तर्जन्यनामिकामध्यैस्त्रिपुंड्रंतुसमाचरेत् । पंचांगुलैर्न्यसेन्
सेद्भालेशिरोमंत्रेणदेशिकः । सव्येनदक्षिणेकर्णेवामदेवेनवामतः । अघोरेणतुकंठेचमध्यांगुल्यास्पृशेद्बुधः ।
येत् । विन्यसेद्दक्षिणेबाहौशिखामंत्रेणदेशिकः । वामेबाहौन्यसेद्धीमान्कवचेनत्रियंगुलैः । मध्येनसंस्पृशेन्नाभि
**कथासारे**—भस्मनावैत्रिपुंड्रंचगृहिणांजलसंयुतम् । धार्यंत्रिपुंड्रंस्त्रीणांचयतीनांजलवर्जितम् । वनस्थब्रा
अंगुलायतंमानमपिवाधिकमानकम् । नेत्रयुग्मप्रमाणेनभालेदीप्तंत्रिपुंड्रकम् । अग्निरित्यादिभिर्मंत्रैःषड्भिराथर्व
त्यादिनाथवा । त्रैयंबकेणमंत्रेणसतारेणशिवेनच । पंचाक्षरेणमंत्रेणप्रणवेनयुतेनच । चंदनाद्युपरिप्राज्ञो
नाद्यंतुभस्मोपरिनधारयेत् । **सूतसंहितायाम्**—ऊर्ध्वपुंड्रत्रयंनित्यंधारयेद्भस्मनामृदा । ललाटेऽहर्गमेनि
स्तांत्रिकः । **धारणप्रकारेचंद्रोदयेचवाराहे**—दक्षिणेतुभुजेविप्रोबिभृयाद्वैसुदर्शनम् । सव्येतुशंखं
**देस्तुब्रह्मांडे**—चक्रंचदक्षिणेबाहौशंखंवामेपिदक्षिणे । गदांवामेगदाधस्तात्पुनश्चक्रंचधारयेत् । शंखो

पाठ ।

णे । **हलायुधे**—वामेबाहौगदांपद्मंशंखंचक्रंचदक्षिणे । उपर्यधःक्रमोक्तेनधृत्वापापक्षयोभवेत् । हृदयेबालल
मन्त्रमष्टाक्षरंवापिप्रीयतेतस्यकेशवः । **रामार्चनचंद्रिकायां**—ललाटेतुगदाधार्यामूर्ध्निचापःशरस्तथा । नदव
। **प्रयोगपारिजातेसायणीयेचशंखः**—चक्रांकितःसदातिष्ठेन्मद्भक्तःसर्वदाशुचिः । अनयोर्व्यवस्थास्तत
निष्ठानांवेदोक्तेनैववर्त्मना । ललाटेभस्मनातिर्यक्त्रिपुंड्रंधार्यमेवहि । विष्ण्वागमादितन्त्रेपुदीक्षितानांविधीयते ।
देहिनाम् । वेदमार्गैकनिष्ठस्तुमोहेनाप्यंकितोयदि । पतत्येवनसंदेहस्तथापुंड्रांतरादपि । **अत्रैपाव्यवस्था**—
तैरेवधार्या । शुद्धवैदिकेनविष्णुभक्तेनगणपत्यादिभक्तेनचतिलकोधार्यः । तांत्रिकवैदिकवैष्णवेनत्वच्छिद्रतिलक
दिकेनशैवेनविभूतिस्तिलकश्चविभूतिमात्रवाधार्यम् । शुद्धतांत्रिकेणविष्णुभक्तेनसच्छिद्रतिलकश्चक्रादिचधार्यमिति ।
ध्यंकनचगीतनृत्यादिकतथा । एकजातेरयंधर्मोनजातुस्याद्द्विजन्मनः । शखचक्रमृदायस्तुकुर्यात्तप्तायसेनवा । सश
र्मणइति । **यच्चाश्वलायनः**—यथा श्मशानजकाष्ठमनर्हंसर्वकर्मसु । तथाचक्रांकितोविप्रःसर्वकर्मसुगर्हितइति
देलिंगचिह्नतनुर्नरः । ससर्वयातनाभोगीचांडालोजन्मकोटिपु । द्विजस्तुतप्तशखादिलिंगांकिततनुर्नरः । संभाष्यरौ
बृहन्नारदीयंतच्छुद्धवैदिकपरम् । **सूतसंहितावाक्येनवैदिकस्यचक्रादिधारणनिषेधादनेनतांत्रिकस्यापितन्निषे**
त्तेः । नचतस्यशूद्रविषयत्वेनसावकाशत्वम् ।—शखवाशखचक्रेवातथापंचायुधानिवा । धारयित्वाथविप्रोवैन
**प्रसादेपाद्मेन**, ब्राह्मणःक्षत्रियोवैश्यःशूद्रोवायदिचेन्नरः । शखचक्रांकिततनुःशिरसामंजरीधरः । गोपीचंदनलि
**रीखंडेन**,दक्षिणेचभुजेविप्रोविभृयाद्वैसुदर्शनमितिचंद्रोदयेधारणप्रकाशेचवाराहेणब्राह्मणादेरपितद्विधाना

एतत्सत्रमासतेत्यादिवत्स्तुत्यर्थनविप्रादीन्प्रतिविध्यर्थमितिस्मृतिरत्नावली। तन्न। विधिश्रुतेः। तत्रतदभा
ब्राह्मणविषयत्वोक्तिरज्ञधीदंभ्रणायैव । अत्रयच्चशून्यललाटेनेतिभालेतिलकाभावेऽल्पफलश्रुतेरूर्ध्वपुंड्रंत्रिपुंड्रं
ंमानाभावाच्चललाटेएकपुंड्रंनित्यं द्वादशपुंड्राणितुकाम्यानीतिकेचित्। तन्न। कामयोगाभावात्। नचात्रविश्व
फलान्तरेविनिगमकाभावात्। अतएकंपुंड्रमदीक्षितपरं, द्वादशपुंड्राणितुमंत्रसाध्यत्वाद्दीक्षितपराणीतियुक्तंप्रती
त्याचारचंद्रोदयः। इतिश्रीमन्नारायणभट्ट०लक्ष्मणभट्टकृतावाचाररत्नेतिलकप्रकरणम्॥ ॥
निर्णयः। स्कांदे—उदयात्प्राक्तनीसंध्याघटिकात्रयमुच्यते। सायंसंध्यात्रिघटिकाअस्तादुपरिभास्वतः। द
देःकालइष्यते। दर्शनाद्रविरेखायास्तदस्तोमुनिभिःस्मृतः । सुधानिधौ—उत्तमातारकोपेतामध्यमालुप्त
ंध्यात्रिधामता। उत्तमासूर्यसहितामध्यमालुप्तभास्करा। कनिष्ठातारकोपेतासायंसंध्यात्रिधामता। संवत
यथाविधि। सादित्यांपश्चिमांसंध्यामर्धास्तमितभास्कराम्। संध्यायामुपस्थानमेवप्रधानं मार्जनादित्वंगम्
। संध्यागतंसहस्रांशुमादित्यमुपतस्थिरे। इतिभारतादितिचंद्रिका। अर्घ्यदानस्यश्रौतत्वादाशौचेतदेव
ोपस्थानयोराशौचेपाक्षिकत्वस्यवक्ष्यमाणत्वात्। उभयोःसंध्ययोःकालेरजसावार्घ्यमुत्क्षिपेदितिवाक्याच्चार्घ
नकरस्तुसंध्यामुपासीतेतिमन्वादिस्मृतावुपपूर्वस्यासतेरुपस्थानमेववाच्यम्। नोपतिष्ठंतियेसंध्यांस्वस्थावस्था
प्रधानमित्याह। उपपूर्वस्यासतेर्ध्यानंवाच्यमितिमाधवःकृष्णभट्टश्च। स्मृतिरत्नावल्यांशंखः—प्रा

---

रेति पाठ।

स्नानकर्मणि । स्नानकर्मणीतिमध्याह्नस्नानोत्तरमितितत्रैवोक्तम् । सध्यायाअकरणेप्रत्यवायो **मनुः**—नानुतिष्ठतियःपू
सशूद्रवद्बहिःकार्यःसर्वस्माद्द्विजकर्मणः । **याज्ञवल्क्यः**—सर्वावस्थोपियोविप्रःसंध्योपासनतत्परः । ब्राह्मण्याद
। **याज्ञवल्क्यः**—अनार्तश्चोत्सृजेद्यस्तुसविप्रःशूद्रसंमितः । **भारते**—येनपूर्वामुपासतेद्विजाःसंध्यांनपश्चिमा
शूद्रकर्माणिकारयेत् । **स्कांदकौर्मयोः**—संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु । यत्किंचित्कुरुतेकर्मनतस्य
णे—सर्वकालमुपस्थानंसंध्ययोःपार्थिवेष्यते । अन्यत्रसूतकाशौचविभ्रमातुरभीतितः । विभ्रमःअभ्रादिनासंध्याका
धेषुद्विजपदोक्तेर्नशूद्रस्यसंध्या आगमदीक्षायुक्तस्यतुतदुक्तास्त्येवेति**पंचायतनसारेस्मृतिकौमुद्यांच** । ब्राह्मणा
क्षयोरपिसंध्या—कुडोवागोलकोविप्रःसंध्योपासनमात्रविदितिस्मृतिकौमुद्यांस्मृतेः । **शातातपः**—अनृतं
पुनातिवृपलस्यान्नवहिःसध्याह्युपासिता । गृहेषुप्राकृतीसध्यागोष्ठेदशगुणास्मृता । नदीषुशतसाहस्राअनंताशिव
ावितिचंद्रिकायांचवसिष्ठपाठः । प्राकृतीएकगुणा । **व्यासः**—वहिःसंध्यादशगुणागर्तप्रस्रवणादिषु । ख्या
ीजले । **माधवीयेऽत्रिः**—उभेसंध्येतुकर्तव्येब्राह्मणैश्चगृहेष्वपि ॥ ॥ **अथप्रयोगः** । **बृहत्पराशरः**—
सवाहना । रक्तपद्मारुणादेवीरक्तपद्मासनस्थिता । रक्ताभरणभारांगीरक्तमाल्यांबरातथा । अक्षमालाजलाधार
सुराभ्यर्च्येपुण्येगायत्रिवैधसि । आवाहयाम्युपास्त्यर्थंमंहोनिघ्नन्पुनीहिमाम् । सध्यामाध्याह्निकीश्वेतासावित्रीरु
ज्वलत्रिशिखधारिणी । श्वेतांबरवराश्वेतनागाभरणभूपिता । श्वेतस्रगक्षमालापिकृतानुरक्तशकरा । जलाधारज

ादिनीइतिपाठ ।

ानिविश्वेशिविश्वेविश्वजनार्चिते । शुभेवरेवरेण्येत्वमाहूतैहिपुनीहिमाम् । संध्यासायंतनीकृष्णाविष्णुदेवीसरस्वती
ाधरा । कृष्णस्रग्भूषणैर्युक्तासर्वज्ञानमयीवरा । वीणाक्षमालिकाचापहस्तास्मितवरानना । मातर्वाग्देवते
णस्तुत्येआहूतैहिपुनीहिमाम् । त्रिशिखंत्रिशूलम् । खगोगरुडः । **मदनरत्ने**—वृद्धांसरस्वतीकृष्णांपीतव
हस्तांगरुडवाहनाम् । बदर्याश्रमवासांतामायांतीसूर्यमंडलात् । सामवेदकृतोत्संगांवनमालाविभूषिताम् ।
न्यहम् । **आचारादर्शे**—रक्ताभवतिगायत्रीसावित्रीशुक्लवर्णिकेतिपाठः । **संवर्तः**—अथाचम्यकुशै
ःकंकृत्वासंध्यांनित्यंसमारभेत् ॥ ॥ **आसनम्** । **स्मृतिसारे**—कौशेयंकेवलंवापिअजिनंपटमेवच ।
् । श्रीपर्ण्यादिदारुविहितं । **चंद्रिकायांकौशिकः**—कुशासनंसदापूतंयतीनांतुविशेषतः । **योगयाज्ञव**
ूलमथापिवा । **मार्कंडेये**—चित्रासनंयोगपट्टंतथैवमृगचर्मच । कृष्णाजिनंतथातातवर्जयेत्पुत्रवान्गृही
ुदारिद्र्यंपाषाणेव्याधिसंभवः । धरण्यांदुःखसंभूतिर्दौर्भाग्यंभिन्नदारुजे । तृणासनेयशोहानिःपल्लवेचित्तविभ्रम
श्रीर्व्याघ्रचर्मणि । वस्त्रासनेव्याधिनाशःकेवलेदुःखमोचनम् । अभिचारेनीलवर्णोरक्तोवश्यादिकर्मणि । शां
। **मार्कंडेये**—तद्वन्नोपविशेत्प्राज्ञःपादेनाक्रम्यचासनम् । **बृहस्पतिः**—बध्वासनेनियम्यासून्स्मृत्वा
ाीप्राणायामंसमभ्यसेत् । **आसनंतुवायुपुराणे**—पद्ममर्धासनंवापितथास्वस्तिकमासनम् । **शांतिहे**
त्वापादतलेउभे । समासीनात्मनःपद्ममेतदासनमुत्तमम् । एकंपादमथैकस्मिन्विन्यस्योरुणिसत्तम । आ

ाठ ।

नसुत्तमम् । उभेकृत्वापादतलेजानूर्वोरंतरेणहि । समासीनात्मनःप्रोक्तमासनंस्वस्तिकंपरम् । **छंदोगपरिशि**
क्षिप्यसमंततः । रक्षा शिखाबंधइतिकेचित् । तन्न । शिखाबंधस्यतत्रानुक्तेः । साप्राणायामात्पूर्वमित्या**चाराद**
**मधेनुः** ॥ ॥

**ायामनिर्वचनंतुकौर्मे**—प्राणाःस्वदेहजोवायुरायामस्तुनिरोधनम् । **तद्वैविध्यंकौर्मे**—सएवद्विविधःप्रोक्तः
ुःसजपमगर्भमजपंबुधाः । अगर्भोयोगाभ्यासोपयोगी । **व्यासशौनकौ**—प्रणवव्याहृतियुतांगायत्रीशिरसासह
ायामःसउच्यते । प्रणवव्याहृतीतिद्वंद्वेव्याहृतीनांप्रणवयोगोनस्यात् । मध्यमपदलोपिसमासेगायत्र्यास्तद्योगोनस्य
हृतिसप्रणवामिति**योगयाज्ञवल्क्य**विरोधः । अतोगायत्रीशिरसासार्धजपेद्व्याहृतिपूर्विकाम् । प्रतिप्रणवसंयुक्त
**वल्क्या**द्यवस्था । गायत्र्याएवप्रणवयोगेप्रतीतिव्यर्थस्यात् । नचव्याहृतिगायत्रीशिरसांप्रत्येकंतद्योगात्त्रिःप्रणवत्वे
तिभिःसार्धसप्तोंकारसमन्विताम् । शिरसासहितांदेवीप्राणायामेनियोजयेदितिचं**द्रोदये योगयाज्ञवल्क्य**विरो
ामेवादौप्रणवइतिविज्ञानेश्वरस्तचिंत्यम् । गायत्रीविशेषणत्वादुभयोःपरस्परमन्वयायोगात् । गायत्रीविशेषणस्यतय
ोगाच्च । नचवाजपेयन्यायः । तत्रप्रधानेन्वयायोगाद्युक्तोंगेष्वन्वयः । षष्ठ्याःसंबंधसामान्येउपपत्तेश्च । नचात्रत
मेकेनप्रणवपूर्वत्वंतथात्रापिशंकानिरासार्थ**विज्ञानेश्वरोक्तिः**समाधेया । प्रतीत्युक्तेरेवशिरसापिप्रणवान्वयः । अ
। तदपिन । **व्यासस्मृतौ** प्रणवांतशिरोभिधानात् । प्रतिप्रतीकंप्रणवमुच्चारयेदंतेचशिरसइति**छंदोगपरिशिष्ट**
**ध्वीचंद्रः** । शिष्टाचारोप्येवम् । युक्तंचैतदेव—एतामेताःसहानेनतथैभिर्दशभिःसह । त्रिःपठेदायतप्राणःप्र

रेशिष्टाच । एताव्याहृतयःसप्त एतांगायत्रीं अनेनशिरसा एभिःप्रणवैः दशभिरितियथाप्राप्तानुवादः प्र
रदशकं । व्याहृतयःसप्त । भूर्भुवःस्वर्महर्जनस्तपःसत्यंतथैवच । इतिसप्तव्याहृतयःप्राणायामेषुनित्यशइतिचंद्रि
ः । **व्यासः**—आदानंरोधमुत्सर्गंवायोस्त्रिस्त्रिःसमभ्यसेत् । **शांतिहेमाद्रौयोगयाज्ञवल्क्यः**—नासि
ते । कुंभकोनिश्चलश्वासोरिच्यमानस्तुरेचकः । नीलोत्पलदलश्यामंनाभिदेशेव्यवस्थितम् । चतुर्भुजंमहात्मा
दिस्थानेध्यायीतकमलासनम् । ब्रह्माणंगौरवर्णंचचतुर्वक्त्रंपितामहम् । रेचकेनेश्वरंविद्याल्ललाटस्थंमहेश्वरम् । शु
म् । पूरकेणेत्यादितृतीयासप्तम्यर्थे । गौररंक्तम् । रक्तंप्रजापतिंध्यायेदितिव्यासोक्तेः । पूरकादीनांमि
नकरेचैःप्राणायामस्त्रिलक्षणोज्ञेयइतियोगयाज्ञवल्क्योक्तेः । प्रत्येकंत्रिर्मंत्रपाठेप्रत्येकंप्राणायामत्वमित्य
सिकामंगुलीभिश्चतर्जनीमध्यमाद्दते । दक्षिणेनसमाकृष्यसव्येनतुविसर्जयेत् । **देवजानीयेस्मृत्यंतरे**—
येत् । **शांतिहेमाद्रावीश्वरगीतासु**—रेचकंदक्षिणेप्रोक्तंपूरकंवामतश्चरेत् । जपारंभेतुविज्ञेयोविपर्य
। विपरीतोदक्षिणेनपूरकोवामेनरेचकइत्यर्थः । **बह्वृचपरिशिष्टे**—दर्भपाणिःप्रथममंत्रकंपंचदशमात्रि
कुर्यादिति ॥ ॥ **मात्रास्वरूपमुक्तंसंग्रहे**—यावत्कालंत्रिरावेष्टयजानुहस्तेनदक्षिणम् । छोटिकाकर
भिःपंचदशभिःप्राणायामोऽधमःस्मृतः । मध्यमोद्विगुणःश्रेष्ठस्त्रिगुणोधारणास्मृता । **विज्ञानेश्वरोप्येवम्**
—पंचांगुलीभिर्नासाग्रपीडनंप्रणवाभिधा । मुद्रेयंसर्वपापघ्नीवानप्रस्थगृहस्थयोः । कनिष्ठानामिकांगुष्ठैर्नासि

यतेरूत्थाइतिपाठ ।

ासाप्रोक्तायतेश्चब्रह्मचारिणः । **चंद्रोदयेसंग्रहे**—अंगुष्ठतर्जनीभ्यांतुऋग्वेदीसामगायनः । अंगुष्ठानामिकाभ्यांच
—अंगुष्ठेनपुटंधार्यंनासायादक्षिणंपुनः । कनिष्ठानामिकाभ्यांतुवामंप्राणस्यसंग्रहे । **मनुः**—प्राणायामत्रयंक
। **प्रणवस्वरमाह चंद्रोदयेवृद्धपराशरः**—ऋग्वेदेस्वरितोदात्तउदात्तश्चयजुःश्रुतौ । सामवेदेसविज्ञेयोदीर्घःस
क्यः—आथर्वणेसमुद्दिष्टउदात्तोनात्रसंशयः । **शांतिहेमाद्रौ**—अनुदात्तोदात्तऋग्वेदेषण्मात्रःस्वरउच्यते ।
ःप्लुतस्तथा । पूर्वास्तिस्त्रोनुदात्तास्तिस्त्रउदात्ताः । तत्रैव**शौनकः**—बाष्कलेनैकमात्रोयमोंकारःसमुदाहृतः । ः
वांछति । सार्धद्विमात्रंतंप्राहमुद्गलोमुनिपुंगवः । सार्धत्रिमात्रमोंकारंवसिष्ठोमुनिरब्रवीत् । पराशरश्चतुर्मात्रंप्राहत
चतस्त्रोऽस्यविज्ञेयाःपरमार्थतः । **अथर्वणश्रुतौ**—यद्येकमात्रमभिध्यायीतेत्येकमात्रउक्तः ॥ ॥ ऋष्यादिस्मरणं
**ासः**—प्रणवस्यऋषिर्ब्रह्मागायत्रीछंदएवच । देवोऽग्निःसर्वकर्मादौविनियोगःप्रकीर्तितः । देवोग्निरितिजपपरम् ।
ष्यतइति**योगयाज्ञवल्क्योक्तेः** ॥ ॥ **व्याहृतीनामृषीनाह भरद्वाजः**—भरद्वाजःकश्यपश्चगौतमोऽ
मदग्निर्वसिष्ठश्चर्षयःक्रमात् । **चंद्रिकायाम्**—विश्वामित्रोजमदग्निर्भरद्वाजोथगौतमः । ऋषिरत्रिर्वसिष्ठश्चकश्
—गायत्र्युष्णिगनुष्टुप्चबृहतीपंक्तिरेवच । त्रिष्टुप्चजगतीचेतिछंदांस्येतान्यनुक्रमात् । अग्निर्वायुस्तथासूर्योबृहस्पत्
देवताःसंसमुदाहृताः । सूर्यस्थाने आदित्यः अपांस्थानेवरुणः**चंद्रिकायां**पठितः । **तत्रैव**—व्याहृतीनांचसर्वा
न्याऋष्याद्याह**योगयाज्ञवल्क्यः**—सवितादेवतायस्यामुखमग्निस्त्रिपात्स्थिता । विश्वामित्रऋषिश्छंदोगाय

ासायाइतिपाठ । २ परिकीर्तिता ।

ोमणौशातातपः—तत्सवितुर्वरेण्यमितिसावित्रीब्राह्मणस्य देवसवितरितिराजन्यस्य विश्वारूपाणीतिवैश्य
—आपोज्योतिरित्येषमंत्रोयस्तुप्रकीर्त्यते । तस्यप्रजापतिश्चर्षिर्यजुश्छंदोपिवर्णितम् । ब्रह्माग्निवायुसूर्याश्चदेवताःसमु
द्रिकायाम्—पादयोश्चतथाजान्वोर्जघयोर्जठरेपिच । कंठेमुखेतथामूर्ध्निक्रमेणव्याहृतीर्न्यसेत् । भूरंगुष्ठद्वयेन्य
लिद्वयेधीमान्स्वःपदंविनियोजयेत् । करन्यासविधिंकृत्वाअंगन्यासंसमारभेत् । भूःपदंहृदिविन्यस्यभुवःशिर
खकवचेतत्पदंन्यसेत् । अक्ष्णोर्भर्गपदंन्यस्यदिग्विदिक्षुधियःपदम् । तदित्यादिपादपरम् । ततःशिरसासर्वा
ेप्राणायामेपरंन्यसेदितिव्यासोक्तेः । न्यासांतरमाहचंद्रोदयेव्यासः—आपोगुह्येन्यसेज्ज्योतिश्चक्षु
दयेभूःपदंन्यसेत् । भुवर्नाभौललाटेस्वरोंकारंमूर्ध्निविन्यसेत् । शौनकः—प्राणानायम्यविधिवद्वाग्यतःसंयते
ासंकल्प्यमार्जयेत् ॥ ॥ चंद्रिकायांबृहन्मनुस्मृतौब्रह्मांडेच—नद्यांतीर्थेहृदेवापिभाजनेमृन्मयेथवा
ालम् । कृत्वाथवामहस्तेवासंध्योपास्तिंसमारभेत् । औदुंबरे ताम्रपात्रे । यत्तुव्यासः—वामहस्तेजलंकृत्व
लीज्ञेयाह्यसुरास्तैस्तुतर्पिताइति । तत्पात्रांतरसत्वेइतिचंद्रिकादयः । नद्यादिपरमितिवयम् । गंगायांवापि
स्तेजलंगृह्णन्नकुर्यान्मार्जनंक्वचिदितिगायत्रीरहस्येआपस्तंबोक्तेः । बह्वृचपरिशिष्टे—स्थिरेतूदका
वेभागंकल्पयित्वातीर्थानितत्रावाह्येत्युक्तम् । बृहस्पतिः—धाराच्युतेनतोयेनसंध्योपास्तिर्विगर्हिता इति ॥
याज्ञवल्क्यः—आपोहिष्ठेतितिसृभिर्ऋग्भिस्तुप्रयतःशुचिः । नवप्रणवयुक्ताभिर्जलंशिरसिमार्जयेत् । नवप्रणव

रिशिष्टे—सदर्भपाणिनादायोत्तानंशिरसिमार्जयेत्। छंदोगपरिशिष्टे—शिरसोमार्जनंकुर्यात्कुशैःसोदकबिंदुभि
तेवासमाहितः। प्रणवोभूर्भुवःस्वर्द्यौंगायत्रीचतृतीयकम्। अब्दैवतंतृचंचैवचतुर्थमितिमार्जनम्। योगीश्वरना
कुर्यादृषीणांमतमीदृशम्। एवचत्रयःपक्षाः—ऋगतेमार्जनमित्येकः। नवभिःपादैःप्रणवोपेतैर्नवमार्जनानीतिद्वि
तीयः। व्यासः—यस्यक्षयायेतिजलंसकुशंप्रक्षिपेदधः। हारीतः—मार्जनंचकुशाभावेदेवतीर्थेन यद्वाकुशसं
प्रर्थसारे—पच्छोर्धर्चशऋक्शश्चमार्जनेतन्मयेतृचे। ब्रह्महस्तच्युतंतोयंस्वयंशिरसिधारयेदिति तन्मंत्रस्नानपरम्। मं
रमुक्तं काशीखंडे—आपोहिष्ठेतितिसृभिर्मार्जनंतुततश्चरेत्। भूमौशिरसिचाकाशेआकाशेभुविमस्तके। मस्तके
तृपेत्। भूमिशब्देनचरणावाकाशंहृदयंस्मृतम्॥ ॥ आपोहिष्ठेत्यस्यऋच्याबाह योगयाज्ञवल्क्यः—सिंधुद्वीपे
आपश्चदैवतंप्रोक्तंविनियोगश्चमार्जने। भृगुः—आपोहिष्ठानवस्त्वृक्षुसिंधुद्वीपऋषिःस्मृतः। अब्दैवत्यास्तुसप्तर्चोगाय
गीयपरिशिष्टे—प्रातःसूर्यश्चमेत्युक्त्वासायमग्निश्चमेतिच। आपःपुनंतुमध्याह्नेकुर्यादाचमनंततः। प्राणाया
येदितिक्रमःकात्यायनादीनाम्। अन्येषांप्राणायामोत्तरमाचम्यमार्जयित्वासूर्यश्चेतिसकृदाचमनद्वयमितिपृथ्वी
स्नात्वामंत्रवदाचम्यपुनराचमनंचरेदितिटोडरानंदेनारसिंहात्सकृदाचमनमेव। पितामहः—सूर्यश्चेत्यनुवा
वितादेवतातस्यऋषिरग्निरितिस्मृतः। चंद्रोदयेसंग्रहे—आपःपुनंतुमंत्रस्यऋषिःपूतइतिस्मृतः। छंदोनुष्टुब्भवे

नेचत्वारःपक्षाः—आदौप्रणवेनसमस्तव्याहृतिभि गायत्र्यामार्जनकृत्वासमस्ततृचेनैकमार्जनकुर्यादित्येक। प्रणवोपेतैर्नवभि पादैर्नवम
नमितितृतीय। तृचातेमार्जनमितिचतुर्थइत्यप्यन्यत्र।

—अग्निश्चेतिपिबेत्तोयंत्वस्यसूर्यमृषिंविदुः । देवताग्निर्भवेच्छंदोगायत्रंप्रोक्षणेविधिः । सूर्यस्येत्यस्याग्निर्ऋषिःप्रकृति
ताइतिचंद्रिकामदनपारिजातौ । नारायणऋषिःसूर्योदेवतागायत्र्युपरिष्टाद्बृहतीछंदइतिहरिहरः । अ
पृथ्वीचंद्रः । अग्निश्चेत्यस्यसूर्यऋषिः प्रकृतिश्छदः अग्निमन्युमन्युपत्याह्यानिदेवताइतिचंद्रिका । आपःपु
ऋषिः आपोदेवताअनुष्टुप्छंदइतिसएव । नारायणऋषिरितिदेवजानीये ॥ ॥ छंदोगानामाचमनेमंत्रमा
नात्वितिप्रातः । रात्रिश्चमावरुणश्चपुनात्वितिसायमिति । अनयोःप्रजापतिर्ऋषिर्लिंगोक्तादेवतेतिचंद्रिका ।
शुष्कवासाःस्थितोजले । सांध्यमाचमनंकुर्वन्शुचिःस्यादशुचिस्त्वधः । पुनर्मार्जनमुक्तं बह्वृचपरिशिष्टे-
हतिसावित्रीभिरापोहिष्ठेतिसूक्तेनेति । शौनकीयेऽप्येवम् । गायत्रीकल्पेतु—आपोहिष्ठेतित्रिभिःप
ते इदमापइतित्रिभिर्ऋगंते । मार्जनोत्तरमघमर्षणंयोगयाज्ञवल्क्यः । जलपूर्णतुचुलुकंनासिकाग्रेवि
तज्जलंक्षिपेत् । कात्यायनः—जपेदनायतासुर्वात्रिःसकृत्वाघमर्षणम् । कौर्मे—आपःपाण्योःसमादाय
शिष्टे—अथगोकर्णवत्कृतेनहस्तेनोदकमादायनासिकाग्रेधारयन्कृष्णघोरपुरुषाकृतिमात्मानमंतव्याप्यस्थितंवि
दामृचंवावर्तयेत्तंपाणिस्थेउदकेपतितंध्यात्वावामतोभुवितीव्रपातेनक्षिपेदित्येवमेकेनकुर्वंतीति । संध्याकल्पे
दांक्षिपेत् । अर्धंभूमौशिरस्यर्धंसर्वभुव्यघमर्षणम् । अत्रकरपाण्योरैच्छिकोविकल्पः । योगयाज्ञवल्क्य
र्षणः । आनुष्टुभंभवेच्छंदोभाववृत्तंचदैवतम् । अश्वमेधावभृथकेविनियोगोस्यकल्पितः । अघमर्षणोत्तरमा

२ पाप्मानमितिपाठ । ३ भाववृत्तिश्चेतिपाठ ।

उपस्पृशेत्ततःपश्चान्मंत्रेणानेनमंत्रवित् । अंतश्चरसिभूतेपुगुहायांविश्वतोमुखः । त्वयज्ञस्त्ववपट्कारआपोज्योतीरसोमृ
: । **कौर्मे**—ॐकारव्याहृतियुतांगायत्रीवेदमातरम् । जस्वाजलांजलिंदद्याद्भास्करप्रतितन्मनाः । अंजलयस्त्रयः
ाचाभिमंत्रितम् । आदित्याभिमुखस्तिष्ठंस्त्रिरूर्ध्वंसंध्ययोःक्षिपेदिति**व्यासोक्तेः** । अतएवकेवलगायत्र्यार्घ्यत्रयंन
एतेब्रह्मवादिनःपूर्वाभिमुखाःसंध्यायांगायत्र्याभिमंत्रिताअपऊर्ध्वंविक्षिपंत्युद्यंतमस्तंयंतमादित्यमिति**तैत्तिरीयारण्**
गायत्र्यादद्याद्व्याहृतिसंयुतमितिप्रायश्चित्तार्घ्येविशेषः। **कौर्मे**तुकात्यायनपरमिदमित्युक्तम् । उत्थायार्कंप्रतिप्रोहेत्त्रि
**यनस्मृतेः** । त्रिक प्रणवव्याहृतित्रयगायत्र्यः । **संध्याकल्पेआश्वलायनः**—सकृन्मंत्रेणद्विस्तूष्णीमर्घ्यंदद्या
प्रभातेस्यान्मध्याह्नेतुऋजुःस्थितः । द्विजोऽर्घंप्रक्षिपेद्देव्यासायंचोपविशन्भुवि । प्रातर्माध्याह्निकींसंध्यांतिष्ठन्नेवसमर्पये
लेत्वर्घ्यंननिक्षिपेत् । **यत्तुवसिष्ठः**—उपविश्यचयश्चार्घ्यंसर्वंतन्निष्फलभवेदिति तत्सायंसंध्याभिन्नपरम् । व
वीर्यामंदेहानामराक्षसाः । कृष्णातिदारुणाघोराःसूर्यमिच्छतिखादितुम् । ततोदेवगणाःसर्वेऋषयश्चतपोधनाः ।
ुदकांजलिम् । दह्यंतेतेनतेदैत्यावज्रीभूतेनवारिणा । **अर्घ्यकालः काशीखंडे**—अर्वोदयास्तसमयेतस्माद्वे
**ययोस्तु**—जस्वाजलांजलिंदद्याद्भास्करंप्रतितन्मनाः । सावित्रीप्रजपेद्विद्वान्प्राङ्मुखःप्रयतःशुचिः । अथोपतिष्ठेद
क्म् । **देवजानीयेप्येवम्** । **चंद्रिकायामपि** गायत्रीजपोत्तरमुपस्थानमुक्तम् । नचआदित्याभिमुखस्तिष्ठन्त्रि
**सोक्तेः**सूर्योदयोत्तरमर्घ्यदानमितिवाच्यम् । तस्याआदित्यदिगभिमुखत्वार्थत्वात् । यत्तूपस्थानोत्तर जपउक्तः सः
-असावादित्यमंत्रेणप्रदक्षिणमतःपरं । अपःस्पृष्ट्वादक्षिणेतुपश्चाद्देवान्विसर्जयेत् । प्रदक्षिणोत्तरंजलंस्पृशेत् । सायमंत्रव

दत्त्वाप्रदक्षिणंकृत्वाजलंस्पृष्ट्वाविशुध्यतीतिचंद्रोदयेनारसिंहात् ॥ ॥ अर्घ्यदानोत्तरंसंध्यातर्पणमुक्तंप्र
ऋषिः ब्रह्मादेवता गायत्रीछंदः तर्पणेविनियोगः । भूःपुरुषंतर्पयापि ऋग्वेदंतर्पयामि । मंडलं आत्मानं ब्रह्म
संध्यां बालां ब्रह्माणी उषसं निम्रुचं सर्वसिद्धिकरीं सर्वमंत्राधिपां । सायंतु विष्णुर्देवता अनुष्टुप्छंद
यामि विष्णुरूपिणी परमात्मानं सरस्वती वृद्धां वैष्णवी । एवंपंचदशकृत्वस्तर्पयित्वाद्विराचामेदिति । स
चस्मृत्यंतरे—ततस्त्वाचम्यविधिवत्प्राणायामान्नवाचरेत् ॥ ॥

ध्यानन्यासादि । चंद्रोदयेवृद्धपराशरः—जपेतुत्रिपदाज्ञेयाअर्चनेतुचतुष्पदा । न्यासेजपेतथा
त्रिपदाज्ञेयाब्राह्मणैस्तत्त्वचिंतकैः । पदशब्दःपादपरः । गायत्र्याश्चतुर्थपादउक्तोगारुडे—परोरजसेसावदोंचतु
—मानस्तोकेतिमंत्रेणशिखाबंधतुकारयेत् । जपंहिंसंतिरक्षांसिरक्षाकर्मविवर्जितम् । कात्यायनः—भूर्भुवसु
क्षयेद्वारिणात्मानंपरिक्षिप्यसमंततः । प्रणवाद्याव्याहृतीस्तुसावित्रीचजपेत्ततः । शांतिहेमाद्रौब्राह्मे—
ता । शुक्लोवर्णोमुखंचाग्निर्विश्वामित्रऋषिस्तथा । त्रयीशिरःशिखारुद्रोविष्णुर्हृदयमेवच । उपासनेविनियो
चरणंज्ञेयंपृथिवीकुक्षिरेवच । एवंध्यात्वातुगायत्रींजपेद्द्वादशलक्षणाम् । न्यासाकरणेदोषउक्तः शां
ष्ठंत्यर्धंहिराक्षसाः । अन्नेणकरशुद्धिंकृत्वान्यासंकुर्यादित्युक्तंचंद्रिकायाम् । प्रणवन्यासमाहयोगय
कारंहृदिविन्यसेत् । मकारंमूर्ध्निविन्यसेदेषन्यासोविमुक्तिदः । व्याहृतिन्यासमाहपराशरः—भूलं
। स्वर्लोकंगुह्यदेशेतुनाभिदेशेमहस्तथा । जनलोकंतुहृदयेकंठदेशेतपस्तथा । भ्रुवोर्ललाटसंधौतुसत्यलोकःप्र

ते । **पारिजातेगायत्रीरहस्ये**—तत्सवितुर्ब्रह्मात्मनेसावित्रीशक्तिरंगुष्ठाभ्यांनमः । वरेण्यंविष्ण्वात्मनेलक्ष्मीश
र्गोदेवस्यशिवात्मनेगौरीशक्तिर्मध्यमाभ्यांनमः । धीमहिपरमात्मनेज्ञानशक्तिरनामिकाभ्यांनमः । धियोयोनःनिरज
ष्ठिकाभ्यांनमः । प्रचोदयान्निरासात्मनेमायाशक्तिःकरतलकरपृष्ठाभ्यांनम. । तत्सवितुर्ब्रह्मात्मनेसावित्रीशक्तिर्हृदयाय
नेलक्ष्मीशक्तिःशिरसेस्वाहा । भर्गोदेवस्यरुद्रात्मनेगौरीशक्तिःशिखायैवषट् । धीमहिपरमात्मनेज्ञानशक्ति कवचायहुम्
मनेईपणाशक्तिर्नेत्रत्रयायवौषट् । प्रचोदयान्निरासात्मनेमायाशक्तिरस्त्रायफट् इतिषडंगः । **चंद्रिकायांत्रह्मकल्पे**
—तकारंविन्यसेत्स्वांगेपादांगुष्ठद्वयेद्विजः । सकारगुल्फदेशेतुविकारंजघयोर्न्यसेत् । जान्वोस्तुकारंविन्यस्यवकारचोरुदेः
णकारंवृपणेन्यसेत् । कटिदेशेयकारंतुभकारनाभिमडले । गोकारजठरेयोगीदेकारंस्तनयोर्न्यसेत् । वकारहृदिविन्यस
कारमास्येविन्यस्यमकारतालुकेन्यसेत् । हिकारंनासिकाग्रेतुधिकारंनयनद्वये । भ्रुवोर्मध्येतुयोकारललाटेतुद्वितीयकम्
रदक्षिणानने । उत्तरास्येतुचोकारदकारपश्चिमानने । विन्यसेन्मूर्ध्नियाकारसर्वव्यापिनमीश्वरम् । **अथपदन्यासः**—त
सवितुर्जंघाभ्यां । वरेण्यकटिभ्यां । भर्गोनाभ्यै । देवस्यहृदयाय । धीमहिकंठाय । वियोमुखाय । योचक्षुर्भ्यां ।
तमूर्ध्ने । **अथपादन्यासः**—प्रथमपादस्यऋग्वेदऋपिःत्रिष्टुप्छदःब्रह्मादेवताभूस्तत्सवितुर्वरेण्यंपादयोर्ब्रह्मणेनमः ।
ऋपिःअनुष्टुप्छदःरुद्रोदेवताभुवोभर्गोदेवस्यधीमहिहृदयेरुद्रायनमः । तृतीयपादस्यसामवेदऋपिः जगतीछंदःविष्णुर्दे
यात्ललाटेविष्णवेनमः । तुरीयपादस्यविमलऋपिः परमात्मादेवतागायत्रीछंदःपरोरजसेसावदोंत्रह्मरब्रेपरमात्मनेनम
ह्मे—आग्नेयंप्रथमवायव्यंद्वितीयंतृतीयंसौर्यचतुर्थंवैद्युतंपंचमंवारुणंपष्ठंसप्तमंवार्हस्पत्यमष्टमंपार्जन्यनवममैंद्रंदशमंगांधर्व

त्रयोदशंवासवंचतुर्दशंमारुतंपंचदशंसौम्यंषोडशमांगिरिसंसप्तदशंवैष्णवमष्टादशमाश्विनमेकोनविंशंप्राजापत्यंविंशं
त्रयोविंशंवैष्णवंचतुर्विंशमिति । **चंद्रिकायाम्**—अथतत्त्वानिवक्ष्यामिअक्षराणांविशेषतः । पृथिवीह्युदकं
रूपंचस्पर्शःशब्दोथवागिति । हस्तावुपस्थंपायुश्चपच्छ्रोत्रेत्वक्चचक्षुषी । जिह्वाघ्राणंमनस्तत्त्वमहंकारोमहांस्तथ
निश्चयः । **तत्रैव**—सहानित्याविश्वहृदयाविलासिनीप्रभावतीलीलाशांताशांतिर्दुर्गासरस्वतीविश्वरूपाविशा
ण्यरूपासूक्ष्माविश्वायोनिर्जयावहापद्मालयावराशोभनागदारूपेतिशक्तयइति । अक्षरदेवतातत्त्वशक्तीनामु
र्णा । यद्वामुकदेवताकामुकशक्तिकामुकतत्त्वकामुकाक्षरायनमइत्यक्षरन्यासार्था । अक्षरविन्यासकालेतत्तद्देवता
यामंगन्यासमाह**व्यासः**—हृदितत्सवितुर्न्यस्यन्यसेत्कंठेवरेणियम् । भर्गोदेवस्येतिखंडंशिखायांतुततोन्य
नश्चनेत्रयोः । प्रचोदयादितिपदमस्त्रार्थेविनियोजयेत् । ॐभूरंगुष्ठयोर्न्यस्यॐभुवस्तर्जनीद्वये । ॐस्वश्चैव
अनामिकाद्वयेधीमान्न्यसेत्तत्पदमग्रतः । कनिष्ठिकाद्वयेभर्गःपाण्योर्मध्येधियःपदम् । अत्रसर्वेमंत्राःसप्रणवानमो
जमतःपरम् । नामग्राह्यंनमोंतंचजपन्यासःप्रकीर्तितइतिचं**द्रिकायांशांतिहेमाद्रौचभृगूक्तेः** ॥ ॥
**द्रिकायां** ॐमितिहृदि । भूरितिमुखे । भुवइतिशिरसि । स्वरितिसर्वांगे । **तत्रैवव्यासः**—विन्यस्यैवं
लोकमवाप्नोतिव्यासस्यवचनंयथा ।

:—**चंद्रिकायांब्रह्मकल्पेच**—अथातोदर्शयेन्मुद्राःसंमुखंसंपुटंतथा । ततोविततविस्तीर्णेद्विमुखत्रिमु
ाधोमुखेततः । व्यापकांजलिकाख्यंचशकटंतदनंतरम् । यमपाशंचग्रथितंततःस्यात्संमुखोन्मुखम् । प्र

हएवच । सिंहाक्रांतंमहाक्रांतंततोमुद्गरपल्लवाविति । तल्लक्षणंतत्रैव—संमुखंसधितौहस्तावुत्तानौकुंचितांगुली
शाभौकरावन्योन्यसहतौ । विततंसंहतौहस्तावुत्तानावायतांगुली । विस्तीर्णसहतौपाणीमिथोमुक्तांगुलिद्वयो ।
ोः पाण्योःकनिष्ठाद्वययोगतः । शेषांगुलीनांवैकल्येद्विमुखत्रिमुखादयः । कनिष्ठयोर्योगेंगुष्ठयोर्योगेचशेषांगुलीन
गेत्रिमुखम् । मध्यमयोर्योगेचतुर्मुखम् । अनामिकयोर्योगेपंचमुखम् । शेषांगुलीनामंयोगेकनिष्ठायोगनाशने ।
गुलिमडलौ । हस्तौषण्मुखमित्युक्तामुद्रामुद्राविशारदे. । आकुंचिताग्रौसंयुक्तौन्युब्जौहस्तावधोमुखम् । उत्तानौ
ौ । अधोमुखौवद्धमुष्टीमुक्ताग्रांगुष्ठकौकरौ । शकटनामकथितयमपाशमतःपरम् । वद्धमुष्टिकयोःपाण्योरुत्तानावा
क्तातर्जन्यान्युब्जवक्रया । उत्तानसधिसंलीनवद्धांगुलिदलौकरौ । समुखौघटितौदीर्घांगुष्ठौग्रथितमुच्यते । सचि
ेनतु । अधोमुखेनसंयुक्तःसमुखोन्मुखमुच्यते । संचितासवद्धा । उत्तानोन्नतकोटीचप्रलंबःकथितौकरौ । उत्त
: । मुष्टीचान्योन्यसंवद्धावुत्तानौमुष्टिकोभवेत् । मत्स्यस्तुसमुखीभूतौयुक्तानामकनिष्ठिकौ । ऊर्ध्वसंयुक्तवक्राग्रौ
करोवामस्ताद्दक्षादक्षिणेनतु । पृष्ठदेशेसमाक्रांतःकूर्मोनामाभिधीयते । ऊर्ध्वमध्येवामभुजःपक्षाभ्यामाश्रयेत्करम्
श्रयकेकरे । सिंहाक्रांतसमाख्यातंकर्णार्पितकरावुभौ । किंचिदाकुंचिताग्रौचमहाक्रांतंततःपरम् । ऊर्ध्वेकिंचिद्द
स्तादक्षिणहस्तेनपल्लवोदक्षिणःकरः । मूर्ध्निअधोमुख.स्थितोदक्षिणःकरःपल्लवइत्यर्थः । चंद्रिकायांमहासंहि
द्रामहाजनसमागमे । शौनकस्तुयोनिमुद्रामेवाह—षडगमन्त्रैर्विन्यस्ययोनिमुद्रांप्रदर्शयेत् । गायत्रीसंस्मरे

---

समीपेतिपाठ ।

**ीयेव्यासः**—हस्ताभ्यांमुकुलीकृत्वानामिकामूलपर्वणः । अंगुष्ठौतुक्षिपेदुक्तामुद्रैपावाहनीवुधैः । अधो
मृता । संनिधायोच्छ्रितांगुष्ठौमुष्टयासंयोजनीभवेत् । अंतःप्रवेशितांगुष्ठासैवसरोधिनीमता । नमस्काराभिध
दक्षिणंहस्तंवामस्योपरिचक्रमात् । कनिष्ठाद्यंगुलीनांचसंकोचेनसमानयेत् । अंगुष्ठान्मूलपर्यंतंसंहाराख्येय
च्छ्रितामंगुलीषुच । मध्यमातर्जनीयोगात्कनिष्ठोपकनिष्ठयोः । सश्लेषाद्धेनुमुद्रेयंगोस्तनीचेश्वरप्रिया ॥
**याज्ञवल्क्यः**—श्वेतवर्णासमुद्दिष्टाकौशेयवसनातथा । श्वेतैर्विलेपनैःपुष्पैरलंकारैश्चभूषिता । आदित्यम
क्षसूत्रधरादेवीपद्मासनगताशुभा । **बह्वृचपरिशिष्टे**—अथमंत्रदेवतांध्यात्वाआगच्छवरदेदेविजयेमेसंनि
त्रीत्वंततःस्मृतेत्यावाह्यपूजयेदिति । **चंद्रिकायांगोभिलः**—आयाहिवरदेदेवित्र्यक्षरेब्रह्मवादिनि । ग
। **व्यासः**—तेजोसीतिचमंत्रेणगायत्रीमावहेद्द्विजः । उपस्थायतुरीयेणनमस्कृत्यजपेच्चताम् । तुरीयेणेति
ेन । आवाहनमंत्राणांयथाशाखंव्यवस्था ।

**पप्रकारमाहयोगीश्वरः**—प्रणवःपूर्वमुच्चार्योभूर्भुवःस्वस्ततःपरम् । गायत्रीप्रणवश्चांतेजप्येष्वेवमुदा
ःसप्रणवांसव्याहृतिकांजपेदिति । **वृद्धपराशरः**—प्रणवोभूर्भुवःस्वश्चपुनःप्रणवसंयुताम् । अंत्यों
गवोंतेतथाचादौआहुरन्येजपक्रमम् । आदावेवकारोव्याहृत्याचादितस्ततः । तदाद्यांचतदंतांचकुर्यात्प्र

---

त्र्यक्षराबालासाक्षसूत्रकमण्डलुम् । रक्तवस्त्राचतुर्वक्त्राहंसवाहनसंस्थिताम् । ब्रह्माणीब्रह्मदैवत्याब्रह्मलोकनिवासिनीम् । आवाह
२ आवहेदावाहयेत् ।

द्धमनुः—पडोंकारांजपेद्विप्रोगायत्रींमनमाशुचिः । तिस्रोव्याहृतयःपूर्वंत्र्यमोकारसंयुताः । पुन.सहृत्यचोंकारमंत्रस्य
हारीतः—प्रणवोव्याहृतयःसावित्रीचेति । अन्नयथासप्रदायव्यवस्थेतिपृथ्वीचंद्रः । स्मृतिरत्नावल्यांतु—न
जपकर्मणि । गृहस्थवच्चजसव्यासाचवैब्रह्मचारिभिः । सपुटाचपडोंकाराभवेत्स्यातूर्ध्वरेतसामितिव्यवस्थेत्युक्तम् । ऊं
णश्च । वनस्थायतयः । मोक्षार्थिनंप्रत्याहवृद्धपराशरः—योनवाठतिसतानंमोक्षमिच्छतिकेवलम् । अंत्योंकार
यात् । योगयाज्ञवल्क्यस्तु—प्रणवव्याहृतीसार्धंस्वाहांतोहोमकर्मणि । प्रतिलोमाप्रकर्तव्याफट्कारांताभिचारकेइत्य
नानि । याज्ञवल्क्यः—अग्न्यगारेजलांतेवाजपेद्देवालयेपिवा । पुण्यतीर्थेगवांगोष्ठेसिद्धक्षेत्रेथवागृहे । ॐग्नः
द्यादौद्विगुणंमतम् । गवांगोष्ठेशतगुणमग्न्यगारेशताधिकम् । सिद्धक्षेत्रेषुतीर्थेषुदेवतायाश्चसन्निधौ । सहस्रशतकोटी
। कौर्मे—गुह्यकाराक्षसा.सिद्धाहरतिप्रसभयतः । एकांतेतुशुभेदेशेतस्माज्जप्यसदाचरेत् । पारिजातेसंध्याकर
त्वामध्याह्नेहृदिसंस्थितौ । सायंजपस्तुनासाग्रेत्रिसंध्यजपलक्षणम् । योगयाज्ञवल्क्यः—तिष्ठन्यदाजपकुर्याद्
सीनजपएवस्याजानुमात्रेणसमितः । विशेषांतरमाहसएव—जपस्येहविधिंवक्ष्येयथाशक्तिसमासतः । नचक
कयन् । नापाश्रितोनजल्पश्चनप्रावृतशिरास्तथा । पादेनपादमाक्रम्यनचैवहितथाकरौ । नैवविधजपकुर्यान्नचसश्र
चुकीनग्नोमुक्तकेशोगलावृतः । अपवित्रकरोऽशुद्धःप्रलपन्नजपेत्क्वचित् । क्रोधोमदःक्षुधातंद्रानिष्ठीवनविजृंभणे ।
पश्चजपद्विपः । एतेषांसंभवेवापिकुर्यात्सूर्यादिदर्शनम् । आचम्यवाजपेच्छेषंकृत्वावाप्राणसंयमम् । चंद्रोदयेसां
यदिष्ठीवेत्क्षुवतेजृंभतेपिवा । आचामेद्दुविन्यस्ताक्ष.स्पृशेदम्भोथगोमयम् । योगयाज्ञवल्क्यः—प्रसार्यपादौनजो

ःशयानोवारथ्यायांशूद्रसंनिधौ । रिक्तभूम्यांचखट्वायांनजपेज्जापकःस्वयम् । आसनस्थोजपेत्सम्यङ्मंत्रार्थगत
ष्ठोष्ठौचनचालयेत् । नकंपयेच्छिरोग्रीवांदंतान्नैवप्रकाशयेत् । **वृद्धमनुः**—वस्त्रेणाच्छाद्यस्वकरंदक्षिणंयःसद
निंनिष्फलंस्मृतम् । **योगयाज्ञवल्क्यः**—तूष्णीमासीतचजपंश्वंडालपतितादिकान् । दृष्ट्वातान्वार्युपस्
ांतिहेमाद्रौ—जपकालेयदापश्येदशुचिंमंत्रवित्तमः । प्राणायामस्तदाकार्यस्ततःशेषंसमाचरेत् । यदाचै
आचांतःप्रयतोभूत्वान्यासंपूर्ववदाचरेत् । अशुचिर्मूत्रोत्सर्गादिनाऽस्पृश्यस्पर्शादिनावेत्यर्थः । **गोभिलः**—
जपेत् । गायत्र्यग्निमुखाप्रोक्तातस्मादुत्थायतांजपेत् । उत्थायजलान्निर्गत्य । **सएव**—अभावादन्यवस्त्र
ध्येजपोल्पोऽपिसावित्र्याःक्वापिसर्वशः । [अपिशब्दोऽत्रतुशब्दार्थे] । **कौर्मे**—यदिस्यात्क्लिन्नवासावैवारिम
यांदर्भेषुचसमाहितः ॥
दाः । **बृहन्नारदीये**—मंत्रस्योच्चारणंसम्यक्स्फुटाक्षरपदंयथा । जपस्तुवाचिकःप्रोक्तःसर्वयज्ञफलप्रदः । मं
ाम् । जपस्तुकथितोपांशुःपूर्वस्माद्द्विगुणाधिकः । धियायदक्षरश्रेण्यास्तत्तदर्थविचारणम् । मानसस्तुज
वकउच्चैर्जपः । **विष्णुधर्मोत्तरे**—त्रयाणांजपयज्ञानांश्रेयःस्यादुत्तरोत्तरम् । **यत्तुशंखः**—नोच्चैर्जपंबु
तन्मानसादिजपप्रशंसार्थं नतूच्चैस्त्वनिषेधार्थमितिचंद्रिका । अल्पफलपरमितिपृथ्वीचंद्रः । अन्य
नुः—विधियज्ञाज्जपयज्ञोविशिष्टोदशभिर्गुणैः । उपांशुःस्याच्छतगुणःसाहस्रोमानसःस्मृतः । **वसिष्ठः**–
कःस्मृतः । सशब्दश्चाभिचारोयंत्रिविधोजपउच्यते । **व्यासः**—शतंजप्तातुसादेवीपापोपशमनीस्मृता ।

ाशिनी । लक्षजाप्येनचतथामहापातकनाशिनी । कोटिजाप्येनराजेंद्रयदिच्छतितदाप्नुयात् । **मनुः**—सहस्रकृत्व
जः । महतोप्येनसोमासात्त्वचेवाहिर्विमुच्यते । त्रिकं प्रणवोव्याहृतित्रयंगायत्रीच । **व्यासः**—अष्टोत्तरशतंनि
वेधिनादशकंवापित्रिकालेपुजपेद्बुधः । **यमस्मृतौनारसिंहेच**—सहस्रपरमांदेवींशतमध्यांदशावराम् । गायत्रीं
नीम् । **याज्ञवल्क्यः**—जपन्नासीतसावित्रींप्रत्यगातारकोदयात् । संध्यांप्राक्प्रातरेवंहितिष्ठेदासूर्यदर्शनात् । प्रत्य
ङ्गः । अत्रोदयोत्तरंकालांतरेसायंसंध्यावंदनेपिउत्तरावधौविधेयेनासनप्रत्यङ्मुखत्वयोर्बाधः एवप्रातरपि । अबाधेनग
ात् । **मनुः**—पूर्वांसंध्यांजपंस्तिष्ठेत्सावित्रीमार्कदर्शनात् । पश्चिमांतुसमासीनःसम्यगृक्षविभावनात् । दशेत्यापत्परमि
याविकल्पइतिदेवजानीये । सूर्योदयनक्षत्रावधिर्जपःकाम्यः । कामनाभावेविहितदशादिसंख्याग्रहइत्याचाराद
। आपद्यष्टसंख्येतिस्मृत्यर्थसारे । **आपस्तंबः**—सावित्रीसहस्रकृत्वआवर्तयेच्छतकृत्वअपरिमितकृत्वोवेति ।
ननिराक्रियते ।—असंख्यातंतुयज्जप्तंतत्सर्वंनिष्फलंभवेदितिशंखोक्तेः । किंतु सहस्रादिभ्योऽधिकसंख्याग्रहणंपाठ
ुक्तंत्वत्राष्टाविंशत्यादिन्यूनग्रहणमेव । सहस्रकृत्वइत्युक्त्वाशतकृत्वइतिन्यूनप्रक्रमात् । पाठेतुएकादेयातिस्रोदेयाइत्य
ति । **चंद्रिकायांयोगयाज्ञवल्क्यः**—ब्रह्मचारीहिताग्निश्चशतमष्टोत्तरंजपेत् । वानप्रस्थोयतिश्चैवसहस्रादधिकं
तहोमिपरमितिचंद्रिका ॥

**मालाविचारः** । **माधवीयेशंखः**—कुशबृस्यांसमासीनःकुशोत्तरीयोवाकुशपवित्रपाणिःसूर्याभिमुखोवाक्षमाला
पंकुर्यादिति । **स्कांदे**—सौवर्णराजतंताम्रंस्फाटिकंरत्नजंतथा । अरिष्टपुत्रजीवं(?)चशंखंपद्मंतथामणिम् । कुशग्रंथिचरु

पुराणे—प्रवालहेममुक्ताभिर्मणिरुद्राक्षपुष्करैः। दर्भारिष्टकवीजैश्वशंखैर्वाजीवकैर्जपेत् । **रामार्चनचं**
णिभिर्जपमालिका । सर्वकर्मसुसर्वेषामीप्सितार्थफलप्रदा । **हारीतः**—स्फटिकेंद्राक्षकैर्मालातथैवांगुलिप
चनीनिवजोत्पलैः । पद्माक्षकैश्वरुद्राक्षैर्विद्रुमैर्मणिमौक्तिकैः । **गौतमः**—अंगुल्याजपसंख्यानमेकमेकमु
)र्दशगुणाधिकम् । शतंस्याच्छंखमणिभिःप्रवालैश्वसहस्रकम् । स्फटिकैर्दशसाहस्रमौक्तिकैर्लक्षमुच्यते । पद्मा
रुद्राक्षमधिकृत्योमासंवादेब्राह्मे । —लक्षकोटिसहस्राणिलक्षकोटिशतानिच । जपेतुलभतेपुण्यंनात्रका
लैंगे—सर्वमंत्रजपंकुर्याद्विजोरुद्राक्षमालया । **ब्राह्मे**—सशब्दाचंचलायाचत्रुटिताग्रथिनाविना । भि
। मालादुःखप्रदायिन्योग्रथितानिव्रतंतुभिः । **वाराहे**—उत्तमाष्टाधिकशतंचतुःपंचाशन्मध्यमा । क
नोच्छिष्टःसंस्पृशेत्तांतुस्त्रीणांहस्तेनधारयेत् । आकाशेस्थापनकुर्यान्नचवामेनसंस्पृशेत् । नदर्शयेच्चकस्यापि
**संस्कारविधिः। मंत्रदेवप्रकाशिकायाम्**—समासेनाक्षसूत्रस्यविधानमिहकथ्यते । पंचविंशतिभि
ःसप्तविंशत्यापंचदश्याभिचारकम् । पंचाशद्भिःकाम्यकर्मसिद्धिःस्याचतुरुत्तरैः । अष्टोत्तरशतैःसर्वसिद्धिर
नातिस्थूलाकृतीनिच । जंतुभिर्नविशीर्णानिनजीर्णानिनवानिच । गव्यैस्तुपंचभिस्तानिसंप्रक्षाल्यपृथक्पृथ
वर्जितम् । त्रिगुणंत्रिगुणीकृत्यसूत्रंप्रक्षाल्यपूर्ववत् । अश्वत्थपत्रैर्नवभिःपद्माकारंप्रकल्पयेत् । सूत्रमणींश्व
रंशक्तिमातृकांचसूत्रेचैवमणिष्वथ । विन्यस्यपूजयेदाज्यैर्जुहुयाद्भक्तिसंयुतः । मणिमेकैकमादायसूत्रेत
पृष्ठंचयोजयेत् । प्रोक्तसंख्यान्यमेकाक्षंमेरुत्वेनाग्रतोन्यसेत् । एकैकमणिमध्येतुग्रंथिबंधंप्रकल्पयेत् । स्वयं

श्रयंहरेत् । एवंकृताक्षमालायांज्येष्ठेनावर्तयेत्क्रमात् । भुक्तिमुक्तिप्रदः मोयमालिकागणनक्रमः । अंगुष्ठेनाक्षमालांच
तर्जन्यानस्पृशेत्सोयमुक्तिदोगणनक्रमः । अंगुष्ठमध्यमाभ्यांतुजपेदुत्तमकर्मणि । अंगुष्ठानामिकाभ्यांतुजपेदाकृष्टकर्मणि
द्विपदुच्चाटनेजपः । कनिष्ठांगुष्ठकाभ्यांतुजपेन्मारणकर्मणि। जपान्यकालेतांमालांपूजयित्वातुगोपयेत् । जीर्णेसूत्रेपुनःसूत्र
प्रमादात्पतितेहस्ताच्छतमष्टोत्तरजपेत् । जपेन्निषिद्धसस्पर्शेक्षालयित्वाययोचितम् । अक्षसूत्रतुनिपतेद्यदिचेत्कुर्वतोजपम्
जापकोहृदयेनतु । हृदयमघोरायनमइतिमत्र. । योगयाज्ञवल्क्यः—अंगुष्ठस्यतुमध्यस्थंपरिवर्तंसमाचरेत् । परिव
यज्ञसयज्ञसमेरुलंघितम् । असख्यातततुयज्ञसतजसनिष्फलंभवेत् । स्मृतिरत्नावल्याम्—पर्वभिस्तुजपःकार्योनां
न्निपातेस्तुयज्ञससर्वविधात्तदासुरम् । अगुलीनामगुष्ठनिपातेगुलिनिषेधोनेत्युक्तम् । मंत्रदेवप्रकाशिकायाम्—
अंगुलिभिर्जपेत् । अगुष्ठेनविनाकर्मकृततदफलभवेत् । गौतमोपि—अगुष्ठेनजपेज्जप्यमन्यैरगुलिभिःसह ।
म्—मध्यमाद्यद्वयंपर्वजपकालेतुवर्जयेत् । एतमेरुविजानीयाद्गूपितब्रह्मणापुरा । अस्मिन्पक्षेऽनामिकाद्वितीयपर्वप्रभृति
णिसमाप्ति. । पर्वशब्दोरेखावचनइतिकेचित् । अस्मिन्पक्षेऽनामामध्यरेखामादिंकृत्वातदधःक्रमेणप्रादक्षिण्येनतर्जन
। विधानांतरमंत्रदेवप्रकाशिकायाम्—अगुलीपर्वभिर्मत्रजपनित्यप्रकल्पयेत् । मध्यमानामिकामध्यपर्वद्वितय
णीकुर्वन्ननामामूलपर्वसु । आरभ्यमध्यमामूलपर्वांतगणयेत्क्रमात् । अगुलीर्नवियुजीतकिचिदाकुचितेतले । अगुल
तेजपः । मालादेरनावश्यकतोक्ताद्वृद्धपराशरेण—यथाकथचिद्गणयेत्ससख्यतद्भवेद्यथा । चंद्रोदयेसंग्रहे—
न्याजपितेनच । यथासख्येनजाप्येनब्रह्मामेप्रीयतांरविः । मध्याह्नेसायंचब्रह्मपदेक्रमाद्रुद्रविष्णुपदे प्रातःपदेमध्याह्नसाय

यत्रीतर्पणम् । **नागदेवाह्निकेप्रयोगपारिजातेच**—आचम्यप्राणानायम्यगायत्रीतर्पणंकरिष्यइतिसं
मावाह्य गायत्रीषडंगेषुविन्यस्यभूः पुरुषमृग्वेदायनमस्तर्पयामि । भुवः पुरुषंयजुर्वेदायनमस्तर्पयामि । स्वः पुरु
ः पुरुषमथर्ववेदायनमस्तर्पयामि । जनः पुरुषमितिहासपुराणेभ्योनमस्तर्पयामि । तपः पुरुषंसर्वागमायनमस्त
धेतिङीष्सिद्धेः पुंयोगेङीष्भावात् पितुर्मातापितामहीत्यमराच्च । प्रतिपादितंचैतद्**भाष्यकाशिकारायमुकुटा**
ष्वस्रादीनांनभ्रातृत्वादिनातर्पणम् । यत्तुपित्रादित्रयमिलितमुद्दिश्यांजलित्रयंदेयमित्या**चारादर्श**स्तत्पित्रेपित
त्वादिविरोधादुपेक्ष्यम् । सस्त्रीत्युक्तेर्मातामहाःसपत्नीकाइति**त्रिस्थलीसेतौ**वचनाच्चतर्पणेपिमातामहानांसपत्नी
। अत्रतर्प्यसंग्रहेतात्पर्येणोल्लेखेतात्पर्याभावात् । मातामहीनामजल्येकत्वत्रित्वविचारायोगात् मातुलान्यादीन

श्च । अथमातामहीनांचसपत्नीनामनंतरमित्यादिवाक्यविरोधाच्च । अतस्तर्पणंपृथगेव । तर्पणीयत्वावच्छेदकस्य
त्वेनविनिगमनाविरहेणमातुलयोरिवेतरेतरसाहित्यस्यवक्तुमशक्यत्वात् । एवंश्वश्रूश्वशुरयोःपृथक्तर्पणं भार्याजनकत्व
लान्यास्तुनपृथक्तर्पणं मातुलस्यतत्संबंधघटकत्वात् । यदपि मातुलानीचदुहितेतिमातुलान्याःपृथक्श्रवणंतन्मातु
त्वेनपृथक्तर्पणगमकम् । एवंपितृव्यभ्रातृपुत्रपत्नीनामपि । एवंपितृष्वसुःसभर्तृकायास्तर्पणं तस्यास्तत्संबंधघटकत्वात्
रूढंतत्पूर्ववदेवोपपन्नम् । एवंमातृष्वसृभगिनीपुत्रीणामपि । भागिनेयदौहित्रयोर्नपृथक्तर्पणं किंतुभगिनीसापत्य
त्रसेयमातृष्वसेयमातुलादीनांतुपृथक् बंधुत्वस्यावच्छेदकस्यभेदात् । भागिनेयत्वंहिभगिन्यपत्यत्वम् । बंधुत्वं
रस्परव्यभिचारात् । बंधवस्त्वात्मपितृमातृबंधवः । केचित्तुसर्वेषांपृथक्तर्पणमाहुः । भ्रातुर्ज्येष्ठस्यैवतर्पणंनक
हारीतोक्तौज्येष्ठग्रहणात् । यत्तुचंद्रोदयेबौधायनः—यदिस्नेहेनकुर्यातांसपिंडीकरणंविना । गयायांतुवि
तत्सपिंडीकरणपर्युदासाद्दशाहांतकृत्यपरम् । अन्यथापुनर्गयाश्राद्धविधिवैयर्थ्यात् । अन्याभावेकुर्यादेव । एवं
कुर्यात्पुत्रस्यपैतृकमितिकात्यायनोक्तेः—अन्याभावेकुर्यादेव । एवंपत्न्याअपि । नपत्न्यैतुपतिर्दद्यादेषधर्मःस
वचनात् पत्न्यैचापिपतिर्दद्यादितिगयायातुर्विधानाच्च अन्याभावेकुर्यात् । पितृष्वस्रादिसत्वे नतद्भर्त्रादितर्पणंद्व
तत्स्त्रीणाम् । जननीसत्वेसपत्नमातृमरणेपितस्याएवतर्पणं नमातामह्यादीनांजनन्यास्तत्रद्वारत्वात् । नचपितृपत्न
त्वम् । उत्पादकब्रह्मदात्रोर्गरीयान्ब्रह्मदःपितेत्युक्तेर्जीवत्यपिजनकेब्रह्मदश्राद्धतर्पणाद्यापत्तेः । नचैवंमातृमरणे
रणेपिनप्रपितामहीतर्पणंस्यात् । यस्यपिताप्रेतःस्यादितिश्राद्धन्यायेनोपपत्तेः । **भारते**—ज्येष्ठामातृसमाचैवभ

द्वत्स्यावस्यावाल्येस्तनंपिवेत् । स्तनपानमुभयोःशेपइतिकेचित् । एकार्थांतर्गतत्वेनभ्रातृपत्न्याएवेत्यन्ये । वयं
ः । यस्या स्तनंपिवेत्सायाकापिमातृसमातस्याअपितर्पणम् ॥ ॥ **विधवायाविशेपः काशीखंडे**—त
कैः । तत्पितुस्तत्पितुश्चापिनामगोत्रादिपूर्वकम् । इदंपुत्रपौत्राभावपरमिति पितामहचरणाः । **मदनपारिजा**
मुष्यायणकादद्युर्द्वाभ्यांपिंडोदकेपृथक् । तर्पणंसंन्यासिनानकार्यम् । नकुर्यात्सूतकभिक्षुःश्राद्धपिंडोदकक्रिया
त् । **शंखः**—पूर्वाग्रैस्तर्पयेद्देवानुदगग्रैश्चमानवान् । तानेवद्विगुणीकृत्यतर्पयेत्प्रयतःपितॄन् । **हेमाद्रौनारदी**
णांयानिकानिचित् । तानिस्युर्द्विगुणैर्दर्भैःसमपत्रैर्विशेपतः । **दक्षः**—अग्रैस्तुतर्पयेद्देवान्मनुष्यान्कुशमध्यतः । पि
थाक्रमम् । **काशीखंडे**—अगुष्ठद्वयमध्येतुकृत्वादर्भानृजून्द्विजः । कव्यवाडनलादींश्चपितॄन्दिव्यान्प्रतर्पयेत्
स्तिलमिश्रितैः । **शंखः**—विनारूप्यसुवर्णेनविनाताम्रतिलेनच । विनादर्भैश्चमन्त्रैश्चपितॄणांनोपतिष्ठते । हेम्ना
। तदप्यक्षय्यतांयातिपितॄणांतुतिलोदकम् । **रामायणे**—पादशौचंविनाभ्यंगंतिलहीनंचतर्पणम् । सर्वतत्रिज
**सत्यव्रतः**—खड्गमौक्तिकहस्तेनकर्तव्यंपितृतर्पणम् । मणिकांचनदर्भैर्वानशुद्धेनकदाचन । अत्रसंभवेसमुच्च
पाणिःसमाचरेत् । द्वाभ्यांवाथत्रिभिर्वापिसर्वेपांतर्पणंवुधइतिहे**माद्रौमरीच्युक्तेः** । तिलानामप्यलाभेतुसुव
पेचेत्तुदर्भैर्मंत्रेणवाप्यथेतिचंद्रो**दयेयोगयाज्ञवल्क्योक्तेश्च** । **प्रयोगपारिजातेवाराहे**—तर्जन्यांरजतंधृ
स्तिपरमाणूनामस्यांतोनैवविद्यते । **हारीतः**—कांचनेनतुपात्रेणराजतौदुंवरेणच । दत्तमक्षय्यतांयातिखड्गेनाश्मकृते
तैरेषामथवारजतान्वितैः । वार्यपिश्रद्धयादत्तमक्षय्यायोपकल्पते । **भारते**—अमावास्यांतुयेमर्त्याःप्रयच्छतितिलो

मेश्रंतपोधनाः । कृतंभवतितैःश्राद्धंसरहस्यंयथार्थवत् । खड्गपात्रादिधारणंचांजलिमध्ये । लघुपात्रंकरेकृत्वासौवर्ण
ापितेनसंतर्पयेत्पितृनितिहेमाद्रौछागलेयोक्तेः । एतेनखड्गपात्रेणतर्पणंनेतिवदन् **मदनपारिजातोऽपास्तः**
संख्या । **हेमाद्रौकौर्मे**—देवतानांतुसर्वासामेकैकांजलिरिष्यते । तत्रैव**ब्रह्मांडे**—अंजलिद्वितयंदद्याद्देवान्
ुराणे—त्रिरपःप्रीणनार्थायदेवानामपवर्जयेत् । तथर्षीणांयथान्यायंसकृच्चापिप्रजापतेः । **ब्रह्मांडे**—ऋषीणांच
**कौर्मे**—ऋषीणामेकएवस्यान्मनुष्याणांद्वयंस्मृतम् । अत्रयथाशाखंव्यवस्था । शाखायामंजलिसंख्यानुक्तौविकल्पइ
ाकमंजलिंदेवाद्वौद्वौतुसनकादयः । अर्हंतिपितरस्त्रीस्त्रीस्त्रियस्त्वेकैकमंजलिम् । **हेमाद्रौकौर्मे**—त्रयस्त्रयःपितृणां
ेनदिव्यपितरोप्युच्यंतइतिपृथ्वीचंद्रः । **पैठीनसिः**—तिलोदकांजलींस्त्रीस्त्रीनुच्चैरुच्चैर्विनिक्षिपेत् । उच्चैरिति
ःकिंचिदुच्चाः ततःप्रपितामहस्येति **हेमाद्रिः** । नच—यश्चैनमुत्पादयतेयश्चैनंत्रायतेभयात् । यश्चास्य
**मारता**देषामंजलित्रयापत्तिः । नित्यत्वबाधनेतात्पर्यात् । अन्यथासपत्नमातुरपितत्वापत्तिः । मात्रादि
**ाद्रिः** । वस्तुतस्तुस्त्रीपदंमात्रादिभिन्नपरम् ।—मातृमुख्यास्तुयास्तिस्त्रस्तासांदद्याज्जलांजलीन् । स्त्रीस्त्रीन्दद्य
ामितिचंद्रोदये **शालंकायनोक्तेः** । मातुस्त्रीनंजलीन्दद्यादन्यासामेकमंजलिम् । सपत्न्याचार्यपत्नीनां
**ीखंडा**त्सापत्नमात्राचार्यपत्नीनांत्रीन् । **हेमाद्रौब्रह्मांडे**—गुर्वाचार्यश्वशुराणांसुहृत्संबंधिनांसकृत् । मात
ामह्यादिसर्वासामेकैकंतुतिलांजलिम् । दद्यात्तीर्थविशेषेणधर्मपरममास्थितइतिचंद्रिकायां **गारुडात्** । मा
ेस्त्रिभिः । मातामहीश्चयेप्यन्येगोत्रिणोदातृवर्जिताः । तानेकांजलिदानेनप्रत्येकंचपृथक्पृथगिति**मदनरत्ने**

ेतुमातामह्यादीनामंजलित्रयम् । **गारुडे** मातामह्यादिपदेअतद्गुणसविज्ञानबहुव्रीहिणामातामह्यादिभिन्नानामे
त्र । मातामह्याद्यादीतिपाठापत्तेः । अन्यथामातामह्याएवांजलित्रयापत्तेः । विरूपैकशेषेमानाभावात् । माताम
ौचित्यापत्तेश्च । **व्यासोक्तौ**चस्वार्थे द्वितीयाप्रथमार्थे । अग्रेअपिशब्दात् मातामहानांत्वंजलित्रयम्।—पितॄणांप्री
पितामहेभ्यश्चतथाप्रीतयेप्रपितामहान् । मातामहायतत्पित्रेतत्पित्रेचसमाहितः । इति**विष्णुपुराणात्** । मातृमा
भिरितिव्यासोक्तेश्चेतिचं**द्रोदयेमदनरत्ने**च । द्वौद्वौमातामहानांचमातुलानांसकृत्तथेति**ब्रह्मांडा**द्वाविति**हेमाद्र**
**प्रत्यंजलिमं**त्रावृत्तिः । ननुमंत्रस्यतर्पणकरणत्वात्ससंख्यांजलिदानस्यैककर्मत्वादवरक्षोदिवइतिवत्सकृदेवमंत्रपा
ायोस्तएवव्रीहयःपुनरवहन्यंते सैववेदिःपुनःप्रोक्ष्यतइतिद्रव्यैकत्वान्नमत्रावृत्तिः । इहतुसत्यप्येककर्मत्वेप्रत्यंजलिद्र
र्घ्यदान—वन्मत्रावृत्तिरितिकेचित् । वस्तुतस्तुद्विस्त्रिरितिक्रियाभ्यावृत्तौसुज्विधानात्सख्यायाःकर्मसामानाधिकर
ंणभेदः । किंतुत्रिरावृत्तिविंशिष्टमेकंतर्पणंत्रिःप्रोक्षतीतिवत्तदंगचमत्रोनावर्तते । तर्पणानावृत्तेः । नचांजलिभे
त्वात् । निर्वापेतुसंस्कार्यद्रव्यभेदान्मत्रावृत्तिः । नचेहद्वितीययांजलयःसंस्कार्याः । धात्वर्थकर्मतयासक्तुव
गत्वेनांजलिकरणकत्वात् । नचमत्रोंऽजलिसंस्कारः । मत्रैश्चदेयमुदकमित्यादिस्मृतौ तृतीययायाज्यावदानक्रियां
। कारकाणांपरस्परासबंधाच्च । अतःपशुसोमाधिकरणन्यायेनप्रथमावगतयागैक्यानुरोधेनैकादशांगकरणकैकया
र्पणम् । **यत्तुपैठीनसिः**—उदीरतामितित्रिभिर्मत्रैस्त्रीनंजलीन्निनयेदिति । तत्राप्येकशेषस्यद्वद्वापवादत्वेनत्रया

यनेकरणत्वासंभवात्रीणित्रिभिर्मंत्रैःसाध्यंतइतिकोविरोधः । अर्घ्यदानेपिकराभ्यांतोयमादायगायत्र्याचाभिमंत्रितमिति
व्यसंस्कारकत्वात्तद्भेदान्मंत्रावृत्तिः । नेहतथेतिनमंत्रावृत्तिरितियुक्तमुत्पश्यामः । अत्रोदीरतामंगिरसआयंतुनऊर्जंपितॄ
तृचंजपन्प्रतिसिंचेदितिकात्यायनसूत्रेशतृप्रत्ययान्मंत्रपाठकालेप्रसेकः । मंत्रांतैःकर्मादिरित्यादिपरिभाषा करणमंत्रपरेति
स्तुनेहायंवर्तमाने । एवंहिमंत्रपाठकालेप्रसेकेगोत्राद्युच्चारणाभावप्रसंगात् । किंतुवर्तमानसामीप्ये । अतोमंत्रपाठोत्तरमेवै
। अत्रविनिगमनाभावेनप्रतिमंत्रंगोत्राद्युच्चारणम् । अन्यथाप्रत्यंजलिश्रीदत्तादिलिखितत्यागानुपपत्तेः । सर्वत्रपितृशब्दश्रुते
भेंदइतिहरिहरस्तच्चिंत्यम् मानाभावात् शब्दांतराद्भेदइतिचेन्निनयनस्यापिभेदापत्तेः । त्वयैवतृप्यध्वमितिप्रसेकोक्तेश्च
केोंजलित्रयंतर्पणमितिभेदइतिचेत् त्वयादानार्थकत्वस्याप्यनंगीकारात् अतोयत्किंचिदेतत् ।

**लितर्पणनिर्णयः** । सर्वत्रांजलिश्रुतेरंजलिनैवतर्पणमितिकेचित् । **अन्येतु**—अन्वारब्धेनसव्येनपाणिनादक्षिणेनतु ।
कांजलिभिःपितॄनितिकौर्मात्देवादितर्पणेसव्यान्वारंभः । पितृतर्पणेत्वंजलिरेवेतिव्यवस्थामूचुः । अपरेतु—एकेनवा
सव्यान्वारब्धेनोभाभ्यांवेतिश्राद्धहेमाद्रौवसिष्ठोक्तेः सर्वत्रविकल्पमाहुः । अंजलिश्चनहस्तद्वययोगमात्रंकिंतु
नादेशेदक्षिणंप्रतीयादितितत्सूत्राद्धस्तेनैवतर्पणम् । **काशीखंडे**—तर्पयेच्छुचिभिस्तोयैस्तृप्यत्वितिसमुच्चरन् । **वृद्धप**
ःस्वाहापितृभ्यश्चनमःस्वधा । अत्रचतुर्थीनिर्देशाद्ब्राह्मणैर्नमःस्वाहेत्यादिप्रयोगइतिपृथ्वीचंद्रः । अत्रचतुर्थ्यादेवादी
वतासंयोगेनयागत्वकल्पनात्तर्पणेनममेतित्यागइत्युक्तंदेवजानीयेआचारादर्शेच ॥

**वेभक्तिविचारः** हेमाद्रौसत्यतपाः—देवपितृमनुष्यादिस्वशाखाविधिचोदनात् । एकैकांजलिनातृप्तिंप्रथमांते

प्रयोगयाज्ञवल्क्यः—तृप्यतामितिवक्तव्यंनाम्नातुप्रणवादिना । तत्रैवगोभिलः—गोत्रकस्तर्पणेप्रोक्तःकर्ताए
शर्मातर्पणकर्मणि । हेमाद्रौभविष्ये—चतुर्थीसर्वकार्येषुप्रथमातर्पणेस्मृता । छंदोगपरिशिष्टेबृहत्प्र
सर्वत्रैवपितःप्रोक्तःपितातर्पणकर्मणि । हेमाद्रौव्यासः—प्रथमातर्पणेप्रोक्तासंबुद्धिमपरेजगुः । छंदोगप
आदावोमितिचब्रुवन् । नमांतेइतिहेमाद्रौपाठः । यमः—संबंधनामगोत्रेणस्वधांतेननमोंततः । तर्पयामिपदें
प्रांतनामप्रयोगोपिसिद्धः । प्रयोगस्तुप्रथमापक्षेअस्मत्पितामुकशर्मामुकगोत्रस्तृप्यताम् । तृप्यत्वितिवा । द्वित
मसुकगोत्रंतर्पयामिनमःस्वधा । स्वधानमइतिवा । संबुद्धिपक्षेस्मत्पितरमुकशर्मन्नमुकगोत्रेदत्तेजलंनमःस्वधेति ।
मांतप्रयोगमेवयुक्तंपश्यामः । बह्वृचानांगोत्रोच्चारःपूर्वं तस्यगोत्रनामचगृहीत्वेतिबह्वृचमन्त्रात् । यद्यपीदंप्रक
नादितिन्यायेनसर्वत्राप्येवंज्ञेयम् । हेमाद्रिस्तु—गुरुषुबहुवचनंकनिष्ठेषुचैकवचनं तेनसगोत्रनामग्रहणंपुर
सस्मृतेः, सकारेणतुवक्तव्यगोत्रंसर्वत्रधीमतेतिमात्स्याच्चामुकसगोत्रानस्मत्पितॄनमुकशर्मणस्तर्पयामिस्वधान
ादर्शेकल्पतरौतु—अमुकगोत्रःपिताअमुकशर्मातृप्यतामिदंजलंतस्मैस्वधेतिप्रयोगइत्युक्तम् । तन्न । पुनश्चतुर्थ्य
योगानुपपत्तिर्मानम् । पितॄन्स्वधानमस्तर्पयामीतिबौधायनेनवाचनिकतत्प्रयोगात्प्रथमांतेपितृप्रयोगोपपत्तेः
—नामतस्तुस्वधाकारैस्तर्प्याःस्युरनुपूर्वशः । अमुकदेवशर्मेतिप्रयोगइतिपृथ्वीचंद्रः । चतुर्थ्यंतनामप्रयोगे
ारिजातेतु—पितृतर्पणेवसुरूपेत्यादिकीर्तनंनेत्युक्तम् । तन्न ।—संबंधमनुकीर्त्यैवनामगोत्रेत्वनंतरम् । वर

ेदितिवसिष्ठस्मृतिविरोधात् । पित्रादीनांमंत्रैस्तर्पणंमात्रादीनांनाम्नेतिहेमाद्रिश्चंद्रिकाच । वैदिकमंत्रैर्देवान
वाह्यमंत्रैस्तर्पयेदितिकल्पतरुरत्नाकरवाचस्पत्यादयः । आचारचंद्रोदयेप्येवम् ॥

ज्ञानेबौधायनः—पृथिवीपतिपितावाच्यस्तत्पिताचांतरिक्षसत् । अभिधानापरिज्ञानेदिविषत्प्रपितामहः । इदं
ानांतुतन्नेत्यादि । यदिनामनविद्यात्तत्पितामहप्रपितामहेतिब्रूयादितितत्सूत्रात् । बौधायनः—शर्मांतंब्राह्
ुप्तांतंचैववैश्यस्यदासांतंशूद्रजन्मनः । मनुः—वैश्यस्यधनसंयुक्तंशूद्रस्यप्रेष्यसंयुतम् । स्त्रीणांलक्ष्मीदामितिदांत
चंद्रोदयेगोभिलोक्तेः । चंद्रिकायांतुदायीशब्दांतमुक्तंदेवीशब्दांतंवा । गोत्रंमातानामदेवीतृप्यत्वेवंस्वध
ोदासः । शूद्रस्यकाश्यपगोत्रं गोत्रनाशेतुकाश्यपइतिव्याघ्रपादोक्तेः, तस्मादाहुःसर्वाःप्रजाःकाश्यप्यइतिश्
िवम् । गोत्रस्यत्वपरिज्ञानेकाश्यपंगोत्रमुच्यतइतिचंद्रिकायांप्रयोगपारिजातेचस्मृत्यंतरात् । कौश
ापरंपराप्रसिद्धंगोत्रंग्राह्यम् । चतुर्णामपिवर्णानांपितॄणांपितृगोत्रतइतिचंद्रिकायांहेमाद्रौबौधायनोक्तेरित्
शूद्रपरमितिश्राद्धहेमाद्रिः । सएव—पितृगोत्रंकुमारीणामूढानांभर्तृगोत्रतः । हेमाद्रौवृद्धशातातप
्यकाभवेत् । भर्तृगोत्रेणकर्तव्यास्तस्याःपिंडोदकक्रियाः । आसुरादिषुचान्येषुपितृगोत्रेणधर्मवित् । ब्राह्मादिष्वा
ंपरायाताचारेणव्यवस्था । येनास्यपितरोयाताइत्यादिवचनादितिविज्ञानेश्वरः ॥

र्याः । हेमाद्रौमात्स्ये—देवासुरास्तथानागागंधर्वाप्सरसोऽसुराः । क्रूराःसर्पाःसुपर्णाश्चतरवोजृंभकाःखगाः
ाशगामिनः । निराधाराश्चयेजीवाःपापकर्मरताश्चये । कृतोपवीतीकृत्वैवनिवीतीचभवेत्ततः । सनकश्चसनंदश्च

श्चैववोढुःपंचशिखस्तथा । सर्वेतेतृप्तिमायांतुमद्दत्तेनांबुनासदा । मरीचिमत्र्यंगिरसौपुलस्त्यंपुलहंक्रतुम् । प्र
देवान्ब्रह्मऋषींश्चैवतर्पयेदक्षतोदकैः । तत्रैवपैठीनसिः—गौतमोथभरद्वाजोविश्वामित्रश्चतापसः । जमद
। स्वारोचिषोरैवतश्चमहातेजाश्चचाक्षुपः । वैवस्वतस्तथातर्प्यइति । चंद्रिकायाम्—अथकांडऋषीनेतानुदक
न्नित्यंमंत्रैःपर्वाष्टमीषुच । कांडानितिवेदस्य । याजुषपरमितिमाधवः । हेमाद्रौभविष्ये—अथसव्यंततः
वात्तान्बर्हिषदोहविष्मंतस्तथोष्मपाः । सुकालिनस्तथाभौमाआज्यपाःसोमपास्तथा । तर्पयेद्वैपितॄन्भक्त्यासतिलोद
शरः—गायत्रीशक्तितोजप्त्वातर्पयेद्देवताःपितॄन् । ब्रह्मेशकेशवात्पूर्वंप्रजापतिमथश्रुतीः । छंदोयज्ञान्नृपीन्सि
वत्सरर्तूंश्चमासपक्षदिनानितु । देवान्देवानुगांश्चैवनागान्नागकुलानिच । सरितःसागरांस्तीर्थान्पर्वतान्कुलपर्वत
नुष्यानथतर्पयेत् । वनस्पतीनोषधीश्चभूतग्रामंचतुर्विधम् । ब्रह्मादयोमयाहूताःसमागत्याददत्वपः । अनृण
तपूर्वाग्रदर्भेषुसाग्रेषुसकुशेषुच । प्रादेशिकेषुशुद्धेषुब्रह्मादिभ्योंबुसेचयेत् । उदीरतामगिरसआयतुवोर्जमित्यपि
पितरस्तथा । अग्निष्वात्तोपहूताश्चतथाबर्हिषदोपिच । येनःपूर्वेपितरश्चसोमपान्समुदीरयेत् । आवाह्यचपितॄनेतैर
खोद्धाभ्यांकराभ्यामंबुसेचयेत् । रुक्मरूप्यतिलैस्ताम्रदर्भमंत्रैःक्षिपेत्पयः । वसून्रुद्रांस्तथादित्यान्नमस्कारसमन्वि
श्चैवानिलोनलः । प्रत्यूपश्चप्रभासश्चवसवोष्टौप्रकीर्तिताः । अजैकपादहिर्बुध्न्योविरूपाक्षोथरैवतः । हरश्चबहु
त्रश्चजयंतश्चपिनाकीचापराजितः । इंद्रोधाताभगःपूषामित्रोथवरुणोर्यमा । अंशुर्विवस्वांस्त्वष्टाचसवितात्रिष्णु
मश्चैवतथार्यमा । अग्निष्वात्ताःसोमपाश्चतथाबर्हिषदोपिच । यमश्चधर्मराजश्चमृत्युश्चैवतथांतकः । वैवस्वतश्च

रश्चदध्नश्चनीलश्चपरमेष्ठिना । सहितइतिशेषः । वृकोदरश्चचित्रश्चचित्रगुप्तस्तथार्यमा । तस्मात्प्राकृतर्पयित्वैत
हान्मातुलांश्चसखिसंबंधिबांधवान् । स्वजनान्ज्ञातिवर्गीयानुपाध्यायान्गुरूनपि । पितृन्भृत्यानपत्यांश्चयेभवं
द्विद्वानीहंतेतेयतोजलम् । अत्रध्रुवायनमइतिप्रयोगइतिचंद्रिका । ध्रुवंतर्पयामिनमइतिहेमाद्रिः । कव्यवाड
व्यवाद्अनलइतिद्वेदेवतेतिकल्पतरुः । तन्न । कव्यवाहोनलश्चेतिगोभिलविरोधात् । यमादितर्पणंचतुर्थ
व्यवाडनलःसोमोधर्मश्चेतिचंद्रिकायांपाठः ॥

विशेषमाह चंद्रोदयेयमः—देवत्वाद्देवतीर्थेनपितृत्वाद्दक्षिणामुखः । देवत्वचपितृत्वंचयमस्यास्तिद्विरूप
य—यज्ञोपवीतिनाकार्यप्राचीनावीतिनातथा । मनुः—एकैकस्यतिलैर्मिश्रांस्त्रींस्त्रीन्दद्याज्जलांजलीन् । स्मृ
श्यांकार्यंतुयमतर्पणम् । अंगारकचतुर्दश्यामपिकार्यंसदैववा ॥ ॥ अथभीष्मतर्पणम् । तन्माघशुक्ला
अन्नंचविधिवद्द्युःसर्वेवर्णाद्विजातयइतिधवलनिबंधस्मृतेः । जीवत्पिताप्येतत्कुर्यात् । जीवत्पितापिकुर्वीतत
पितृचरणाः । इदंचनित्यम्—ब्राह्मणाद्याश्चयेवर्णादद्युर्भीष्मायनोजलम् । संवत्सरकृतंतेषांपुण्यंनश्यतिसत्तमे
नेबंधे—भीष्मःशांतनवोवीरःसत्यवादीजितेंद्रियः । आभिरद्भिरवाप्नोतुपुत्रपौत्रोचितांक्रियाम् । वैयाघ्रपद्य
यददाम्येतज्जलंभीष्मायवर्मणे । वसूनामवतारायशंतनोरात्मजायच । अर्घ्यंददामिभीष्मायआबालब्रह्मचारिणे
त् । अर्घ्यंददामीत्यग्रेतनेनैकवाक्यत्वान्नार्घ्यमंत्रइतिनाम्नातर्पणम् । यत्तु—सत्यव्रतायशुचयेगांगेयायमहात्मने
ह्मचारिणे । वैयाघ्रपद्यःसव्येनानेनमंत्रेणवर्णिकमितिपाद्मंतत्रतदर्पणंगौणम् । अर्घ्योपक्रमात् । नचानयोर्नैभेद

ग्रभावेनभेदावश्यकत्वादितिवयंप्रतीमः । एतेनापसव्येनेतिवदन् दिवोदासोऽपास्तः । हेमाद्रौब्राह्मे—अथ
न् । मरीचिप्रमुखांश्चैवरुद्रादित्यवसूंस्तथा । यक्षान्पशून्सुपर्णांश्चभूतग्रामचतुर्विधम् । आचार्यानितरांश्चैवक
श्चैवमनुष्यांस्तदनंतरम् । कव्यवाडनलादींश्चनतःपितृगणानपि । ततोमातामहानांचपितृव्याणांततःपरम् ।
पुस्तथा । मातुलानीचदुहितास्वसाचार्यर्त्विजस्तथा । शिष्याश्चज्ञातयश्चैवसुहृत्सब्रविनस्तथा । एतेपांतर्पणकार्य
समुद्दिश्यप्रदेयश्चांजलिस्ततः । तत्रैवस्कांदे—पूर्वंमोदप्रमोदादींस्तर्पयेत्पद्विनायकान् । एतौमोदप्रमोदौसुमु
। ततोब्रह्मादयोदेवाःसनकाद्यास्ततःपरम् । अग्निष्वात्तादिकानांतुपितॄणामंप्यनुक्रमात् । यमायधर्मराजायकु
ातॄणांततोमातामहस्यच । पत्नीश्वशुरबंधूनांगुतसब्रविनांततः । भारते—पूर्वंस्ववंगजातानांकृत्वाद्भिस्तर्पणवुध
जलांजलीन् । सदानाविजलतज्ज्ञाःप्रयच्छतिसमाहिता । नारदीये—अग्निप्रभृतयोदेवास्तर्प्याःस्युरनुपूर्वशः
शसितव्रताः । ततःकाडऋपीन्सर्वांस्तर्पयेच्छ्रद्धयान्वितः । पितृभ्यःप्रत्यहदद्यात्ततोमातृभ्यएवच । ततोमाताम
त्रादितर्पणोत्तरंगारुडे—अथमातामहीनांचस्वपत्नीनामनतरम् । तर्पणंचपितृव्याणांतत्पत्नीनांततोपिच । पित
शः । मातुलान्यास्ततोमातृष्वसुस्तत्पत्युरेवच । श्वशुरस्यचकर्तव्यश्वश्रूणामपितर्पणम् । आचार्याणांततःकुर्यादा
त्नीनांपुत्रंचैवस्नुषामपि । पुत्रीतस्याःपतिचैवभगिनींतत्पतितथा । भागिनेयंचपौत्रंचदौहित्रयाज्यमृत्विजम् ।
थैवच । वाराहे—आत्मनोपिजलंदद्यादितिद्वैपायनोब्रवीत् । इदंचापुत्रपरम् । शंखः—आसप्तमात्पुरुषा
वतांतर्पणंकुर्यादितिहारीतः । पित्रादीन्मात्रादीन्मातामहादीन्पितृव्यांस्तत्पुत्रान्ज्येष्ठभ्रातृंस्तत्पत्नीर्मातुलांस्

निऋजुत्वमुक्तम् । **कात्यायनः**—पुष्पाण्यंबुमिश्राण्यूर्ध्वंप्रक्षिप्योर्ध्वबाहुःसूर्यमुदीक्षेतेति । अर्घ्यदानोत्तरंसंध्या
—कश्यपऋषिः रुद्रोदेवतात्रिष्टुप्छंदः पुरुषतर्पणेविनि० । ॐभूःपुरुषंतर्पयामि यजुर्वेदंतर्पयामि मंडलंत०
० सावित्रीत० वेदमातरंत० सांकृतित० संध्यांत० युवतींत० रौद्रींत० उषसंत० निम्रुचंत० सर्वसिद्धिकर
दशतर्पणानिकृत्वाद्विराचम्यादित्यमुपतिष्ठेतेति । **गायत्रीध्यानम्**—सावित्रींयुवतींयुक्तांशुक्लवस्त्रांत्रिलोचनाम् ।
देवताम् । कैलासविहितावासामायांतीसूर्यमंडलात् । वरदांत्र्यक्षरांसाक्षाद्देवीमावाहयाम्यहम् । **गायत्रीज**
—तिष्ठंश्चेद्वीक्षमाणोऽर्कमासीनःप्राङ्मुखोजपेत् । आसीनश्चेदित्यर्थः । रात्रौमध्याह्नसंध्याकरणे नोपस्थानम् । र
तिचंद्रोदयः । **कृष्णभट्टीयप्रयोगपारिजातयोस्तु** रात्रौगायत्र्यार्घ्यंदद्यादुपस्थानेहविष्पांतसूक्तंजपेदित्
। उपास्यविधिवत्संध्यामुपस्थायचभास्करम् । गायत्रीशक्तितोजप्त्वातर्पयेद्देवताःपितॄनितिवृद्धपराशरोक्तेरिति
त्यर्थसारकृष्णभट्टाः । **प्रयोगपारिजातस्तु**—अपांसमीपेनियतोनित्यकंविधिमास्थितः । सावित्रीमप्य
न्सूक्तेर्मध्याह्नसंध्योत्तरंब्रह्मयज्ञमाहसब्रह्मयज्ञप्रकरणानभिज्ञत्वादसंबद्धंवदन्नुपेक्ष्यः । **मदनपारिजाते**तुततो
मितिनारसिंहेततःशब्देनब्रह्मयज्ञानंतर्यंमध्याह्नसंध्यायाइत्युक्तं । **जयंतवृत्तावप्येवम्** । बह्वृचांतुतत्स
यआप्लुत्येतिमध्याह्नस्नानमुक्त्वाततोब्रह्मयज्ञोक्तेरवांतरप्रकरणात्स्नानंब्रह्मयज्ञांगं तयोर्मध्येनसंध्या । अंगांगिनो
भायोगाच्च आगंतूनामंतेनिवेशइतिन्यायाच्च ब्रह्मयज्ञोत्तरमेवसंध्या । नचैवमंतेयद्ददातिसादक्षिणेत्युक्तेस्ताव
मपिसंध्यानस्यादितियुक्तम् । ददातीत्यस्याविधायकत्वात् । अतएव**वृत्तिकृत्**अन्यथादद्यादित्येवावक्ष्यदिति

पस्तंवादिपरः । इदमापःप्रवहतधाम्नोधाम्नस्तथैवच । विमोचनेतुतीर्थस्यआप्यायस्वेतिवैजपेत् । देवागातु
। प्रक्षाल्यतीर्थदेशचगत्वास्वंधर्ममाचरेत् । **श्राद्धहेमाद्रावुशनाः**—स्रवंत्यादिष्वथाचम्यसोपानत्कोह्यसंस्पृश
शुचिरेवसः । तेनोदकेनद्रव्याणिप्रोक्ष्याचम्यपुनर्गृहे । ततःकर्माणिकुर्वीतनित्यंवैयानिकानिच । **शातातपः**—
गनतु । इतिश्रीमन्नारायण० लक्ष्मणभट्टकृतेआचाररत्नेमाध्याह्निकविवरणम् ॥

**वपूजा** । तत्र**प्रयोगपारिजातेवसिष्ठः**—कौबेर्यांतुधनस्थानमैशान्यांदेवतालयम् । **माधवीयेदक्षः**—
तमम् । इति । **मंत्रराजविधाने**—प्रातर्होमंचकृत्वावादेवतार्चनमारभेत् । यद्वामाध्याह्निकंकृत्वापूजयेत्पुरुपो
हारीतः—कुर्वीतदेवतापूजांजपयज्ञादनंतरम् । **अथपूजापात्राणि** । **प्रयोगपारिजाते पैठीनसिः**—
ाणिवर्ज्यानि । हीनानि मानतः । **मानं शिवरहस्ये**—षट्त्रिंशदंगुलपात्रमुत्तमंपरिकीर्तितम् । मध्यमंतुत्रि
तत्रैव**देवीपुराणे**—वस्वंगुलविहीनतुनपात्रंकारयेत्क्वचित् । क्वचिदितिसर्वधर्मकार्येनिषेधइति**टोडरानंदः** ।
ापुडरीकाकृतीनिच । शंखनीलोत्पलाभानिपात्राणिपरिकल्पयेत् । **वाराहे**—शृणुतत्वेनमेदेविप्रियपात्राणियानि
चैवतुयद्भवेत् । सर्वेभ्योभ्यधिकंताम्रंतदेवममरोचते । **अग्निपुराणे**—मृन्मयंचतथाकांस्यमारकूटादिराभवम्
विवर्जयेत् । **वैखानसग्रंथेअभिषेकपात्रमुक्तम्**—अरत्निमात्रविस्तारंमध्येष्टदलसंयुतम् । प्रतिपत्रदल
ष्टोत्तरशतंवापिभूषितंमध्यतस्तथा । खचितंचमहारत्नैरेवंधारासहस्रकम् । धाराष्टकेनवायुक्तमभिषेकायकल्पयेत् ।
वादशभिश्चवा । तत्रैव—पानीयपात्रंसौवर्णराजतंताम्रमेवच । वृत्तायतंसुवृत्तंवाभवेदायतमेववा । प्रस्थमानप्रम

ाजनक्रियापात्र्योहेमादिद्रव्यनिर्मिताः । तत्रैव**पुष्पसारसुधानिधौ**—अर्घ्यपात्रंतुवायव्येनैर्ऋत्यांपाद्यपात्रकम्
ाचमनीयकम् । मध्येतुमधुपर्कःस्यादित्येतत्पात्रलक्षणम् । **चंद्रिकायामाचारादर्शेचस्कांदे**—नैवेद्यपात्रं
ौवर्णराजतंताम्रंकांस्यंमृन्मयमेववा । पालाशंपद्मपत्रंविष्णोरतिप्रियम् । पूर्वोक्तमृन्मयनिषेधस्तुकुलालचक्रनिष्पन्न
ुरंमृन्मयंस्मृतम् । तदेवहस्तघटितंस्थाल्यादिदैविकंमतमिति**कल्पतरुदिवोदासीया**दौवचनात् । **शौन**
ंपरिकल्प्यच । सौवर्णंचचतुर्द्वारंसप्राकारंसविस्तरम् । मडपंरचयित्वातुवितानध्वजतोरणैः । **कृष्णभट्टीये**–
ानयोः । संहारमुद्राकर्तव्यापरिपूर्णेर्चनादिके । अधोमुखाभ्यांहस्ताभ्यामापादतलमस्तकम् । पसारिताभ्यांसं
**चारचिंतामणौ**—गंधादिकानिवेद्यांतापूजापंचोपचारिकी । अर्घपाद्याचमनीयमधुपर्काचमानिच । गंधादिपं
**षोडशोपचारास्तत्रैव**—आसनंस्वागतंचार्घःपाद्यमाचमनंतथा । मधुपर्काचमस्नानवसनाभरणानिच । ग
। **प्रयोगदीपिकायांविष्णुपुराणे**—पूर्वमावाहनंप्रोक्तमासनंचततःपरम् । ततश्चपाद्यमर्घ्यंचततस्त्व
ंततोगंधादिचंदनम् । पुष्पंधूपंचदीपंचनैवेद्यंतदनंतरम् । ततोदेयःप्रणामश्चततोदेयाप्रदक्षिणा । विसर्जनंत
चित्प्रणामप्रदक्षिणास्थानेतांबूलदक्षिणेउक्ते । **हेमाद्रौभविष्ये**—आवाहनासनार्घ्यपाद्याचमनमधुपर्कसेवाश्न
भोज्यानि । प्रादक्षिण्यंस्तुतिरितिकथयंत्युपचारषोडशकम् । **आचारचिंतामणावष्टादशउक्ताः**–
नंतथा । स्नानवस्त्रोपवीतंचभूषणानिचसर्वशः । गंधपुष्पेतथाधूपदीपावन्नेनतर्पणम् । माल्यानुलेपनंचैवनमस्कारं
कल्पइतिस्मार्ताः । तत्रैव—आसनाभ्यंजनेतद्वदुद्वर्तननिरूपणे । संमार्जनंसर्पिरादिस्नापनावाहनेततः । पा

कौ । पुनराचमनीयंचवस्त्रयज्ञोपवीतके । अलंकारागंधपुष्पेधूपदीपौतथैवच । नैवेद्यमथतांबूलंपुष्पमालातथैव
मरव्यजनेतथा । आदर्शोरार्तिकंचैवनमस्कारोथनर्तनम् । गीतवाद्यादिदानानिस्तुतिहोमप्रदक्षिणम् । दंतकाष्ठ
पचाराइमेज्ञेयाःषट्त्रिंशत्सुरपूजने । **शांतिहेमाद्रौत्वन्येउक्ताः**—आवाहनासनेपाद्यमर्घ्यमाचमनंतथा ।
कम् । उपहारंतथाचामंस्नानंचांगविभूषणम् । वस्त्रोपवीतमाचाममलंकारान्विलेपनम् । गंधपुष्पेतथाधूपंदीपमं
यंसर्वात्मनातथा । होमंभोजनमाचाममलंकारांस्तथापुनः । गंधादिचपुनर्दद्यान्मुखवासंप्रदक्षिणाम् । स्तुतिं
म् । **तत्रैव**—स्तुतिःस्वकृतावैदिकीदेवादिकृतावेति ।

**र्चनदीपिकायांषष्टिसंख्याउक्ताः**—पूर्वंप्रबोधनंकुर्याज्जयशब्दांस्ततःपुनः । नमस्कारंततःकुर्यात्ततो
ंदद्यात्ततोवैदंतधावनम् । पादप्रक्षालनंदद्यात्ततोर्घ्यंचप्रकल्पयेत् । आचाममंमधुपर्कंचपुनराचमनीयकम् । ततःसुग
भ्यंगसुगंधैस्तुकुर्यात्तैलापसारणम् । ततःपुण्योदकैःकुर्यादभिषेकसुगंधिभिः । क्षीरेणदध्नाचतथाघृतेनमधुनापि
दकैरपि । महाभिषेकंतथाचाममंगवस्त्रंततोर्पयेत् । वाससीपरिधानार्थमुपवीततथाचमम् । गंधमाभरणंपुष्पंधूपं
चौसुखवासंसुगंधिभिः । तांबूलंशयनंकेशसाधनंवस्त्रदानकम् । किरीटचंदनेदद्यात्ततआभरणानिच । पुष्पनी
तत्रासनंपाद्यमर्घ्यमाचामंधूपदीपकौ । नैवेद्यंचसतांबूलंचंद्रनीराजनंपरम् । चामरव्यजनंछत्रंपुरोगीतंमनोहरम्
प्रदक्षिणाम् । स्तुतिंकुर्यात्ततोविष्णोश्चरणौमस्तकेन्यसेत् । निर्माल्यधारणंकुर्यान्नैवेद्यांशस्यभोजनम् । सेवासुद्दि
। सुखासनेनशयनेनीत्वातंतत्रशाययेत् । अर्चेत्कुसुमतांबूलैःपादौसंवाहयेत्ततः । अत्रविष्णुपदंशिवादेरुपलक्षणम

श्रोभक्तितत्परइति**पारिजातेवृद्धपराशरोक्तेः** । सएव—स्नानेवस्त्रेचनैवेद्येदद्यादाचमनंहरेः । अत्र **पितृच**
लपुंजादिषुचषोडशाद्युपचारपूजैव । आवाहनाभावेपूजायाअसंभवात् । पंचोपचारादशोपचारास्तुपूर्वस्थापितदेवे
चारः । **भविष्ये**—सौवर्णीराजतीताम्रीमृन्मयीचतथाभवेत् । पाषाणधातुयुक्तावारीतिकांस्यमयीतथा ।
यते । अंगुष्ठपर्वादारभ्यवितस्तियावदेवतु । प्रतिमाचतथाकार्यानाधिकाशस्यतेबुधैः । **पंचरात्रे**—मृद्दारु
**स्मृतिसारेपुराणे**—शैलीदारुमयीलौहीलेप्यालेख्याचसैकती । मनोमयीमणिमयीप्रतिमाष्टविधास्मृता ।
मंदिरम् । **प्रयोगपारिजातेविष्णुधर्मे**—तयोरसंभवेचैवसाचेहनवधास्मृता । रत्नजाहेमजाचैवराजती
लौहीशैलजाद्रुमजातथा । अधमाधमाविज्ञेयामृन्मयीप्रतिमाचया । रैतिकी पित्तलजा । **स्मृतिसारे**—न
धिका । नवितस्त्यधिकाधातुसंभवाश्रेयइच्छता । **देवीपुराणे**—सप्तांगुलंसमारभ्ययावच्चद्वादशांगुलम् । गृहे
काशुभा । **कपिलपंचरात्रे**—मानांगुलप्रमाणेनदशपंचदशांगुला । गृहेतुप्रतिमापूज्यानाधिकातुप्रशस्यते ।
प्रमाणावातिथ्यंगुलमितापिवा । **दानमदनरत्नेप्येवम्** । तत्रैव**मात्स्ये**—व्रीहिभिर्वात्रिभिश्चोर्ध्वैरधमां
र्धैश्चतुर्भिश्चतथोत्तमम् । मानांगुलमितिख्यातंमात्रांगुलमथोच्यते । **गोविंदराजीये देवीपुराणे**—तथा
जा । अन्यथातुनकर्तव्याकृताभयकरीसदा । अष्टभुजासदाकार्याप्रासादेवागृहेतथा । ऊर्ध्वस्थितागृहेघोरारौद्राच
शैलजापितथैवच । अष्टभुजाऊर्ध्वाघोरेति**गोविंदराजः** । **वाराहे**—गृहेग्निदग्धाभग्नाश्चनार्चाःपूज्यावसुं
ामुयाद्गृही । **स्कांदे**—शालग्रामशिलायास्तुप्रतिष्ठानैवविद्यते । महापूजांतुकृत्वादौपूजयेत्तांततोबुधः । द

ऽविधानेनविनैववसतेहरिः । सदातत्रशिलामात्रेवक्रचिह्नंवरानने । चक्रचिह्नइत्युक्तेरचक्रेहिरण्यगर्भादौशालग्रा
वतीति **पंचायतनसारः** । अत्रकेचित्प्रतिष्ठावाहनयोर्मिलितयोर्देवतासनिधिजनकत्वात्स्थापितदेवेष्वप्यावाहन
ात्पूर्वपादस्पर्शादावपिदोषाभावप्रसक्तेः । मालादिदानेपुण्याभावापत्तेश्च । अतो नावाहनम् । **पंचायतनसा**
ध्यानार्थप्रतिष्ठितदेवतायामप्यावाहनमित्युक्तम् । अन्येतुप्रतिष्ठयादेवसन्निधियोग्यताक्रियतेआवाहनेनतत्सन्निधिरि
ौद्धसान्निध्यार्थमावाहनमितिभट्टदिनकरः । **स्मृतिसारेपुराणेच**—उद्वासावाहनेनस्तः स्थिरायामुद्धवार्चने ।
डेलेतुभवेद्द्वयम् । स्नपनंचाविलेख्यायामन्यत्रपरिमार्जनम् । **पंचायतनसारेनंदिपुराणे**—स्थिरलिङ्गेऽनलेतं
ादिचत्वारिकुर्यान्नोद्वासनतथा । **तत्रैवपाद्मे**—शालग्रामशिलायांचनावाहनविसर्जने । **देवीपुराणे**—पाद्येश्यामा
। गधपुष्पाक्षतयवकुशाग्रतिलसर्षपाः । **तत्रैव**—बिल्वरक्ताक्षतैःपुष्पैर्दधिदूर्वाकुशैस्तिलैः । सामान्यःसर्वदेवाना
धेदूर्वादेर्मानसंवाप्रकल्पयेत् । रक्तंकुंकुमम् । **पुष्पसारसुधानिधौ**—इक्षुर्मधुघृतचैवपयोदधिसहैवतु । प्र
व्यते । **पंचायतनपूजासारे**—जातीलवंगककोलान्याचमनीयद्रव्याणि ॥

**स्नानं** । **बृहन्नारदीये**—वादित्रनिनदैरुच्चैर्गीतमगलनिःस्वनैः । यःस्नापयतिदेवेशंजीवन्मुक्तोभवेद्द्विसः । वा
र्वदा । घंटाशब्दोनरैःकार्यःसर्ववाद्यमयीयतः । **योगिनीतन्त्रे**—शिवागारेझल्लकंचसूर्यागारेचशंखकम् । दुर्गाग
। **स्कांदे**—वेणुवीणास्वनैश्चैवकुर्यात्तुस्नपनहरेः । शिवंशंखेननस्नापयेत् । नशिवंशंखवारिणेतिपंचायतनसारे

कल्पित । २ झल्लक कांस्यतालवाद्यम् । ३ मधूरीवेणुवाद्यम् ।

वसूर्यार्चनंविनेति**प्रयोगपारिजाते**ब्राह्माच । शिवार्चनेशंखउक्तः**सौरपुराणेपाद्मे**—कुशपुण्योदकस्नानाद्र
केनसाविन्नंकौबेरंहेमवारिणा । नारसिंहंतुसंस्नाप्यकर्पूरागरुवारिणा । इंद्रलोकेसमोदित्वापश्चाद्विष्णुपुरंव्रजेत् । व
नार्दनम् । यज्ञायुतसहस्रस्यस्नापयित्वालभेत्फलम् । ताम्रमूतौंगव्यामिषेकोननिषिद्धः। स्नानतर्पणदानेष्वित्यादिपूर्वो
ःपुनःपुष्पतैलेनसंस्नापयतिकेशवम् । दिव्यौषधियुतेनापितस्यप्रीतोभवेत्सदा । **रुद्रयामले**—द्वादश्यांचदिवा
त्रविष्णोर्दिवास्नानंवर्जनीयंसदाबुधैः । **पाद्मे**—शंखेतीर्थोदकंकृत्वायःस्नापयतिकेशवम् । द्वादश्यांबिंदुमात्रेणकुल
स्नानेविकल्पइतिकेचित् । दिवापदोपादानाद्दिवसेनिषिद्धंनतुरात्रावित्यन्ये । विष्णुमूर्तेःस्नाननिषेधोनशालग्रामादौ
**व्यासः**—प्रतिमापट्टयंत्राणांनित्यंस्नानंनकारयेत् । कारयेत्पर्वदिवसेयदावामलधारणम् । **पाद्मेवैशाखम**
कुंकुमागरुवासितैः । सलिलैःस्नापयेन्मंत्रीनित्यदाविभवेसति । **स्कांदे**—क्षीराद्दशगुणंदध्नाघृतेनैवशतोत्तरम् ।
जंतथा । स्नानादिषुद्रव्यमानमुक्तं**शिवधर्मोत्तरे**—स्नानंपलशतंज्ञेयमभ्यंगंपंचविंशतिः । पलानांद्वेसहस्रेतुमहा
ये—अष्टोत्तरपलशतंस्नानेदेयंतुसर्वथा । **व्रतहेमाद्रौकालिकापुराणे**—पंचविंशत्पलंलिंगेअभ्यंगंकारयेदथ
पलशतेनच । तावतामधुनाचैवदध्नाचैवपुनःपुनः । तावतैवचक्षीरेणगव्येनैवभवेत्ततः । भूयःसार्धसहस्रेणपलान
आढकोद्रोणएवच । धान्यमानेषुवोद्धव्याःक्रमशोऽमीचतुर्गुणाः । **मदनरत्नेआथर्वणपरिशिष्टे**—पंचकृ
लम् । **चंद्रिकायांपुलस्त्यः**—स्नाप्यमानंचपश्यंतियेघृतेनोत्तरायणे । तेयांतिविष्णुसालोक्यंसर्वपापविवर्जित
तेतत्रैव । तत्रैव**वामने**—देवमाल्यापनयनंदेवागारसमूहनम् । स्नपनंसर्वदेवानांगोप्रदानसमंस्मृतम् ॥ ॥**वस्त्रा**

—दुकूलपट्टकौशेयरांककार्पासकादिभिः । वासोभिःपूजयेद्देवंसुशुभैरात्मनःप्रियैः । **विष्णुधर्मोत्तरे**—रांकवा
। **निषिद्धानिवाराहे**—नीलिरंजितवस्त्रंयोमर्त्योमह्यंनिवेदयेत् । नवमक्षालितचैवसचिररौरवेवसेत् । नीलीदं
यज्ञोपवीतदानेनसुरेभ्योब्राह्मणायवा । भवेद्विप्रश्चतुर्वेदीशुद्धधीर्नात्रसंशयः । **नंदिपुराणे**—अलंकारचयोदद्य
मित्वासविष्णुलोकेमहीयते । वस्त्रालंकारादिनप्रत्यहमपूर्वम् । वस्त्रमभ्युक्षणाच्छुध्येदपरंतुदिनेदिनेइतिहरना
केः । अपरंतदेव । ननिर्माल्यंभवेद्वस्त्रस्वर्णरत्नविभूषणमितितत्रैव**चिंताकरीयनिबंधाच** । उपवीतमपिग्रस
ाथः ॥ ॥ गंधपुष्पधूपदीपादेवताभेदेनवक्ष्यंते । **चंद्रिकायांपाद्मे**—गंधेभ्यश्चदनंपुण्यंचंदनादगरुर्वरः
तुततोवरम् । **मदनरत्नेगारुडे**—कस्तूरिकायाभागौद्वौचत्वारश्चदनस्यतु । कुंकुमस्यत्रयश्चैवशशिनःस्यात्तन
ुमचसमांशके । सर्वगंधमितिप्रोक्तंसमस्तसुरवल्लभम् । **काशीखंडे**—कस्तूरिकायाद्वौभागौद्वौभागौकुंकुमस्यतु
त्वेकएवहि । **यक्षकर्दम**इत्येपसर्वदेवमनोहरः । **मदनरत्ने**—कर्पूरमगरुश्चैवकस्तूरीचदनंतथा । कंकोलंच
**विष्णुधर्मोत्तरे**—दारिद्र्यंपद्मकंकुर्यादस्वास्थ्यंरक्तचंदनम् । **उशीरं**विप्रविभ्रंशमन्येकुर्युरुपद्रवम् । केवलनिं
**पंचायतनसारः** । **गारुडेस्कांदेच**—योददातिहरेर्नित्यंतुलसीकाष्ठचदनं । पितॄणांचविशेषेणसदाभीष्टंहरेर्य
नजनार्दनम् । विलेपयतियोनित्यंलभतेचिंतितफलम् ॥
**ऽपाणि** । पुष्पदानंकराभ्यामितिकेचित् । तन्न । तत्रदक्षिणकरनियमात् । पुष्पांजलिविधानजलिविधेश्च

१ तृणविशेष । २ दर्प जवादि ।

ति । यच्च—तावेवकेवलौश्लाघ्यौयौतत्पूजाकरौकराविति । तत्कथंचिल्लब्धकरद्वयव्यापारानुवादइति**टोडरानं**
तिवयम् । **पाद्मे**—श्यामापितुलसीविष्णोःप्रियागौरीविशेषतः । **विष्णुरहस्ये**—तुलसीप्राप्ययोनित्यंनकरो
ामिनपूजांशतवार्षिकीम् । **विष्णुधर्मे**—रक्तान्यकालजातानिचैत्यवृक्षोद्भवानिच । श्मशानजातपुष्पाणिनैवदेया
ग्रगंधिपुष्पंनागंधिनकंटकिजम् । कंटकिजमपिशुक्लंसुगंधिदद्यात् । नरक्तंदद्यात् । रक्तमपिकुंकुमंजलजंचदद्या
ष्कैःपूजयेद्देवंकुसुमैर्नमहीगतैः । नविशीर्णदलैःस्पृष्टैर्नाशुभैर्नाविकासिभिः । अतिगंधीन्यगंधीनिअम्लगंधी
तियेषांविकासोनजातः । येषांतुविकासोत्तरंमुकुलत्वंकमलादीनांतेषांसूर्यएवनिषेधइतिवक्ष्यते । **भविष्ये**—के
निच । स्वयंपतितपुष्पाणित्यजेदुपहतानिच । मुकुलैर्नार्चयेद्देवमपक्वंननिवेदयेत् । गंधवंत्यपवित्राणिकुसुमा
ग्रपवित्रंयत्कुशादिकम् । **तिथ्यालोकेमत्स्यसूक्ते**—बंधुजीवंचद्रोणंचसरस्वत्यैनदापयेत् । **विष्णुधर्मो**
मैरर्चयेद्धरिम् । गृहेजातोयःकरवीरस्तदुत्थैरित्यर्थइति**पंचायतनसारः** । यथाश्रुतमेवतुयुक्तम् । **गि**
नार्कनोन्मत्तकंकिंचित्तथैवगिरिकर्णिकाम् । नकंटकारिकापुष्पमच्युतायनिवेदयेत् । कुटजंशाल्मलीपुष्पंशिरी
ंनिःस्वतांचप्रयच्छति । करानीतंपटानीतंतत्पुष्पंसकलंत्यजेत् । करोवामः । पटोऽधोवस्त्रम् । देवोपरिधृतं
नवस्त्रधृतंयच्चतत्पुष्पंपरिवर्जयेदिति**पंचायतनसारात्** । **विष्णुः**—याचितंनिष्फलंपुष्पंक्रयक्रीतंचनिष्फलम्
वकार्यनिषेधेसिद्धे । नदेवकार्यंकुर्यादिति**हारीतोक्तिः**दैवार्थपुष्पनैवेद्यादीत्येतदर्थैति**कल्पतरुः** । **विष्णु**
नलांतःक्षालितचयत् । देवतास्तत्रगृह्णंतिपुष्पंनिर्माल्यतांगतम् ॥ **पर्युषितदिनविचारः** । **हलायुधेभविष्**

त्यजेत्पर्युषितानिच । तुलस्यगस्तिबिल्वानांनास्तिपर्युषितात्मता । **मदनपारिजाते**—जलंपर्युषितंत्याज्यंपत्राणिकु
निगांगंवारिनदुष्यति । **विष्णुधर्मोत्तरे**—तुलस्यांबिल्वपत्रेचजलजेषुचसर्वशः । नपर्युषितदोषोस्तिम
पलाशदिनमेकचंपकंजंचदिनत्रयम् । पंचाहंबिल्वपत्रंचदशाहंतुलसीदलम् । पर्युषितंनेत्यर्थः । **हलायुधे**—
चैवहि । तेषांपर्युषिताशंकाकार्यापंचदिनोर्ध्वतः । तीर्थसौख्येप्राप्ते—तुलसीनोपर्युषिताबिल्वंचत्रिदिनावधि
र्युषितंविदुः । तत्रैवस्कांदेदमनमुपक्रम्य—तस्यमालाभगवतःपरमप्रीतिकारिणी । शुष्कापर्युषितावापिन
संख्यातिक्रमेपिमालाकारगृहस्थमदुष्टमितिशैवागमः । **स्मृतिसारावल्यां**—जलजानांचसर्वेषांपत्राणाम
सुवर्णकृतयोरपि । नपर्युषितदोषोस्तितीर्थतोयस्यचैवहि । **वोपदेवः**—बिल्वापामार्गजातीतुलसिशमिशतां
मुनितिलतगरब्रह्मकह्लारमल्ली । चंपाश्वारातिकुंभादमनमरुबकाबिल्वतोहानिशस्तात्रिंशत्येकार्यरीशोदधिनिधिवसु
—शताशतावरी । मदोमदारः । अहिर्नागचंपकः । मुनिरगस्त्यः । ब्रह्मपलाशम् । कह्लारकुमुदम् । ते
करवीरः । अरीषट् । ईशःएकादश । उदधिश्चत्वारः । निधिर्नव । वसुरष्टौ । भूरेकः । यमौद्वौ । त्रि
र्भमारभ्यत्रिंशदादिसंख्ययापुनर्गणयेदित्यर्थः । **तत्वसागरसंहितायां**—यद्वापर्युषितैश्चापिपुष्पाद्यैरविकारि
ःप्रोक्ष्यैवप्रपूजयेत् । **पारिजातेआदित्यपुराणे**—शिवेकुंदंमदतीचयूथींवधूककेतकम् । जपांरक्तत्रिसंध्येद्वे
णचैवहयारिंवर्वरींत्यजेत् । नशस्तंशाल्मलपुष्पंकूष्मांडंचनशोभनम् । कलिकामुकुलैर्नेज्याविनाचंपकपंकजैः । पु
चूरशाल्मलीकांचनालजम् । निषिद्धंविष्णुपूजायांपुष्पंचैभीतकतथा । निषिद्धंविद्धितंविष्णौशिरीषंशक्रपुड्कम् ।

द्वयम् । **चंद्रिकायाम**प्येवम् । **मदनपारिजाते विष्णुधर्मे**—क्रकचाख्यस्य पुष्पाणि तथा धत्तूरकस्य च
जनार्दने । शाल्मलं च शिरीषं च बृहतीं गिरिमल्लिकाम् । सर्जकं चैव कूष्मांडं कंचनारं च वर्जयेत् । **शातातपः**—
था । निषिद्धमित्यर्थः । **कार्तिकमाहात्म्ये**—गणेशं तुलसीपत्रैर्दुर्गां नैव तु दूर्वया । मुनिपुष्पैस्तु सूर्यं च लक्ष्मीक
बिल्वेनार्चयेद्धानुं न केतक्या महेश्वरम् । नाक्षतैः पूजयेद्विष्णुं न तुलस्या गणाधिपम् ॥

ग्रहणादौ **विशेषः** । **हारीतः**—स्नानं कृत्वा तु ये केचित्पुष्पं चिन्वंति मानवाः । देवतास्तन्न गृह्णंति भस्मी भवति
म् । अस्नात्वा तुलसीं छित्त्वा देवतापितृकर्मणि । तत्सर्वं निष्फलं याति पंचगव्येन शुध्यति इति **पाद्मोक्तेः**
पुष्पमात्रपरम् शिष्टाचारानुरोधादिति **रुद्रधरः** । **देवयाज्ञिकनिबंधे स्मृतिसारे**—श्रवणे च व्यतीपाते भौम
तौ द्वादश्यां सूतकद्वये । तुलसीं ये विचिन्वंति ते छिंदंति हरेः शिरः । क्वचिच्छ्रवणस्थाने वैधृतिपदम् । **पाद्मे**—भृ
। ये विचिन्वंति तुलसीं ते छिंदंति हरेः शिरः । **विष्णुधर्मोत्तरे**—रविवारं विना दूर्वां तुलसीं द्वादशीं विना । जी
र्मवित् । तथा—संक्रांतावर्कपक्षांते द्वादश्यां निशि संध्ययोः । यैश्छिन्नं तुलसीपत्रं तैश्छिन्नं हरिमस्तकम् । **विष्णु**
दश्यां वैष्णवः क्वचित् । **हरिभक्तिविलासे**—संक्रांत्यादौ निषिद्धोपि तुलस्यवचयः स्मृतौ । परं श्रीविष्णुभक्तैस्तु द्वाद
ष्णतुलस्याम् ।—तुलसी कृष्णतुलसी तथा रक्तं च चंदनम् । केतकीपुष्पपत्रं च सद्यस्तुष्टिकरं हरेरिति **भविष्ये** कृ
त्वाभावात् । जीरकं कृष्णजीरकमितिवत् । **पाद्मे**—द्वादश्यां तुलसीपत्रं धात्रीपत्रं च कार्तिके । लुनाति स नरो ग
**यामले**—देवार्थे तुलसीछेदो होमार्थे समिधस्तथा । इंदुक्षये न दुष्येत गवार्थे पितृणस्य च । **पाद्मे**—तुलस्यमृतज

केशवार्थविचिन्वामिवरदाभवशोभने । इतितुलसीग्रहणमत्रः । **अवंतीखंडेस्कांदे**—येऽर्चयतिहरेर्मूर्तिंको
वर्णानांदानस्यफलमाप्नुयुः । तत्रैव—सुमजर्यासदलयातुलसीभवयाहरेः । पूजांकुर्वीतयोनित्यंसपूजाफलमश्नु
फलेदार्वेन्यर्थेचगोस्तृणम् । देवतार्थचकुसुममस्तेयंमनुरब्रवीत् । इदंद्विजपरम् । द्विजस्तृणैवःपुष्पाणिसर्वतःस्व
कः । एतन्नित्यपूजापरम् ।—पारक्यारामसजातैःकुसुमैरर्चयेत्सुरान् । तेनपापेनलिप्येऽहंयदेतदनृतभवेदितिना
ः । **आह्निकप्रदीपेस्कांदे**—पत्रंवायदिवापुष्पंफलंनेष्टमथोसुखम् । दुःखदतत्समाख्यातयथोत्पन्नप्रदापयेत्
विधिविना॥ ॥**लक्षपूजायांविशेषः**। लक्षपूजासुसर्वासुपुष्पमेकैकमर्पयेत् । समुदायेनचेत्पूजालक्षपुष्पार्प
गंयथेच्छमितिपंचायतनसारे । **जटमल्लेः**—येपांशंसंतिपुष्पाणिप्रशस्तान्यर्चनेहरेः । पल्लवाअपितेपांस्युःफ
बिल्वपत्रंशमीपत्रतुलस्यामलकंतथा । कुशपत्रंभृंगराजसदाग्राह्यहरेर्बुधैः । **बिल्वपत्रेविशेषः शिवधर्मो**
च्छिन्नाग्रैस्त्रिपत्रकैः । वामपत्रेवसेद्ब्रह्मापद्मनाभश्वदक्षिणे । पत्राग्रेलोकपालाश्चमध्येपत्रेसदाशिवः । पृष्ठभागे
र् । तस्माद्वैपूर्वभागेनअर्चयेद्गिरिजापतिम् । **जटमल्ले**—येपांशंसतिपुष्पाणिप्रशस्तान्यर्चनेहरेः । पल्लवाअ
**भविष्ये**—फलानामप्यलाभेतुतृणगुल्मौषधीरपि । औपधीनामभावेतुभक्त्याभवतिपूजितः । मनसापूजयेदि
पः । **तिथितत्त्वेकालिकापुराणे**—मधुमुस्ताघृतगंधोगुग्गुल्वगरुशैलजम् । सरलसिद्धसिद्धार्थादशांगोधूप
भागकुष्ठद्विगुणोगुडश्चलाक्षात्रयंपंचनखस्यभागाः । हरीतकीसर्जरसश्चमांसीभागैकमेकत्वथशैलजस्य । घनस्यच
तोमुनीन्द्रैः । द्विगुणोब्धंशः । शैलजंमध्यदेशेतूलइतिप्रसिद्धम् । घनोमुस्ता । पुरोगुग्गुलुः । **व्रतहेमाद्रौभ**

कंवृषणंतथा । समभागंतुकर्तव्यंधूपोयममृताह्वयः । तथा—श्रीखंडंग्रंथिसहितमगरुंसिह्लकंतथा । मुस्तातथेंदुर्भू
गोऽनंतधूपश्चकथितोदेवसत्तम । तथा—कृष्णागरुंसिह्लकंचवालकंवृषणंतथा । चंदनंतगरंमुस्ताप्रबोधःशर्करान्वि
मुशीरसिह्लकंतथा । ग्रथिकंवृषणंभीमकुंकुमंगृंजनंतथा । हरीतकीतथोशीरयक्षधूपउदाहृतः । तथा—वृषणंसि
कर्पूरंचतथामुस्ताशर्करासत्वचंद्विज । इत्येषविजयोधूपःस्वयंदेवेननिर्मितः । वृषणंकस्तूरिकेति**समयप्रदीपः**
ालवंगके । अगरुंसिह्लकंधूपंप्राजापत्यंप्रचक्षते । श्रीखडंतगरंकुष्टंकर्पूरसिह्लकतथा । महानयस्मृतोधूपःप्रियोदेवस्य
**ः**—रुंहिकाख्यंकणंदारुसिह्लकंसागरुंसितम् । शंखंजातीफलश्रीशेधूपानिस्युःप्रियाणिवै । रुहिकामांसी । कणो
। शंखंनखी । **नारसिंहे**—विनामृगमदंधूपेजीवजातंविवर्जयेत् । एतच्चसिहान्यपरम् । महिषाख्यंगुग्गुलं
दातिराजेंद्रनरसिंहायभक्तिमानितितत्रैवोक्तेः । देव्यादौतस्यवक्ष्यमाणत्वाच्च । तत्रैव—कृष्णागरुसमुत्थेनधूपेन
तुसमुक्तोनरकार्णवात् । **गौतमः**—तीर्थकोटिशतैर्धौतोयथाभवतिनिर्मलः । करोतिनिर्मलंदेहंधूपशेषस्तथाहरेः
ष्णोःकराभ्यांयःप्रविदते । कुलकोटिंसमुद्धत्ययातिविष्णोःपरंपदम् ॥

। **नारसिंहे**—घृतेनवाथतैलेनदीपंप्रज्वालयेन्नरः । **अथमहादीपःव्रतहेमाद्रौविष्णुधर्मे**—महावर्ति
देवस्यदक्षिणेपार्श्वेदेयातैलतुलानृप । पलाष्टकयुतांराजन्वर्तिंतत्रप्रकल्पयेत् । महारजनरक्तेनसमग्रेणतुवासस
लानृप । पलाष्टकयुतांपुण्यांशुक्लांवर्तिंचदीपयेत् । वाससातुसमग्रेणसोपवासोजितेंद्रियः । एवंवर्तिद्वयमिदंसकृ

पाठ ।

द्यादभीष्टामनयोर्द्वयोः । दीपदानंमहासत्रंकृत्वाफलमुपाश्नुते । **दीपनिर्वाणनिपेधोभविष्ये**—तांश्चद
् । कुर्वीतदीपहिंसांयोमूपकोंऽधःप्रजायते । **भविष्योत्तरे**—प्रज्वाल्यदेवदेवस्यकर्पूरेणतुदीपकम् । अ
त् । **संवर्तः**—देवागारेद्विजानांचदीपदत्वाचतुष्पथे । मेधावीज्ञानसपन्नश्चक्षुष्मान्जायतेनरः ॥

द्यं । **कृष्णभट्टीये**—नैवेद्यजलपुष्पादौवेनुमुद्रांप्रदर्शयेत् । **गोविंदराजीयेब्रह्मांडे**—पत्रपुष्पफलं
नैवेद्यनभुंजीतयदाहारायकल्पितम् । तत्रैव**पाद्मे**—अनिवेद्यहरेर्भुंजन्सप्तजन्मनिनारकी । निवेदितस्यभक्ष
: । तन्न । यद्भक्षयेत्तन्निवेदितमितिवाक्यार्थात् । अनिवेदितभक्षणनिपेधात्सर्वान्ननिवेदननिपेधः । अ
न्ननिवेदनद्वारासर्वान्ननिवेदनमितिवाच्यम् । उद्धरणाविधानात् । तद्विधानेपिसर्वपुरोडाशत्यागवत्सर्वान्ननि
नसर्वस्यनिवेदितत्वांगीकारेलक्षणापानाच्च । पाकैक्येनिवेदितेनैववैश्वदेवःस्विष्टकृद्वत् । **यत्तुशातातपः**—एक
वेदनम् । वैश्वदेवततःशिष्टाब्यासस्यवचनयथेतिशिष्टपदतत्सर्वपुरोडाशत्यागे शेपात्स्विष्टकृतवद्विष्णोर्निवेदितान्नेन
क्तेः सर्वनिवेदनेप्युपपन्नमितिगोविंदराजः । **भट्टदिनकरस्तु** वैश्वदेवार्थनैवद्यार्थपाकभेदेनिवेदितमेवसंस्कृत
कम् । एकभक्षणेन्यतरनियमबाधात् । उभयभक्षणेनियमद्वयबाधात् । अतोनिवेदितमेवभक्षयेदितिवचोहोमासा
वभक्षयेदितिहविष्यपर । यद्वानिवेदितमेवभक्षयेदितिवैश्वदेवानधिकारिपरम् । अथवापाकैक्येप्यहविष्यस्यैवपाव
तत्वमस्त्येव । नहिपाकभेदेवैश्वदेवभेदः । महानससंस्कारत्वाद्वैश्वदेवस्य । एवंनिवेदितत्वमपिनचसर्वनिवेदन ।
सर्वान्नदाहाद्यापत्तेः । पाकैक्येप्येवम् । तस्मादुद्धृत्यैवनिवेदनमित्याह । **विष्णुः**—मेपीमहिपीछागीनांदुग्धदधि

सीदलसंमिश्रंहरेर्यच्छतियःसदा । **नैवेद्यमित्यादिस्मृतिरत्नावल्याम्** । नैवेद्यस्यत्वभावेतुफलान्यपिनिवेदयेत
ुल्मौषधीरपि । औषधीनामलाभेतुतोयान्यपिनिवेदयेत् । तदलाभेतुसर्वत्रमानसंप्रवरंस्मृतम् । **नैवेद्यां**
**ग्रहे**—विष्वक्सेनायदातव्यंनैवेद्यस्यशतांशकम् । पादोदकंप्रसादंचलिंगेचंडेश्वरायतु । **तद्विधिःपंचरा**
र्येयथाविधि । मुख्यादीशानतःपात्रान्नैवेद्यांशंसमुद्धरेत् । **टोडरानंदेविष्णुधर्मे**—फलानिदत्वादेवेभ्यःस
**लंभविष्ये**—फलंचकथितंविद्धंक्रमिभिस्तद्विवर्जयेत् । यत्नपक्वमपिग्राह्यंकदलीफलमुत्तमम् । **अथतांबू**
यंदत्वास्वर्गमवाप्नुयात् । इति ॥

**रः । टोडरानंदेचंद्रिकायांचवाराहभविष्ययोः**—प्रणम्यदंडवद्भूमौनमस्कारेणयोर्चयेत् । सयांगतिमव
**युधे**—नदेवंपृष्ठतःकृत्वाप्रणामंकचिदाचरेत् । वरमुत्थायकर्तव्यंनवृथाभ्रमणंचरेत् । तत्रैव—एकहस्तप्रणाम
दर्शनंचैवपुण्यंहंतिपुराकृतम् । एकेतिचंडान्यपरम् । तस्याएकप्रदक्षिणायावक्ष्यमाणत्वात् । **गोविंदराजीये**
समीपेगर्भमंदिरे । जपहोमनमस्कारान्नकुर्याद्देवतालये । **वाराहे**—वस्त्रप्रावृतदेहस्तुयोनरःप्रणमेतमाम् ।
मामिनि । इदंपरिधानीयान्यपरम् । **चंद्रिकायांनारसिंहे**—नमस्कारेणचैकेनअष्टांगेनहरिंस्मरेत् । पद्भ्यां
ृता । दोर्भ्यांपद्भ्यांचजानुभ्यामुरसाशिरसातथा । मनसावचसाभक्त्याप्रणामोष्टांगईरितः । **चंद्रिकायांतु**—
ायापिच । पद्भ्यांकराभ्यांवाचाचप्रणामोष्टांगउच्यतेइत्युक्तम् । **संग्रहे**—शिरोहस्तौचजानूचचिबुकंबाहुकद्वय
द्भिःसमुदाहृतः । **पाद्मे**—भूमिमापीड्यजानुभ्यांशिरआसेव्यवैभुवि । प्रणमेद्योहिदेवेशंसोऽश्वमेधफलंलभेत् ॥

दक्षिणा । **वाराहे**—प्रदक्षिणंनकर्तव्यपुरतःपृष्ठदर्शनात् । चक्रवद्भ्रामयेदंगंपृष्ठतोगनदर्शयेत् । अत्रविशेषोत्रक्ष
कर्पूरंयेकुर्वतिदिनेदिने । तेप्राभुवतिसायुज्यनात्रकार्याविचारणा । **टोडरानंदेविष्णुधर्मे**—गीतवादित्रदा
क्षणीयकदानेनरूपवानभिजायते । प्रेक्षणीयनृत्यगीतादि । **अथशंखपूजाभविष्ये**—त्रैलोक्येयानिभूता
वसंतिविप्रेंद्रतस्माच्छखप्रपूजयेत् । **तत्रमंत्रः**—त्वपुरासागरोत्पन्नोविष्णुनाविधृतःकरे । निर्मितःसर्वदेवैश्चपां
नारीणांविशीर्यंतेसहस्रशः । तवनादेनपातालेपांचजन्यनमोस्तुते । **वाराहे**—द्वौशखौनार्चयेदिति । **शिवा**
हे—शंखमानंतुप्रादेशंचतुरगुलमुच्छ्रितम् । **क्रियासारे**—प्रस्थांबुप्रमितःशखःश्रेष्ठस्तत्र्यंशपूरकः । मध्यस्त
। गोक्षीरधवलःस्निग्धोदीर्घनालोवृहत्ततुः । वृत्तोयोदक्षिणावर्तःसज्ञेयःशंखसज्ञकः । पूर्वोक्तलक्षणोपेतोवामावर्तो
यः । **मदनरत्नेस्कांदे**—पलद्वयेनप्रसृतद्विगुणकुडवंमतम् । चतुर्भि कुडवैःप्रस्थआढकस्तैश्चतुर्गुणैः । चतुरा
। इति ॥

**ाधिकारिणः** । **तत्रविष्णुपुराणे**—ब्राह्मणःक्षत्रियोवैश्यःशूद्रश्चपृथिवीपते । स्वधर्मतत्परोविष्णुमारा
**लिग्राममाहात्म्ये**—ब्राह्मणक्षत्रियविशांस्त्रीशूद्राणामथापिवा । शालग्रामेधिकारोऽस्तिनान्येषांतुकदाचन । अ
**ाद्रौ**—चत्वारोब्राह्मणैःपूज्यास्त्रयोराजन्यजातिभिः । वैश्यैर्द्वाविवसपूज्यौतथैकःशूद्रजातिभिः । ब्राह्मणैर्वासुदे
ःपूज्यतेवैश्यैरनिरुद्धस्तुशूद्रकैः । **प्रयोगपारिजाते मंत्रराजानुष्ठानविधाने**—शालग्रामशिलांवापिचक्रां

वंतीर्थानिपाचजन्यनमोस्तुते इति पाठ ।

त्यंक्षत्रियादिर्नपूजयेत् । क्षत्रियादिरदीक्षितः । नित्यंसर्वदा । अतोब्राह्मणस्यादीक्षितस्यापिशालिग्रामपूजानित्या
। अत्रदीक्षामंत्रविहीनेपीत्युक्तेः अयंविनैवमंत्रेणपुण्यराशिःप्रकीर्तितइतिविष्णुपूजाप्रकरणे**भविष्योक्तेश्च** । विष्णुपू
ान्यत्रेतिटोडरानंदः । तेनादीक्षितस्यापिक्षत्रियादेर्मूर्तिपूजनेऽधिकारः । **स्मृत्यर्थसारे**—स्त्रीणामप्यधिका
ुस्मृतिकौमुद्यांशूद्राचारशिरोमणौच मनुः—जपस्तपस्तीर्थयात्राप्रव्रज्यामंत्रसाधनम् । देवताराधनं
स्पर्शवत्पूजापरम् ।—आर्जवंलोभशून्यत्वंदेवब्राह्मणपूजनम् । अनभ्यसूयाचतथाधर्मःसामान्यउच्यत इतिटोड
धर्मोश्चतुर्वर्णपराइति **व्रतहेमाद्रौविज्ञानेश्वरीयेच** । स्त्रीशूद्रपतनानिषडितिशूद्रस्यद्विजसेवाऽविरोधेनस्त्रियास
ादाः । **जातिविवेके**—स्पर्शनंदेवतानांचकायस्थायविवर्जयेत् । नास्याधिकारोधर्मेस्तीति**मनुव्याख्याने**
ार्चनादौनशूद्रस्यनित्योधिकारइति । शूद्रादेःपूजास्पर्शविना ।—स्त्रीणामनुपनीतानांशूद्राणांचजनेश्वर । स्पर्
रस्यवेति**बृहन्नारदीयात्** । यदिभक्तिर्भवेत्तस्यस्त्रीणांनापिवसुंधरे । दूरादेवास्पृशन्पूजांकारयेत्सुसमाहितइति
णुंनस्पृशेच्छ्रेयइच्छती । अनाथावासनाथावातस्यानास्तीहनिष्कृतिरिति**पंचायतनसाराच** । सांप्रदायिकास्तु
तपरत्वाद्विधिषुतत्पदंदीक्षितपरम् । अतोदीक्षितानांतेषांशालग्रामपूजास्पर्शवत्यपिभवति । स्पर्शनिषेधोऽदीक्षि
ाव्यवस्थाकल्पनेमानाभावात् । अतोऽदीक्षितस्यपूजैवन । **यत्तु**—मातरःसर्वलोकैस्तुस्थाप्याःपूज्याःसुरोत्तमेति
यपरमितिकेचित् । दीक्षितस्याप्यस्पर्शेनेतियुक्तम् । विष्णुमूर्तेःप्रतिष्ठायांचाधिकारः—चतुर्वर्णैस्तथाविष्णुःप्रति
**ौदेवीपुराणात्** । अन्येतुसर्वपदसंकोचेमानाभावात्—ब्राह्मणःक्षत्रियोवैश्यःशूद्रोवायदिवास्त्रियः । पूजयेन्

लमितिदेवीपुराणाच्च शुचित्वस्यनैमित्तिकपरत्वादीक्षितस्यतत्पूजाभवतीत्याहुः । कौमुद्यांनारसिंहे शूद्रा
नरसिंहस्यपूजन । कुर्यादितिशेषः। तत्रैव—ब्राह्मणाःक्षत्रियावैश्याःस्त्रियःशूद्रांत्यजातयः। संपूज्यतंसुरश्रेष्ठंभक्त्यासिंह
च्छूद्रानतुचंडालादयः। चंडालाःसर्वधर्मबहिष्कृताइतिस्मृतेः । लिङ्गेपिचातुर्वर्ण्यस्याधिकारउक्तःशिवर
तेदेविलिंगेमांचजगत्पतिम् । ब्राह्मणःक्षत्रियोवैश्यःशूद्रोवामत्परायणः । तस्यप्रीतःप्रदास्यामिशिवॉल्लोकाननुत्तमा
मनुः—देवताभ्यर्चनंचैवसमिदाधानमेवच । कुर्यादितिसवधः । तिथितत्वेस्कांदे—शूद्रःकर्माणियोनित्यंस्वं
गृह्णामिचंद्रखंडविभूषिते । इदंपुराणप्रसिद्धजीर्णलिंगविषयमिति त्रिस्थलीसेतौभट्टपादाः । नूतनलिंगप्र
मंत्रविद्भिर्यथाविधि । तदाप्रभृतिशूद्रश्चयोपिद्वापिनसंस्पृशेदितिवृहन्नारदीयादस्पर्शपूजाकल्पकाभावाचनाधिक
पिसंस्थाप्यतुयजेत्सदेतिदेवीपुराणं तत्रयतिसाहचर्याद्ब्रह्मपदंद्विजपरम् । नचपरप्रतिष्ठितलिंगादिपूजायुक्ता—
नमेन्नरः । तस्येहनिष्कृतिर्नास्तिप्रायश्चित्तगतैरपीतिबृहन्नारदीयेअनमस्कार्यत्वोक्तेः । नचैतदन्यथानुप
पनं अन्यदीयलिंगपूजानिषेधेनापिचरितार्थत्वात् । तिथितत्वेस्कांदे—ब्रह्मचारीगृहस्थोवावानप्रस्थव्रतेस्थितः
बेकापतिम् । संन्यासीदेवदेवेशंप्रणवेनैवपूजयेत् । नमोतेनशिवेनैवस्त्रीणांपूजाविधीयते । बौधायनः—स्त्रीशू
नम् । सर्वैवागममार्गेणकुर्युर्वेदानुसारिणा । पंचायतनसारेभागवते—वैदिकस्तांत्रिकोमिश्रइतिमेत्रिविधोम
विप्रादीनांविधीयते । तांत्रिकोविष्णुभक्तस्यशूद्रस्यापिप्रकीर्तितः ॥

---

प्रस्थश्चसुव्रत ।

ानुष्टुप्विधाने—श्रौतार्चनंतुविप्राणांविशेषेणभवेत्सदा । स्मार्तागमार्चनंक्षत्रेवैश्येकेवलमागमः । तस्माद्देवार्चनं
चपरिशिष्टे—प्रतिमाःप्राङ्मुखीरुदङ्मुखोयजेतान्यत्रप्राङ्मुखःसंभृतसंभारोयजनभवनमेत्यद्वारेस्थित्वाहस्तताल
भुविसंस्थिताः । येभूताविघ्नकर्तारस्तेनश्यंतुशिवाज्ञयेतिविघ्नानुद्वास्यप्रविश्य येभ्योमातामधुमत्पिन्वतेपयएवापित्रो
भासने—पृथिवित्वयाधृतालोकादेवित्वंविष्णुनाधृता।त्वंचधारयमांदेविपवित्रंकुरुचासनमित्युपविश्यायतप्राणःक
त्रेनपूरयित्वागंधाक्षतपुष्पाणिप्रक्षिप्यसावित्र्याभिमंत्र्यतीर्थान्यावाह्याभ्यर्च्य पत्रपुष्पाणितदुदकेनापोहिष्ठीया
ाभ्युक्ष्यक्रियांगोदकुंभंगंधादिभिरभ्यर्च्यनमोंतनाम्नातत्तन्मंत्रेणवोपचारान्कुर्यादावाहनमासनंपाद्यमर्घ्यमाचमनीयं
पवीतमाचमनंगंधपुष्पाणिधूपंदीपमुपहारमाचमनंसुखवासंस्तोत्रंप्रणामंप्रदक्षिणाविसर्जनंचकुर्यादसंपन्नोमनसासंप
मस्तोत्रंप्रदक्षिणाविसर्जनांगम् । अथमंत्राः—गणानांत्वेतिगणपतेः । कुमारश्चित्पितरमितिस्कंदस्य । आकृष्णे
रस्वत्याः। जातवेदसइतिशक्तेः । त्र्यंबकमितिरुद्रस्य । गंधद्वारामितिश्रियः। इदंविष्णुरितिविष्णोरेवंषोडशेमानुपचा
वेत्र्यावाजातवेदस्यावाप्राजापत्यावाव्याहृतिभिर्वाप्रणवेनवाकुर्वतिसएषदेवयज्ञोऽहरहर्गोदानसंमितःसर्वाभीष्टप्रदः
कुर्वीतेति । **टोडरानंदेवाराहे**—अभावेवेदमंत्राणांपंचरात्रोदितोविधिः । उदङ्मुखइतिस्थिरप्रतिमाविषयमिति
**ात्म्येपाद्मे**—स्वर्णघर्मानुवाकेनमहापुरुषविद्यया । पौरुषेणचसूक्तेनसामभीराजनादिभिः । अर्चयेदितिशेषः
**न्क्य:**—दद्यात्पुरुषसूक्तेनयःपुष्पाण्यपएववा । अर्चितंस्याज्जगदिदंतेनसर्वंचराचरम् ।
**सादि। शौनकः**—अंगुष्ठाग्रेतुगोविंदंतर्जन्यांतुमहीधरम्। मध्यमायांहृषीकेशमनामिक्यांत्रिविक्रमम् ।कनिष्ठिक्य

म् । एवंन्यासंपुराकृत्वादेहांगन्यासमाचरेत् । मस्तकेकेशवंन्यस्यभालेनारायणंतथा । माधवंकर्णयोरक्ष्णोर्विष्णुंचैवत्
देशेत्रिविक्रमम् । वामनंविन्यसेद्बाह्वोःश्रीधरंहृदिविन्यसेत् । नाभ्यांविद्याद्धृषीकेशंकट्यांत्रैपद्मनाभकम् । दामोदरंप
तःपुरुषसूक्तेनसर्वांगन्यासंसमाचरेत्।अपरार्केनारसिंहे—आनुष्टुभस्यसूक्तस्यत्रिष्टुब्वतस्यदेवता।पुरुषोयोजगद्बीजम्
सेद्वामेद्वितीयांदक्षिणेकरे । तृतीयांवामपादेतुचतुर्थींदक्षिणेपदे । पचमींवामजानौतुषष्ठींवैदक्षिणेन्यसेत् । सप्तमींवाम
नवमींनाभिमध्येतुदशमींहृदयेतथा । एकादशींकठदेशेवामबाहौततःपराम् । त्रयोदशींदक्षिणेतुआस्यदेशेचतुर्दशीम
मूर्ध्निविन्यसेत् । यथादेवेतथादेहेन्यासकृत्वाविधानतः । एवंन्यासविधिंकृत्वापश्चाद्यागंसमाचरेत् । गोविंदराजं
ङगन्यासइत्येकेउत्तरेपुरुषसूक्तके। अद्भ्यःसंभूतइतिहृदयायनमः। वेदाहमितिशिरसेस्वाहा । प्रजापतिश्चरतीतिशिख
यहुम् । रुचंब्राह्ममितिनेत्रत्रयायवौषट् । श्रीश्चेत्यस्त्रायफट् । चंद्रिकायांनारदीये—एवंन्यासंतुकृत्वादौपश्चाद्देव
भेरात्मानंचार्चयेद्बुधः। ततःपीठसमाराध्यगधपुष्पाक्षतैःशुभैः। ऋग्विधाने—वक्ष्येपुरुषसूक्तस्यविधिनात्वर्चनेपुनः
त्तमम्। द्वितीययासनदद्यात्पाद्यंचैवतृतीयया। चतुर्थ्यार्घ्यप्रदातव्यंपंचम्याचमनीयकम् । षष्ठ्यास्नानंप्रकुर्वीतसप्तम
यानवम्यागंधमेवच। दशम्यापुष्पदानचएकादश्यातुधूपकम्।द्वादश्याचतथादीपंत्रयोदश्योपहारकम् । चतुर्दश्यानां
। पोडश्योद्वासनकुर्यादेवमेवसमर्चयेत् । पौरुषेणचसूक्तेनतद्विष्णोःपरमेणच। नैताभ्यांसदृशोमन्त्रोवेदेपूक्तश्चतुर्ष्वपि।
कृत्वापोडशभिर्मंत्रैःषोडशान्नस्यचाहुतीः । शेषंनिवेदयेत्तस्मैदद्यादाचमनंततः । जानुभ्यांधरणींगत्वामूर्ध्नाहरिमथोवहे

मारभेत् ।

णिषोडश । तच्चसर्वंजपेद्भूयःपौरुषंसूक्तमुत्तमम् । षण्मासात्सिद्धिमाप्नोतिह्येवमेवसमर्चयेत् । **पूजांतेकर्तव्यमाह**
वेदयेत्तदात्मानंतद्विष्णोरितिमंत्रतः । **पाद्मे**—ब्रह्माणंविष्णुमीशंवासूर्यमग्निगणाधिपम् । दुर्गांसरस्वतीलक्ष्मीगौरींवा
नेनापिनप्रत्यवैतीत्यर्थः। **केचित्तुपंचायतनपूजांनित्यांब्रुवते**—शिवंभास्करमग्निंचकेशवंकौशिकीमपि । मन
तिम्। वरंप्राणपरित्यागःशिरसोवापिकर्तनम्। नत्वसंपूज्यभुंजीतकौशिकीकेशवंशिवमिति**कालिकापुराणा**दित्य
कःकार्तिकेयोविनायकइति**भविष्योत्तरा**त्तत्पूजामाहुः । एतेनाग्निस्मार्तमितिवदन्नर्थानभिज्ञत्वादपास्तः
त्वज्ञानवानिति**वर्धमानसमयप्रदीपादयः**। पुष्पाद्यभावेमनसापिपूजयेदितिवयम् । केचित्तुविष्णुपूजैवनित्या
यस्त्वेषांपूजायाअकरणेनिंदार्थवादःससंकल्पेसतिनित्यतापरइति**श्रीदत्तवाचस्पती** ।'तन्न । विष्णुपूजायामपित
गौरीवानित्यमर्चयेदिति**पाद्मे**वाशब्दश्रवणेपि—तस्मादनादिमध्यांतंनित्यमाराधयेद्धरिमिति**चंद्रिकायांकौर्मा**द्धि
ग्रामशिलांवापिचक्रांकितशिलांतथा । ब्राह्मणःपूजयेन्नित्यंक्षत्रियादिर्नपूजयेदिति**मंत्रराजानुष्टुब्विधानात्** । श
किंचन । सचंडालोहिविष्ठायामाकल्पंजायतेकृमिरिति**हलायुधा**च्चशालग्रामपूजैवनित्येतिकेचित् । अन्येतुपूर्वव
तिपंचायतनसारात्—केशवार्चागृहेयस्यनतिष्ठतिमहीपते। तस्यान्नंनैवभोक्तव्यमभक्षणसमंस्मृतमिति**हला**
ुः । अत्रविष्णोरर्चेतिपाठमाश्रित्य—शंखारिभ्यांगदाब्जाभ्यांपूज्योविष्णुःश्रियैनरैरित्युक्तलक्षणाविष्णुप्रतिमा
**ाडरानंदः** । लिंगेदेवोमहादेवःसर्वदैवव्यवस्थितः । अनुग्रहायलोकानांतस्मान्नित्यंप्रपूजयेदिति**भविष्योत्त**
**कायांकौर्मे**—योमोहादथवालस्यादकृत्वादेवतार्चनम् । भुंक्तेसयातिनरकान्सूकरेष्विहजायते । **यत्त्वाश्वला**

तपहोमव्रतादिकान् । नकुर्याच्छ्राद्धदिवसेप्राग्विप्राणांविसर्जनादिति तन्नित्यवर्जमितिचोपदेवः । विष्णुभिन्नपर
ुवंभक्त्यापितृश्राद्धंप्रकल्पयेदितिलैंगात् ।—श्राद्धाहितुसमभ्यर्च्यनृवराहजनार्दनमितिविष्णुधर्मोक्तेश्चविहित
दौसूर्यपूजा—अपूज्यप्रथमंसूर्यमपरान्यःप्रपूजयेत् । नतद्भूतकृतंपाद्यंसंप्रतीच्छतिदेवताइतिब्राह्मात् ।—रवि
मः। अनुक्रमेणपूज्यंतेव्युत्क्रमेणमहद्भयमिति । गणेशार्कौसमभ्यर्च्यशैवोविष्णुंप्रपूजयेत् । अर्चयेच्चशिवंपश्चाद्विष्णुमादौ
वंस्यादर्चनक्रिया । अत्रगणेशार्कयोःक्रमेनतात्पर्यंकिंतुतावपूजयित्वाप्रधानंनपूजयेत् । आदौनसर्वादौकिंतुविष्ण्वादौ

नोक्तस्तुयोगिनीतंत्रे—गणेशसूर्यविष्ण्वीशदुर्गाआवाह्यपूजयेत् । भैरवीतंत्रे—आदौगणपतिंदेवंसूर्यंविष्णुम
नेति । आपस्तंबस्मृतौ—प्रत्यहदेवताःपूज्याइत्युक्तिर्वैश्वदेवदेवताभ्योन्याःपराशराद्युक्तप्रतिपदादितिथिदेवता
ः। तन्न । पूर्ववचनैकवाक्यतयास्यगणेशादिपूजापरत्वात् प्रतिपदादिदेवतापूजनस्यान्यत्रविधानाच्च । पंचायतन
शैवोपदेवः—शंभौमध्यगतेहरीनहरभूदेव्योहरौशंकरेभास्येनागसुतारवौहरगणेशाजांबिकाःस्थापयेत् । देव्यांविष्णु
र्येनाःशंकरभागतोऽतिसुखदाव्यस्तास्तुतेहानिदाः।यस्ययइष्टोदेवःसतेनमध्येस्थाप्यःसाधारणतयापूजनेविष्णुः । श्लो
ूजकाभ्यर्हितत्वेनशिवादौमध्यस्थेशिष्टानामेपक्रमः । शंभौमध्यगे—ईशानेहरिःआग्नेयेसूर्यःनैर्ऋत्येगणेशःवायव्येदुर्गा
ःआग्नेयेगणेशःनैर्ऋत्येसूर्यःवायव्येदुर्गा । रवौमध्यगे—ईशानेहरःआग्नेयेगणेशःनैर्ऋत्येविष्णुःवायव्येदुर्गा । देव्यांमध्
आग्नेयेगणेशोनैर्ऋत्येरविर्वायव्ये । गणेशेमध्यगे—विष्णुरीशानेईश्वरआग्नेयेदुर्गानैर्ऋत्येरविर्वायव्येइतिगोविंदरा
चायतनपक्षेतुमध्येविष्णुंततोर्चयेत् । अग्निनैर्ऋतवायव्येशानेपुगणनायकम् । रविंशिवांशिवंमध्येगणेशश्चेच्छिवंशिवा

ागजेश्वरान् । भवान्यांमध्यसंस्थायामीशविघ्नार्कमाधवान् । हरेमध्यगतेसूर्यगणेशगिरिजाच्युतान् । संपूज्यादौम
गणेशेमध्यसंस्थेतुपूजयेद्भास्करादितः । एतेनाजेश्वरेनार्याइतिपाठंवदन्नाचारचंद्रोदयोपास्तः ॥

यपूजकांतरालंप्राची । **तदुक्तमागमे**—पूज्यपूजकयोर्मध्येप्राचीप्रोक्ताविचक्षणैः। प्राच्येवप्राचीसोद्दिष्टामुक्त
जातेमंत्रशास्त्रे—देवस्यमुखमारभ्यदिशंप्राचींप्रकल्पयेत्। तदादिपरिवाराणामंगाद्यावरणस्थितिः। देवपूजायां
ःसायंनिशासुचेतिवचनाद्व्यवस्थेति**वाचस्पतिमिश्राः**।सूर्यसप्ताक्षरमंत्रपरमेतदिति**पूजारत्नाकरेतिथितत्त्वे**च
त्रावुदङ्मुखःकुर्याद्देवकार्यंसदैवहि। शिवार्चनंसदाचैवशुचिःकुर्यादुदङ्मुखः । अर्कमर्कतनुर्यजेदिति**भविष्योक्त**
कादिभिर्वायुधारणशोषणादिभिर्भूतशुद्धिरंगमितिटो**डरानंदः** । **आगमिकास्तु**नादेवोदेवमर्चयेदितिवाक्या

**पूजाभविष्ये**—मेरुमंदरतुल्योपिराशिःपापस्यदारुणः। आसाद्यभास्करंमर्त्यस्तंनाशयतितत्क्षणात्। प्रदद्याद्वैग
हमर्चयेद्भानुंतस्यपुण्यंततोधिकम्। **स्मृतिरत्नावल्याम्**—शिवंसूर्यंतथाचेंद्रंदुर्गाद्याउग्रदेवताः।योर्चयेत्पणपूर्वं
**रिजातेसंग्रहे**—संवत्सरत्रयंकुर्याद्यःपरार्थसुरार्चनम्।संवत्सरंचगायत्रीषण्मासंरुद्रमेवच।प्रणवंवादिनंचैकंसचपा
णे। देवार्चनपरोविप्रोवित्तार्थीवत्सरत्रयम्। सवैदेवलकोनामहव्यकव्येषुगर्हितइति**चंद्रिकायांविष्णूक्तेः** । अ
मधु। रक्तानिकरवीराणितथारक्तंचचंदनम् । अष्टांगमर्घमापूर्यभानवेद्भिर्निवेदयेत्। **हरनाथीयेस्मृतिसारे**—
लभेत् । तस्माच्छतगुणंपुण्यंमृत्पात्रेणनराधिप । ताम्रपात्रार्घदानेनपुण्यंदशगुणंस्मृतम्। पालाशपद्मपत्राभ्यांताम्र

ज्ञेयंलक्षांशोनात्रसंशयः। सुवर्णपात्रविन्यस्तमर्घंकोटिगुणंभवेत्। एवंस्नानेपुनैर्वेद्यबलिपूजादिपुक्रमात्। मृन्मयमत्र
रत्वेननिषेधात्। **तथाभविष्ये**—कालेयकंतुरुष्कंचरक्तचंदनमेवच । यान्यात्मनःसदेष्टानियान्यशस्तान्यपा
कालियाकाष्ठमित्यन्ये । तुरुष्कंसिह्लकम् ॥

**गणितत्रैव**—पुष्पैररण्यसभूतैःपत्रैर्वागिरिसंभवैः। आत्मारामोद्भवैर्वापिभक्त्यासंपूजयेद्रविम्। **पुष्पमालाया**
शाशोकबकंकिंशुकंपुन्नागंकरवीरचपकजपानेपालिकाकुब्जकम् । वासंतीशतपत्रिकाविचकिलंमंदारमर्काह्वयंपीताम्र
आढकीचमसूरांश्चवर्तुलान्बदरांस्तथा । भुक्तशेषंपर्युषितंवैश्वदेवेविवर्जयेत् । निष्पावा वल्लाः । **आपस्तंबः**—नक्षारलवणहोमोविद्यते
तथापरान्नसंसृष्टस्येति । क्षारलवणमूषरलवणमितिकल्पतरुः । **व्यासः**—जुहुयात्सर्पिषाभ्यक्तंतैलक्षारविवर्जितम् । **क्षाराश्चाग्नेये**—
तिलमुद्गादृतेशिम्ब्यंसस्येगोधूमकोद्रवौ । चीनकंदेवधान्यंचशमीधान्यंतथैक्षवम् । खिन्नधान्यंतथापण्यंमूलंक्षारगणःस्मृतः । जुहुयाद्व्यंजनक्षारवर्ज्यं
मन्नंहुताशने । व्यंजननिषेधोहविःपरःकेवलव्यंजनपरोवा । हविष्यव्यंजनान्वितैःपूर्वोक्तैः । चीनकं कलायः । **चतुर्विंशतिमते**—
पयोदधिघृतैःकुर्याद्वैश्वदेवंस्रुवेणतु । हस्तेनान्नादिभिःकुर्याद्भिरंजलिनाजले । अन्नमूलंस्कारादिनभवतीतिवृत्तिःकर्कश्च । **मार्कंडेये**—
संपूजयेत्ततोवह्निंदद्याच्चाहुतयःक्रमात् । हविःपरिमाणमुक्तंप्राक् । **चंद्रोदयेस्मृतिः**—उत्तानेनतुहस्तेनअंगुष्ठाग्रेणपीडितम् । संहृ
तांगुलिपाणिस्तुवाग्यतोजुहुयाद्धविः । **बह्वृचपरिशिष्टे**—नात्रपाकतंत्रंसिद्धंहविष्यमेवमिश्रित्याद्भिःप्रोक्ष्योदगुद्वास्याग्नेःप्रत्यग्नदर्भेषुनिधायस
व्यपाणितलंहृदयेन्यस्यसकृदवदायजुहुयादंतेचपरिसमुह्यपर्युक्ष्यपर्यूहनोक्षणेअपिनानकुर्वंतीति । **शौनकः**—त्रिधाविभज्यसिद्धान्नंत्रिःप्रो

१ पाकतन्त्रमभावहिरित्यादि । २ अधिश्रित्याग्नेयपरिकृत्वा ।

स्यपुरतःस्थितम् । काशीखंडे—पूषोदिवीतिमंत्रेणपर्युक्षणमथाचरेत् । एषोहिदेवमंत्रेणकुर्याद्बर्हिंचसंमुखम् । तथादेवकृतस्याथाज्जुहु
याच्चषडाहुतीः । समाप्यतूष्णीमेकांचतथास्विष्टकृदाहुतिम् । अत्रिः—साग्निकःपितृयज्ञान्नाद्बलिकर्मसमाचरेत् । अनग्निर्हुतशेषेणबलिका
र्मबलिंहरेत् । नरयज्ञाद्धतेनाग्निनिरग्नेस्तुमहामखः । हुत्वाकाकबलिंरिव । वसिष्ठः—अनग्निकस्तुयोविप्रःसोऽन्नंव्याहृतिभिःस्वयम् ।
हुत्वाशाकलमंत्रैश्चशिष्टद्धुतबलिंहरेत् । व्यासः—शाकलेनविधानेनजुहुयाल्लौकिकेऽनले । व्यस्ताभिश्चव्याहृतिभिःसमस्ताभिस्ततःपरम् ।
षड्भिर्देवकृतस्येतिमंत्रवद्भिर्यथाक्रमम् । अथविधिःकातीयपरइतिकेचित् । निरग्नेरपितस्यसूत्रोक्तएवहोमः । जयंतकृष्णभट्टीययोस्तुव्या
हृतिभिर्व्यस्तसमस्ताभिर्जुहुयादित्युक्तम् । मनुः—वैश्वदेवस्यसिद्धस्यगृह्येग्नौविधिपूर्वकम् । आभ्यःकुर्याद्देवताभ्योब्राह्मणोहोममन्वहम् ।
अग्नेःसोमस्यचैवादौतयोश्चैवसमस्तयोः । विश्वेषांचैवदेवानांधन्वंतरयएवच । कुह्वैचैवानुमत्यैचप्रजापतयएवच । सहद्यावापृथिव्योश्चतथा
स्विष्टकृदाहुतिः । विष्णुपुराणे—अपूर्वमग्निहोत्रंचकुर्यात्प्राग्ब्रह्मणेततः । प्रजापतिंसमुद्दिश्यदद्यादाहुतिमादरात् । गृह्येभ्यःकश्यपा
यायततोनुमतयेक्रमात् । अयमेववैश्वदेवःशूद्रस्येतिशूद्राचारशिरोमणिः । मनूक्तइतिकौमुदीराघवानंदतीर्थौच । शूद्रस्यशाक
लमंत्रोक्तदेवतानामाहोमइतिगोविंदराजः । पाकयज्ञैःस्वयंयजेतेत्यस्यैकेइतिगौतमोक्तेःस्वयंकरणविकल्पःशूद्रस्येतिहरिहरः । पाकयज्ञाः
प्रयोगपारिजातेहेमाद्रौच । आसुरेभ्यःप्रहीणेभ्यःशिशुभ्योयच्चदीयते । वैश्वदेवंनतत्कुर्याच्छ्राद्धार्थंयच्चपच्यते । इति ।

अथभूतयज्ञः । मनुः—एवंसम्यग्घविर्हुत्वासर्वदिक्षुप्रदक्षिणम् । इंद्रांतकाप्पतीदुभ्यःसानुगेभ्योबलिंहरेत् । मरुद्भ्यइतितुद्वारिहरेद
प्स्वद्भ्यइत्यपि । वनस्पतिभ्यइत्येवंमुसलोदूखलेहरेत् । उच्छीर्षकेश्रियैकुर्याद्भद्रकाल्यैतुपादतः । ब्रह्मवास्तोष्पतिभ्यांतुवास्तुमध्येबलिंहरेत् ।

१ कस्तूतमितिपाठ । २ अग्नीषोमाभ्यामिति । ३ प्रथमेस्विष्टकृतेस्वाहेति ।

विश्वेभ्यश्चैवदेवेभ्योबलिमाकाशउत्क्षिपेत् । दिवाचारिभ्योनक्तंतुनक्तंचारिभ्यएवच । पृष्ठवास्तुनिकुर्वीतबलिंसर्वात्मभूतये । पितृभ्योबलिशेषंतुस
र्वंदक्षिणतोहरेत् । शुनांचपतितानांचश्वपचांपापरोगिणाम् । वायसानांक्रमीणांचशनकैर्निक्षिपेद्भुवि । सायंत्वन्नस्यसिद्धस्यपत्न्यमंत्रंबलिंहरेत् ।
वैश्वदेवंहिनामैतत्सायंप्रातर्विधीयते । यजमानतत्पुत्रादीनामसन्निधौपत्नीबलिंहरेदितिकल्पतरुः । सायंत्वन्नस्यसिद्धस्यपत्न्यमंत्रंबलिंहरेत् ।
स्यात्तत्रैकोबलिरितिसर्वज्ञनारायणः । युक्तंचैतदेवलाघवात् । मुसलोलूखलोदेश्यत्वात्स्युदेश्यंबलिक्षेपविधेर्द्वंद्वंचमुसलोलूखलयोः । मुसलोलूखलेक्षि
उलूखलइत्येकवचननिर्देशादितरेतरयोगः । द्वंद्वेद्विवचनापत्तेः समाहारद्वंद्वाश्रयणेनमुसलयुक्तमुलूखलमितिवा समासाश्रयणेनमुसलयुक्तमुलूख
लमित्येकत्वम् । उच्छीर्षकं शय्याशिरःवास्तुशिरोवा । पादतः शय्यायावास्तोर्वा । पृष्ठवास्तूपरिगृहमितिमेधातिथिः ।
खंडे । निर्णेजनोदकात्तंतुपावन्यां (?) वक्ष्यमाणेप्येवत् । कात्यायनः—अमुष्मैनमइत्येवंबलिदानंविधीयते । पश्चाद्गृहंकाशी
कारोनृणांकृतः । नारायणवृत्तौतुबलिदानेस्वाहाकारउक्तः । नेत्याशार्कः । शूद्रस्यनमइत्येव । स्वधाकारःपितॄणांचहंत
लिमतःसदा । तदप्येकेनमस्कारंकुर्वतेनेतिगौतमः । तत्रनेत्यर्थः । मार्कंडेये—स्वधानमइतिप्रुक्त्वापितृभ्यश्चापिदक्षिणे । हुतावशेषमन्नंवै
तोयंदद्याद्यथाविधि । विष्णुपुराणे—तच्छेषमणिकेपृथ्वीपर्जन्याभ्यःक्षिपेत्ततः । द्वारेधातुर्विधातुश्चमध्येचब्रह्मणःक्षिपेत् । गृहस्यपुरुषंचै
वदिग्देवानांचमेशृणु । इंद्रायधर्मराजायवरुणायतथेंदवे । प्राच्यादिषुबुधोदद्याद्धुतशेषात्मकंबलिम् । प्रागुत्तरेचदिग्भागेधन्वंतरिबलिंबुधः ।
वायव्यांवायवेदिक्षुसमस्तासुततोदिशम् । ब्रह्मणेचांतरिक्षायवायवेचक्षिपेद्बलिम् । विश्वेदेवान्विश्वभूतांस्ततोविश्वपतीन्पितॄन् । यक्ष्माणंचसमुद्दि
श्यबलिंदद्यान्नरेश्वर । ततोन्यदन्नमादायभूमिभागेशुचौबुधः । दद्यादशेषभूतेभ्यस्वेच्छयातत्समाहितः । देवामनुष्याःपशवोवयांसिसिद्धाश्चय
क्षोरगदैत्यसंघाः । प्रेताःपिशाचास्तरवःसमस्तायेचान्नमिच्छंतिमयाप्रदत्तम् । पिपीलिकाःकीटपतंगकायाबुभुक्षिताःकर्मनिबंधबद्धाः । प्रयांतु

१ निक्षिपेद्बलिम् ।

तेतृप्तिमिदंमयादत्तंतेभ्योविसृष्टंसुखिनोभवंतु । येषांनमातानपितानबंधुर्नैवान्नसिद्धिर्नतथान्नमस्ति । तस्मादहंभूतनिकायभूतमन्नंप्रयच्छामिम
यायतेषाम् । चतुर्दशोभूतगणोपियस्तुतत्रस्थितायेखिलभूतसंघाः । तृप्त्यर्थमन्नंहिमयाविसृष्टंतेषामिदंतेमुदितामवंतु । इत्युच्चार्यनरोदद्यादन्नं
श्रद्धासमन्वितः । भुविभूतोपकारायगृहीसर्वाश्रयोयतः । श्वचांडालविहंगानांभुविदद्यात्ततोनरः । येचान्येपतिताःकेचिदपुत्राश्चविमानवाः ।
इदमेवबलिदानंशूद्रस्येत्युक्तंशूद्राचारशिरोमणौस्मृतिकौमुद्यांच ।

बलिदेशसंस्कारः । आपस्तंबः—बलीनांदेशस्यसंस्कारोहस्तेनपरिमृज्यावोक्ष्यन्युप्यचेति । छंदोगपरिशिष्टे—नावराध्यांबलयो
भवंतिमहामार्जारश्रवणप्रमाणात् । एकत्रचेद्विकृष्टाभवंतिइतरेतरमसंसक्ताश्चेदिति । नानास्थानेबलिदानासंभवे अविकृष्टा अप्यवहिताः ।
शौनकः—बदरीफलमात्रान्नमंगुल्यग्रैर्विनिक्षिपेत् । बलिहरणेविशेषोगृह्यपरिशिष्टे—अथगृहबलिदेवतानांकीर्तयिष्यामोयत्र
यत्रबलयःस्थिताः । द्वारेपितामहंविद्यात्अर्थेकेतुउमापतिम् । आग्नेय्यामिलस्प्रेदर्शनात् द्वारे प्राच्याम् । आग्नेय्यांबलभद्रंचयमंविष्णुंचदक्षिणे ।
नैरृत्यांस्कंदवरुणौसोमंसूर्यंचपश्चिमे । वायव्यामश्विनौ । वसवःसौम्यां । रुद्रईशान्यां । नैरृत्यांस्कंदं । वरुणसोमौपश्चिमे । सूर्यंवायव्यामि
त्यर्थः । नक्षत्रेतुग्रहाःपूर्वांदिशमाश्रिताः । गृहमध्येब्रह्माणंप्रतिष्ठाप्यऋद्धिर्वृद्धिःश्रीःकीर्तिरिति प्रदक्षिणंब्रह्मणःप्रागादिदिक्षुइत्यर्थः । निष्क्रम्य
गृहान्निवेशनाद्दक्षिणमुखःओष्ठ्यबलीन्निनयेत् । निवेशनंमुख्यगृहम् । ऐंद्रवारुणवायव्यायाम्यानैरृतास्तथा । तेकाकाःप्रतिगृह्णंतुभूम्यांपिंडं
मयार्पितम् । इतिकाकबलिः । द्वौश्वानौश्यामशबलौवैवस्वतकुलोद्भवौ । ताभ्यांपिंडंप्रयच्छामिस्यातामेतावहिंसकाविति श्वबलिः । येभू
ताःप्रचरंतिदिवानक्तंबलिमिच्छंतोवितुदस्यप्रेष्ठाः । तेभ्योबलिंपुष्टिकामोददामिमयिपुष्टिंपुष्टिपतिर्ददात्विति भूतबलिः । प्रक्षाल्यपाणिपादौ
गृहंप्रविश्यजपेत् शांतापृथिवीशिवमंतरिक्षंद्यौर्नोदेव्यभयंनोअस्तु । शिवादिशःप्रदिशउद्दिशोनआपोविद्युतःपरिपांतुसर्वतःशांतिः २ ॥

अश्केनित्यबलिहरणेनत्यागोहरणमात्रोक्तेःयजतिजुहोतिचोदितत्वाभावाच । अन्यथातर्पणेपित्यागापत्तेरित्याहुः । तन्न । सूक्तवाककरणत्वा
न्यथानुपपत्त्याहरतेर्यागकल्पनवन्मन्वादिष्विंद्रादिषुचतुर्थीनिर्देशान्यथानुपपत्त्याअत्रापिहरतेर्यागार्थत्वौचित्यात् । इति ॥

बलिहरणभेदानाह शौनकः—चक्राकारमथाष्टारंकुर्यादग्निसमीपतः । आयुःकामोदिवारात्रौछत्राकारंबलिहरेत् । आयुरारोग्यका
मोवाध्वजाकारंबलिंहरेत् । मृत्युरोगविनाशार्थीनराकारंबलिंहरेत् । आयुरारोग्यसौभाग्यपुत्रविद्यापशूनपि । कामश्चैधर्ममोक्षार्थीचक्राकारं
बलिंहरेत् । पंचस्वेतेषुविप्राणांमुख्याचक्राकृतिर्भवेत् । बह्वृचानांनराकारोमुख्यइतिकृष्णभट्टीयेजयंतवृत्तौनारायणवृत्तौच । यत्तु व्यज
नाकारंबलिमापस्तंबाहरंतितत्रमूलंमृग्यम् । पृथ्वीचंद्रोदये—अनुद्धृत्यबलीनश्नन्प्राणायामान्षडाचरेत् । स्वयमुद्धरणेचैवप्राजापत्यंसमाच
रेत् । बलिप्रतिपत्तिमाहकात्यायनः—पिंडवत्पश्चिमाप्रतिपत्तिरिति । यथापिंडप्रतिपत्तिर्गोजविप्राग्न्यंबुषुतथात्रादिर्बलिमिश्रबलीनामि
त्यर्थः । चंद्रिकायांकात्यायनः—वैश्वदेवंचपित्र्यंचबलिमग्नौविनिक्षिपेत् । शेषंभूतबलेर्विप्रस्त्वल्लाकाकबलेःसमम् । अग्निस्मृतौ—
वैश्वदेवबलेःशेषंनाश्नीयाद्ब्राह्मणोगृही । काकादिभ्यस्तुतद्देयंविप्रेभ्योवाविशेषतः । इति ।

अथपितृयज्ञः । सद्वेधाबलिहरणरूपोनित्यश्राद्धरूपश्च । श्राद्धंवापितृयज्ञःस्यात्पित्र्योबलिरथापिवेतिकात्यायनोक्तेः । द्विविधोपिच
त्युत्तरंकाकबलेःपूर्वंकार्यः । भूतयज्ञस्त्वयंनित्यःसायंप्रातर्यथाविधि । एकंतुभोजयेद्विप्रंपितॄनुद्दिश्ययत्नतः । पूजयेदतिथिंनित्यंनमस्येदर्चयेत्तथेति
कौर्मात् । भूतयज्ञस्तथाश्राद्धंनित्यंत्वतिथितर्पणम् । क्रमेणानेनकर्तव्यंस्वाध्यायाध्ययनंतथेति शातातपोक्तेः । अदत्त्वावायसबलिंनि
त्यश्राद्धंसमाचरेदितिकाशीखंडाच । वसिष्ठेनतु मनुष्ययज्ञोत्तरंश्राद्धमुक्तं—श्रोत्रियायाग्रंदत्त्वाब्रह्मचारिणेचानंतरंपितृभ्योदद्यादिति ।
एतद्वल्युत्तरंश्रोत्रियादेरुपस्थितावित्याचारादर्शः । मनुस्मृतौ वैश्वदेवात्पूर्वंनित्यश्राद्धमुक्तम् । श्रुतौतु देवयज्ञःपितृयज्ञोभूतयज्ञोमनु

ध्यज्ञोब्रह्मयज्ञइतिमन्त्रउक्तः। अपवर्गेतुसर्वत्रनित्यमेवप्रकीर्तितमितिशातातपोक्तेः वैश्वदेवोत्तरंनित्यश्राद्धमितिगोविंदराजः।

अथनित्यश्राद्धम्। मनुः—दद्यादहरहःश्राद्धमन्नाद्येनोदकेनवा। पयोमूलफलैर्वापिपितृभ्यःप्रीतिमावहन्। कात्यायनेनतर्पणेना
पिनित्यश्राद्धसिद्धिरुक्ता पितृयज्ञस्तुतर्पणमिति। बौधायनोपि अपिवाप्यपस्त्वपितृयज्ञइति। अत्रतुल्यवद्विकल्पइतिकर्कः। शक्ताशक्तवि
षयत्वेनव्यवस्थेतिपित्र्यबलिनित्यश्राद्धयोःसमुच्चयः मनुमार्कंडेयपुराणादिषूभयोर्नित्यत्वावगतेरित्युक्तंमदनरत्ने। प्रयोगपारिजाते
तुपित्र्यबलेर्दैवपित्र्यर्थत्वान्नित्यश्राद्धस्यमनुष्यपित्र्यर्थत्वादुभयोःसमुच्चयउक्तः। तन्न। देवताभेदेमानाभावात्। नारायणवृत्तिकृत्तुवृत्ति
नापित्र्यबलिनैवनित्यश्राद्धसिद्धिमाह। तदयमर्थः—शक्तस्यनित्यश्राद्धंबलिश्च। श्राद्धाशक्तस्योद्धृतान्नदानंबलिश्च। तदसंभवेबलिमात्रं।
उद्धृतान्नप्रतिपत्तिश्चकौर्मे—उद्धृत्यवायथाशक्तिकिंचिदन्नंसमाहितः। वेदतत्त्वार्थविदुषेद्विजायैवोपपादयेत्। पित्र्यबलेनित्यश्राद्धत्वेतस्यगोत्राद्यु
च्चारोपिभवति। येषांतुपित्र्यबलौस्वधापितृभ्यइतिमंत्रपाठस्तेषांनगोत्राद्युच्चारःमंत्रानर्थक्यापत्तेः। नित्यश्राद्धंचप्रमादौप्रसंगसिद्धेःपृथक्कार्यम्।
नित्यश्राद्धंनकुर्वीतप्रसंगाद्यत्रसिध्यति। श्राद्धांतरेकृतेऽन्यत्रनित्यत्वात्तन्नहापयेदितिहेमाद्रौनागरखंडात्। यत्रद्रव्यकर्त्रैक्यं। अन्यत्रतदभावे।
श्राद्धंकृत्वातुतस्यैवपुनःश्राद्धंनतद्दिने। नैमित्तिकंतुकर्तव्यंनिमित्तानुक्रमोदयमितिजाबालिस्मृतेश्च। त्रिस्थलीसेतौतु—आमेनहेम्नावाती
र्थश्राद्धेकृतेनित्यश्राद्धंपृथक्। तस्यपक्वद्रव्यकत्वनियमात्। यत्तुनांदीमुखतीर्थश्राद्धाभ्यांनित्यश्राद्धस्यसिद्धिरितिहेमाद्रिरूचेतत्तीर्थश्राद्धस्यान्ने
नकरणेज्ञेयमित्याहुर्भट्टपादाः। अस्यदिवाकरणेलोपःरात्रौश्राद्धंनकुर्वीतेतिवचनात्किंतुप्रायश्चित्तमेवेत्युक्तंमदनरत्नेगोविंदार्णवेप्रयोग
पारिजातेच। अत्रकेचित्—नित्यश्राद्धंरात्रावपिकार्यम्। दिवोदितानीत्यादिवृद्धनारदीयात्। रात्रौप्रहरपर्यंतमित्यादिचंद्रोदयेसं
ग्रहाच्च। नचैवंदार्शिकादयपिरात्रौस्युरितिवाच्यम्। तिथिसंबंधित्वेनदिवासंबंधित्वादित्याहुः। प्रांचाअप्येवम्। तन्न।—संध्यारात्र्योर्नकर्त

र्थ्यंश्राद्धंखलुविचक्षणैरितिनिष्पत्वादिवचनैर्नित्यश्राद्धस्यापिरात्रौनिषेधात् । नचेदममावास्यादितिथिसंबंधिश्राद्धपरम् । संकोचेमानाभावात् ।
तस्याप्यपराह्णसंबंधित्वेनदिवासंबंधित्वाच्च । नचैवमल्पश्राद्धद्वयामपरात्रेनित्यश्राद्धंनस्यादितिवाच्यम् । इष्टापत्तेः अपकर्षविधेर्बलीयस्त्वा
द्वातत्करणम् । यत्तुस्मृत्यर्थसारे—नित्यश्राद्धेदेशकालनियमोनास्तीतितदप्यपराह्णनियमोनास्तीत्येतत्परंनतुरात्रिप्राप्तिपरम् । अतएवतीर्थ
द्रव्योपपत्तौचनकालमवधारयेदितिदेवलोक्तावपराह्णनियमएवोक्तोनतुरात्रिग्रहणमपीत्युक्तम् । शूलपाणिनातीर्थश्राद्धे—रात्रौवायदि
वादिवेतिस्पष्टंरात्रिविधेरात्रावनुष्ठानंयुक्तम् । नत्वत्र—श्राद्धंसायाह्नदत्तंहिराक्षसैर्विप्रलुप्यते । ग्रहोपरागसंक्रांतितीर्थश्राद्धादिकंचनेतिग्रहादि
पर्युदासेनरात्रौश्राद्धनिषेधप्रतीतेश्च । अन्यथापरिगणनवैयर्थ्यापत्तेः । यत्तुत्रिमुहूर्तस्तुसायाह्नस्तत्रश्राद्धंविवर्जयेदितितच्चनित्यश्राद्धपरम् ।
स्वकालातिक्रमेकुर्याद्रात्रेःपूर्वतयाविधिरितिकालमाधवीयेव्यासोक्तेः । पित्र्यफलेनित्यश्राद्धेपिनरात्रौनिषेधः । अतिनिर्धौनिषेधप्रवृत्तेः ।
समुच्चयपक्षेस्थानापत्त्यभावाच्च । नित्यश्राद्धंचकस्याप्यनश्यादेरामेन । अनग्निश्चप्रवासीचयस्यभार्यारजस्वला । आमश्राद्धंप्रकुर्वीतमाससंवत्सरा
दत्ताइतिमरीच्युक्तेः । नचनित्यश्राद्धेवृद्धिश्राद्धेचभोजनमेवप्रधानमित्याशाकौक्तेर्नामप्राप्तिरितिवाच्यम् । वृद्धिश्राद्धेपितदभावापत्तेरितिके
चित् । हेमाद्रिस्त्वनग्न्यादेरपिपाकासंभवएवामेनेत्यूचे । युक्तंचैतत् । इंगुदैर्बदरैर्बिल्वैरामस्तर्पयतेपितॄन् । यदन्नःपुरुषोलोकेतदन्नास्तस्य
देवताइतिरामायणात् । नित्यश्राद्धेततोदद्याद्भक्ष्यमेवहीतिब्रह्मांडाच्च । नित्यश्राद्धस्यपक्वद्रव्यकरणनियमादितिपितामहोक्तेश्च ।
अतःप्रवासादावपिपक्वेनैवेदम् । यत्तुस्मृत्यर्थसारे अत्रनियमोनास्तीतितदप्यन्यश्राद्धवत्कृतपक्वादिनियमोनास्तीत्येतत्परं चतुष्पक्वानियम
परम् । अस्मादेववचनद्वयान्नित्यश्राद्धंनिषिद्धद्रव्येणापितैलादिनाकार्यमित्युक्तंहेमाद्रौचंद्रिकायांदिवोदासीयेच । श्राद्धहेमाद्रौ
यमः—सपिंडीकरणेनित्येनाधिमासंविवर्जयेत् । निर्णयदीपेगार्ग्यः—नांदीश्राद्धेकृतेपश्चाद्यावन्मातृविसर्जनम् । दर्शश्राद्धंक्षयश्राद्धंस्नानं

शीतोदकेनच । अपसव्यंस्वधाकारंनित्यश्राद्धंतथैवच । मधयज्ञंचाध्ययनंनदीसीमातिलंघनम् । उपवासव्रतंचैवश्राद्धभोजनमेवच । नैवकुर्युः सपिंडाश्चमहापोद्धासनावधि । एतद्वर्षपर्यंतमावश्यकमूर्ध्वंकृताकृतम् । नित्यश्राद्धप्रकरण्य—एवंसंवत्सरमित्युक्त्वाकृताकृतमतऊर्ध्वमित्या पस्तंबोक्तेरितिशूद्राचारशिरोमणिः कल्पतरुश्च । तत्र । आपस्तंबोक्तनित्यश्राद्धस्येतिकर्तव्यताभेदेनस्मृत्युक्तनित्यश्राद्धभेदात् । नित्यक्रियांपितॄणांतुकेचिदिच्छंतिसत्तमाइति मार्कंडेयपुराणान्नित्यश्राद्धेविकल्पः । सचपद्पुरुषश्राद्धोक्तंनित्यश्राद्धंनकार्यं श्राद्धोक्तंतुकर्तव्यमितिव्यवस्थितइतिपितृभक्तिःश्रीदत्तः । नित्यश्राद्धाकरणेनदोषः करणेतुमहाफलमितिकल्पतरुः । तन्न नित्यसंयोगविरोधात् फलाश्रवणाच्च अकरणेप्रायश्चित्तोक्तेः । हेमाद्रौदेवलः—अनेनविधिनाश्राद्धंकुर्यात्संवत्सरंसकृत् । त्रिश्चतुर्वायथाश्राद्धंमासेमासेदिनेदिने । अस्य हमतुप्रत्नाशक्तौमासेमासे तत्राप्यशक्तौवर्षमध्येत्रिश्चतुर्वासकृद्वाकार्यमितिहेमाद्रिश्चंद्रिकाच । नेदंनित्यश्राद्धपरम् । अनेनविधिना श्राद्धंत्रिशुद्धस्येहनिर्वपेत् । हेमंतग्रीष्मवर्षासुपांचयज्ञियमन्वहमितिमनूक्तेः । मात्स्ये—पूर्वार्धंतदेव । कन्याकुंभवृषस्थेर्केकृष्णपक्षेषुसर्वदेति । सकृदितिकन्यास्थार्कपरम् । अतःसर्वामावास्याश्राद्धाशक्तौसर्वकृष्णपक्षेषुश्राद्धाशक्तौचेदमितिश्राद्धशूलपाणिः । युक्तंचैतदेव ॥

अथविधिः । व्यासः—नित्यश्राद्धेत्वगंधाद्यैर्द्विजानभ्यर्च्यशक्तितः । सर्वान्पितृगणान्सम्यक्सहैवोद्दिश्यभोजयेत् । नावाहनंस्वधाकारंपिंडाग्नौकरणादिकम् । ब्रह्मचर्यादिनियमोविश्वेदेवास्तथैवच । नित्यश्राद्धेत्यजेदेतान्भोज्यमन्नंप्रकल्पयेत् । दद्यात्तुदक्षिणांशक्त्यानमस्कारैर्विसर्जयेत् । ब्रह्मचर्यमवेदात्मोक्तेः भोक्तारंप्रतिदातारंव्रतंतत्रनविद्यतइतिदेवलोक्तेः मात्स्ये—नित्यंतावत्प्रवक्ष्येहमर्घावाहनवर्जितम् । अर्घ्यपात्रमेवनिषिद्धंनार्घ्यदानम् । नैत्यकेपितरएतद्धोर्घ्यमितिपाणिनैवार्घ्यंदद्यादितिग्रंथांतरादितिदिवोदासः । प्रचेताः—नामंत्रणंनहोमश्चनावाहनविसर्जने । नपिंडदानंनसुरासिलेकुर्याद्द्विजोत्तमः । उपवेश्यासनंदत्त्वासंपूज्यकुसुमादिभिः । निर्दिश्यभोजयित्वातुकिंचिद्दत्वाविसर्जे

र्येत् । वाजेवाजेइतिमंत्रविशिष्टविसर्जननिषेधोनकेवलस्य नमस्कारैर्विसर्जयेदितिपूर्वमुक्तेरितिश्राद्धहेमाद्रिः । आद्यनादित्येकेनैवपाद्यमिति स
एव । किंचिद्दत्त्वेतिकाकिन्यादक्षिणामितिकल्पतरुः । यत्तुदानहेमाद्रौ—सुवर्णरजतंताम्रंतंडुलधान्यमेवच । नित्यश्राद्धंदेवपूजासर्वमेतदद
क्षिणमिति । यदपिव्यासः—तदुपादपुरुपञ्जेयदक्षिणापिंडवर्जितमिति । यदप्यपरार्केप्रचेताः—नावाहनाग्नौकरणेनपिंडानांविसर्जनम् ।
अनुव्रज्योदक्षिणाचत्रिभ्यश्चातिथिकल्पनमिति । तत्रदक्षिणाभावोद्विजानुपवेशनपक्षइतिपृथ्वीचंद्रः । त्रिभ्योधिकस्यनित्यश्राद्धेभोजनं
किंत्वतिथिकल्पमित्यर्थः । षण्मुख्याइतिदिवोदासः । दक्षिणाविकल्पइतिमदनरत्नेमात्स्ये—यथैकंभोजयेद्विप्रंत्रीनुद्दिश्यपितॄंस्तथा ।
छंदोगपरिशिष्टेच—एकमप्याशयेद्विप्रंपित्रर्थेपांचयज्ञिके । शौनकः—सावित्रजपेन्मंत्रंदशवारंसदाबुधः । नित्यश्राद्धंयदान्यूनंकुरुते
नात्रसंशयः । नित्यश्राद्धाशक्तौमनुः—भिक्षांवापुष्कलंवापिहंतकारमथापिवा । असंभवेसदाद्द्याद्दुदपात्रमपिद्विजे । इति ।

अथप्रयोगः । आचम्यप्राणानायम्यापवित्रःपवित्रोवेतिपुंडरीकाक्षंस्मृत्वागायत्रींपठित्वाप्राङ्मुखोदेशकालौसंकीर्त्यदक्षिणामुखःप्राचीना
वीती सव्यंजान्वाच्यास्मत्पितृपितामहप्रपितामहानाममुकशर्मणाममुकगोत्राणां वसुरुद्रादित्यस्वरूपाणांसपत्नीकानांमातामहानांचैवंनिधानांनित्य
श्राद्धमहंकरिष्यइतिसंकल्प्य संकल्पोत्तरमपसव्यादीतिपृथ्वीचंद्रः । पित्रादीनांमातामहादीनांचेदासनमितिद्विगुणभुग्नंकुशंवामतोदत्त्वागंधा
दिदत्त्वामंडलेनिहितंभस्मादिनावेष्टयपरिविष्यगायत्र्याभ्युक्ष्यपात्रमालभ्यपृथिवीतइतिपठित्वेदंविष्णुरितिपंचभिर्द्विजांगुष्ठंहविषिनिवेश्यवामेनपा
णिनापात्रमालभ्य नामगोत्रोच्चारणपूर्वंपित्रादिभ्यःसपत्नीकेभ्यइदमन्नंयथाशक्तिसोपस्करममृतरूपेणस्वधासंपद्यतांकव्यंनममेतित्यजेत् । एवंमाता
महेभ्योपि । कल्पतरुस्त्वेवम् । श्रेषाविभज्यान्नंयुष्मभ्यंनमइतिविशेषमाह । इदमन्नंतुभ्यस्वधेतिप्रत्येकंवद्भ्योनमःपितृभ्यइतिषड्भ्यःसकृद्वा
त्यजेदितिश्रीदत्तः । गायत्रीमध्वितिजपित्वापोशनंदत्त्वागायत्रींपठित्वाभोजनोत्तरंतृप्तान्पृष्ट्वोत्तराचमनंदत्त्वासुप्रोक्षितादिकृत्वादक्षिणांदत्त्वाअ

दत्त्वान्निसर्जयेत् । भोक्त्रभावेन्नंभिक्षवेगोभ्योवादद्यात् अभौवजलेवाक्षिपेत् । दिवोदासीयेग्रंथांतरे—यद्दद्यद्भोज्यात्पूर्वमेवस्वधाक्षय्यं स्वस्तीतिचेदित्युक्तेसद्दाशनंनमुख्यम् इतिनित्यश्राद्धम् ।

अथमनुष्ययज्ञः । सचमनुष्यभोजनात्मकः । यन्मनुष्येभ्योददातीत्याश्वलायनसूत्रात् । नियुज्यैकमनेकंवाश्रोत्रियंभाक्षुख सदा । निवीतीतद्गतमनाऋषीन्ध्यायन्समाहितः इति चंद्रिकायांनारायणोक्तेः । ऋषीन् सनकादीन्मनुष्यान् । तत्राप्यतिथिभोजनं मुख्यम् । यत्तुयाज्ञवल्क्यः—भोजयेच्चागतान्कालेसखिसंबंधिबांधवानितितदतिथिभोजनोत्तरमपिपंक्तौसत्त्वादयोभोज्याइत्येतदर्थं । मनुष्ययज्ञार्थमथितिंभोजयेदित्यापस्तंबपरिशिष्टात् । पितृभ्योदद्यात्ततोतिथीन्भोजयेदितिवसिष्ठस्मृतेर्नित्यश्राद्धोत्तरंमनुष्ययज्ञइत्यापरार्कः । कल्पतरौमदनरत्नेचैवम् । नित्यश्राद्धात्पूर्वमनुष्ययज्ञइतिदिवोदासः । अतिथ्यभावेन्येनापिब्राह्मणेनमनुष्ययज्ञसिद्धिः । अहरहर्ब्राह्मणेभ्योदद्यान्मूलफलशाकेभ्योऽप्येवंमनुष्ययज्ञमाप्नोतीतिबौधायनोक्तेः । तत्राशक्तौ चंद्रिकायांनारायणः—अशक्तावन्नमुद्धृत्यतेभ्यएवंप्रकल्पयेत् इति ॥ ॥ यत्किंचिन्मनुष्यभोजनेनहंतकारादिनावाकृतेपिमनुष्ययज्ञेऽतिथिभोजनमावश्यकम्—अतिथिर्यस्यभग्नाशोगृहात्प्रतिनिवर्तते । असत्कृतोनिराशश्चससद्योहंतितत्कुलमितिमाधवीयेदेवलोक्तेः । विष्णुपुराणे—ततोगोदोहमात्रंवैकालंतिष्ठेद्गृहांगणे । अतिथिग्रहणार्थायतदूर्ध्वंवायथेच्छया । अतिथितन्नसंप्राप्तंपूजयेत्स्वागतादिना । अतिथिलक्षणं व्यासः—मुहूर्तस्याष्टमंभागमुद्दीक्ष्योह्यतिथिर्भवेत् । दूराच्चोपगतंश्रांतंवैश्वदेवउपस्थितम् । अतिथितंविजानीयान्नातिथिःपूर्वमागतः । मनुः—एकरात्रंतुनिवसन्नतिथिर्ब्राह्मणःस्मृतः । नैकग्रामीणमतिथिंविप्रंसांगतिकंतथा । उपस्थितंगृहेविद्याद्भार्यायत्राग्नयोपिच । शातातपः—अचिंतितमनाहूतदेशकाल उपस्थितम् । अतिथिंतंविजानीयान्नातिथिःपूर्वमागतः । यमः—तिथिपर्वोत्सवाःसर्वेत्यक्तायेनमहात्मना । सोऽतिथिःसर्वभूतानांशेषानभ्यागतान्विदुः । मतीयतिर्वैकरात्रंनिवसन्नुच्यतेऽतिथिः । आद्वहेमाद्रौशातातपः—प्रियोवायदिवाद्वेष्योमूर्खःपंडितएववा । प्राप्तस्तुवैश्वदे

वर्तेसोऽतिथिःस्वर्गसंक्रम[1] । चंद्रोदये पाद्मे—देशंनामकुलंविद्यांपृष्ट्वायोऽन्नंप्रयच्छति । नसतत्फलमाप्नोतिदत्वास्वर्गंनगच्छति । मनुः—
ब्राह्मणस्यनत्वतिथिर्गृहेराजन्यउच्यते । वैश्यःशूद्रःसखाचैवज्ञातयोगुरुरेवच । यदित्वतिथिधर्मेणक्षत्रियोगृहमाव्रजेत् । भुक्तवत्सुचवि
प्रेषुकामंतमपिभोजयेत् । वैश्यशूद्रावपिप्राप्तौकुटुंबेतिथिधर्मिणौ । काममिच्छया नत्ववश्यं । कुटुंबेतत्रह्रदितिगृहे नत्रवासादौ । आपस्तंबः—
शूद्रमभ्यागतंकर्मणिनियुंज्यादथास्मैदद्यात्दासावाराजकुलादाहृत्यातिथिवच्छूद्रंपूजयेयुरिति । राजकुलं स्वस्वामिगृहम् । पूजामंत्रमाहपरा
शरः—अतिथेऽमरदेहस्त्वमुत्तारार्थमिहागतः । संसारपंकमग्नंमामुद्धरस्वाघनाशन । अतिथिबहुत्वेविशेषमाहतुर्बौधायनशंखौ—ब्राह्मणक्ष
त्रियविट्शूद्रानभ्यागतान्यथाशक्त्यापूजयेद्यदिबहूनांनशक्नुयादेकस्मैगुणवतेदद्याद्योवाप्रथममागतःस्याच्छ्रोत्रियस्तस्मादिति । आपस्तंबः—
अतिथिंनिराकृत्योपोष्यश्वोभूतेयथामनसंतर्पयित्वासंसाधयेदिति । संसाधयेत्प्रेषयेत् । पराशरः—यतिश्चब्रह्मचारीचपक्वान्नस्वामिनावुभौ ।
तयोरन्नमदत्वातुभुक्त्वाचांद्रायणंचरेत् । दद्याच्चभिक्षात्रितयंपरिव्राड्ब्रह्मचारिणाम् । इच्छयावाततोदद्याद्विभवेसत्यवारितम् । कौर्मे—भिक्षां
चभिक्षवेदद्याद्विधिवद्ब्रह्मचारिणे । भिक्षूनाहव्यासः—ब्रह्मचारीयतिश्चैवविद्यार्थीगुरुपोषकः । अध्वगःक्षीणवृत्तिश्चषडेतेभिक्षुकाःस्मृताः ।
वैश्वदेवात्पूर्वमप्येतेपूज्याः । अकृतेवैश्वदेवेतुभिक्षुकेगृहमागते । वैश्वदेवार्थमुद्धृत्यभिक्षांदत्वाविसर्जयेत् । वैश्वदेवकृतंदोषंशक्तोभिक्षुर्व्यपोहितुम् ।
नतुभिक्षुकृतंदोषंवैश्वदेवोव्यपोहतीतिव्यासोक्तेः । चंद्रोदयेशातातपः—ग्रासमात्राभवेद्भिक्षाचतुर्ग्रासंतुपुष्कलम् । पुष्कलानिचचत्वा
रिहंतकारःप्रकीर्तितः । मदनरत्नेप्रकारांतरम्—ग्रासमात्राभवेद्भिक्षाअग्रंग्रासचतुष्टयम् । अग्रंचतुर्गुणीकृत्यहंतकारोविधीयते । मयूरांडप्रमा
णोग्रासइतिमिताक्षरा । गौतमस्तु—ग्रासप्रमाणस्याविकारेणेति । कुक्कुटांडादामलकप्रमाणमप्युक्तंस्मृत्यंतरे । शातातपेनप्रकारांतरमु

१ तस्यदासा स्वस्वामिगृहादागत्य ।

कम् । यावन्मात्राशनोग्रासस्तावद्धुताशीत्याहुतको द्विजः । तद्ग्रासचतुर्गुणंहंतकारंविदुर्बुधाः । हंतकारादिदानंमनुष्यभोजनेकृतेपिनित्यमितिकेचित् । मनुष्यभोजनाशक्तावित्यन्ये । ब्राह्मे—यःपात्रपूर्णींभिक्षांयतिभ्यःसंप्रयच्छति । विमुक्तःसर्वपापेभ्योनासौदुर्गतिमाप्नुयात् । व्यासः—यतिहस्तेजलंदद्याद्भैक्ष्यंदद्यात्पुनर्जलम् । तद्भैक्ष्यंमेरुणातुल्यंतज्जलंसागरोपमम् । पाद्मे—स्वर्णपात्रेण चंद्रोदयेब्राह्मे—तेभ्योदेयं गृहाद्बहिरिति । विष्णुः—भिक्षुकाभावेऽग्रंगोभ्योदद्यादग्नौवाक्षिपेदिति । प्रोषितभर्तृकायाःपराशरः—भार्याभोजनवेलायांभिक्षाःसंप्रयच्छया । दत्ताशेषंसमश्नीयात्सायंसायंकैःसह ॥

अथगोग्रासः । सचशिष्टाचारात्पंचयज्ञोत्तरमितिमदनरत्ने । प्रभासखंडे—तृणानाग्रपरागावःकर्तव्यामक्तितोऽन्वहम् । अकृत्वास्वयमाहारंकुर्वन्प्राप्नोतिदुर्गतिम् । आत्माहारप्रमाणेनमल्यंहंगोपुदीयते । आत्माहारप्रमाणान्नाशक्तौचंद्रोदयेब्रह्माण्डे—सौरभेय्यःसर्वहिताः पवित्राःपुण्यराशयः । प्रतिगृह्णंतुमेग्रासंगावस्त्रैलोक्यमातरः । दद्यादनेनमंत्रेणगवांग्रासंसदैवहि । सदैवेत्युक्तेःकरणेप्रत्यवायश्रुतेश्चायंनित्यइत्याचारादर्शः । प्रभासखंडे मंत्रांतरमुक्तं—सौरभेयीजगत्पूज्यादेवीविष्णुपदेस्थिता । सर्वदेवमयीग्रासंमयादत्तंप्रतीक्षतु । अयंकाम्यश्च—तृणोदकेनसंयुक्तंयःप्रदद्याद्गवाह्निकम् । कपिलाशतदानस्य फलंविप्रास्तस्यइति चंद्रोदये भविष्यात् । इतिश्रीमन्नारायणभट्टात्मजसूरिरामकृष्णभट्टसूनुदिनकरभट्टानुजलक्ष्मणभट्टकृताचाररत्नेपंचमहायज्ञप्रकरणम् ॥

अथभोजनविधिः । वसिष्ठः—बाल्ये भोजनं गृहे नैर्ऋत्यांसूतिकागृहम् । इति । याज्ञवल्क्यः—बालःसुवासिनीवृद्धगर्भिण्यातुरकन्यकाः । संभोज्यातिथिभृत्यांश्चदंपत्योःशेषभोजनम् । कन्यानूढा । मनुविष्णू—सुवासिनीःकुमारांश्चरोगिणोगर्भिणीस्तथा । अतिथिभ्योऽग्रएवै

1 सचुर्यस्य । 2 तेभ्योदद्यान्नृपात् । 3 इदंभोजनमुक्तादिवर्गभुक्तपश्चादेकातेविवेक—दंपत्योः शेषभोजनमिति याज्ञवल्क्योक्तेः । आहारनिर्हारविहारयोगाः सुसंवृताधर्मविदातुकार्याः इति निर्जनेविधेयाद्विवचनात् ।

तान्भोजयेदविचारयन् । अग्रेअथमम् । नात्रयथाश्रुतेतात्पर्यं किंत्वेतेषुभुक्तवत्सुस्वयंभुंजीतेत्यत्रेतिकल्पतरुः । पर्यंत्वेवकारानुपपत्तेर्यथाश्रुते
एवतात्पर्यं अतएवाविचारयन्नित्युक्तमितिब्रूमः । याज्ञवल्क्यः—बालः(स)सुवासिनीवृद्धगर्भिण्यातुरकन्यकाः । संभोज्यातिथिभृत्यां
श्चदंपत्योःशेषभोजनम् । भोजयेच्चागतान्कालेसखिसंबंधिबांधवान् । शक्ताविदम् । तथाचमार्कंडेये—कुटुंबिनोभोजनीयाःस्वसमंविभवे
सति । आचारादर्शेनंदिपुराणे—यतेद्ब्राह्मणपूर्वंतुभोक्तुमन्नंसदागृही । पराशरः—एकंद्वित्रिचतुर्विप्रान्भोजयेत्स्नातकान्द्विजः ।
शंखः—पंचार्द्रोभोजनंकुर्यात्भूमौपात्रंनिधायच । उपवासेनतत्तुल्यंमनुराहप्रजापतिः । उपलिप्तेशुचौदेशेपादौप्रक्षाल्यवैकरौ । आचम्यार्द्रान
नोक्रोधःपंचार्द्रोभोजनंचरेत् । आचमनंचभोजनशालायाबहिःकार्यम् । यस्तुभोजनशालायांभोक्तुकामउपस्पृशेत् । आसनस्थोनचान्यत्रस
विप्रःपंक्तिदूषकइतिचंद्रोदयेआपस्तंबोक्तेः । तस्माद्बहिरुपस्पृश्यआचांतःप्रविशेद्गृहमित्याचारादर्शोद्गाह्याच । यमः—आर्द्रपादस्तु
भुंजानःशतंवर्षाणिजीवति । इति ॥

अथभोजनपात्राणि । चंद्रोदयेस्मृतिपुराणे—भुंजीतपात्रेसौवर्णेपद्मिन्यादिदलादिके । माधवीयेमेधातिथिः—सौवर्णेराजतेताम्रे
पद्मपत्रपलाशयोः । भुंजीतेतिशेषः । चंद्रोदयेत्रिः—पंचाशत्पलिकंकांस्यंत्वधिकंभोजनायवै । गृहस्थैस्तुसदाकार्यमभावेहेमरौप्ययोः ।
तत्रैवप्रचेताः—पलाद्विंशतिकादर्वागतऊर्ध्वंयदृच्छया । चंद्रिकायांपैठीनसिः—एकएवतुयोभुंक्तेविमलेकांस्यभाजने । भाजनेभोजने
चैवत्रिरात्रंफलमश्नुते । चत्वारितस्यवर्धंतेआयुःप्रज्ञायशोबलम् । भोजनंकांस्यपात्रेणयःकरोतिसकृद्द्विजः । वर्धंतेतस्यचत्वारिआयुःकांतिर्यशोब
लम् । हेमाद्रौहारीतः—राजतपर्णताम्रकांस्यपात्राणिभोजनेइति । ताम्रविधिर्गृहस्थेतरपरः । ताम्रपात्रेनभुंजीतभिन्नकांस्येमलाविले । पलाश

१ पक्षीपलाशपत्रेष्वितिपाठः ।

पद्मपत्रेषु गृही भुक्त्वैंदवं चरेदिति पृथ्वीचंद्रः । ताम्रविधिः श्राद्धपर इत्यन्ये । यत्त्वपरार्के—सप्तम्यां नैव कुर्वीत ताम्रपात्रे च भोजनमिति तत्पूर्वो क्तनिषेधोपसंहारार्थं दोषाधिक्यार्थं वा । ताम्रवत्सैत्तलेऽपि निर्णयः । यत्तु—नायसान्यपि कार्याणि पैत्तलानि तु कर्हिचिदिति श्राद्धहेमाद्रौ वाराहं तत्र करणाच्छ्राद्धपरं । भिन्नदोषो न कांस्य एव किंतु तन्न दोषाधिक्यम् । नकाष्ठायसे न मृत्पात्रे न भिन्ने नावकीर्ण इति हारीतोक्तेः । शूद्रभाजनभिन्नभा जनेषु भुक्त्वोपवासो भिन्नकांस्ये त्रिरात्रमिति स्मृत्यर्थसाराच्च भिन्नदोषस्ताम्राधन्यपरः । ताम्ररजतसुवर्णशंखशुक्त्यश्मस्फटिकानां भिन्नमभिन्नमिति पै ठीनसिस्मृतेः । स्कांदे कार्तिकमाहात्म्ये—पत्रभोजी भवेदूर्जे कांस्यं त्याज्यं प्रयत्नतः । तथा—यो व्रती कांस्यभोजी स्यात्स व्रतफलं लभेत् । ज्योतिर्निबंधे—भोज्यपात्रसुवासिन्यौ पद्म्यैद्वासमाहरेत् । तत्राऽऽत्मशासनप्रोक्ते काले भोजनमाचरेत् । सुवासिन्यौ सोमे । स्मृतिरत्नाव ल्याम्—वल्लीपलाशपत्रेषु स्थलजे पुष्करे तथा । गृहस्थस्तु न चाश्नीयाद्भुक्त्वा चांद्रायणं चरेत् । करेकर्परके चैव आयसे ताम्रभाजने । वटार्काश्वत्थ पत्रेषु भुक्त्वा चांद्रायणं चरेत् । चंद्रिकायां पैठीनसिः—वटार्काश्वत्थपर्णेषु कुंभीतिंदुकजेषु च । श्रीकामो नैव भुंजीत कोविदारकरंजयोः । आग्नेये—वटार्काश्वत्थधवलसर्वं भल्लातकीस्त्यजेत् । स्कांदे प्रभासखंडे शूद्रप्रकम्य—मध्यपत्रेन भुंजीत वटवृक्षस्य भामिनि । प्रचे ताः—मृन्मये पर्णपृष्ठे वा कार्पासे तांतवे तथा । नाश्नीयाच्च पिबेच्चैव करेणांजलिनापि च । यस्तु न कदलीपत्रमिति हेमाद्रौ निषेधः स श्राद्धपरः । नृसिंहांशुधिमहोदधौ गोविंदार्णवे च—कांजपिप्पलन्यक्षक्षकुंभ्यर्कतिंदुकाः । एषां पत्रेषु नाश्नीयात्कोविदाराश्मयोरपि । विपर्यस्ते षु पत्रेषु तिर्यक्पत्रे च दारुजे । अजपीमक्षपत्रेषु शूद्रस्यूतेतदाहृते । कटकैः सीवितैः पत्रे तथा वेणुदलेन च । अत्र मूलं मृग्यम् । चंद्रिकायां पुराणे—पालाशेषु च पत्रेषु मध्यमेषु विशेषतः । यः करोत्यशनं तस्य प्राजापत्यं दिने दिने । यदीच्छत्यूर्ध्वगामित्वं परस्थानं च शाश्वतम् । पत्रेपर्णेषु भोक्तव्यं मासमेकं निरंतरम् । इति ॥

१ पद्म्यैश्वासमाहरेत् । २ पर्णपत्रेषु ।

अथभोजनेदिगादिनियमाः । यमः—प्राङ्मुखोऽन्नानिभुंजीतसूर्याभिमुखएवच । ब्राह्मे—प्राङ्मुखोदङ्मुखोवापिस्वाचांतोवाग्यतः शुचिः । भुंजीताद्यंचतच्चित्तोऽंतर्जानुःसदानरः । घराकौर्मे—योभुंक्तेवेष्टितशिरायश्चभुंक्तेउदङ्मुखः । सोपानत्कश्चयोभुंक्तेसर्वंविद्यात्तदासुरमिति । तत्रविकल्पइतिकेचित् । भोजनेउदङ्मुखत्वादिनिषेधोनिष्कामपरइत्याचारादर्शः । पुत्रिपरइतिवयम् । पुत्रवान्स्वगृहेनित्यंनाश्नीयादुत्तरामुखः इतिस्मृतिमंजर्यांवचनात् । प्रयोगपारिजातेस्मृतिमंजर्याम्—पितरौजीवतौचेन्नाश्नीयादुत्तरामुखः । तयोस्तुजीवतोरेकस्तथैवनियमःस्मृतः । विष्णुपुराणे—विशुद्धवदनःप्रीतोभुंजीतनविदिङ्मुखः । मनुः—आयुष्यंप्राङ्मुखोभुंक्तेयशस्यंदक्षिणामुखः । श्रियंप्रत्यङ्मुखोभुंक्तेऋतंभुंक्तेउदङ्मुखः । आयुषेहितमायुष्यं । श्रियंऋतंचेच्छन्निति शेषः । सकृदनुष्ठानेनापिफलमितिकेचित् । यावज्जीवंनियमः फलायविधीयतइत्यन्ये । कौर्मे—नांतरिक्षेनचाकाशेनचदेवालयादिषु । भुंजीतेतिशेषः । हारीतः—भूमावेवनिदध्यान्नोपरिपात्राणीति । वसिष्ठः—नोत्संगेनभुविनपाणौनाकाशइति । पात्राणिनिदध्यादितिशेषः । भुविकेवलायाम् । अतएवापस्तंबः—नचापिभुंजीतकृतभूमौतु भुंजीतेति । कृतत्वंनावोक्षणप्रक्षेपेणेतिकल्पतरुः । कृतायांगोमयादिनासंस्कृतायामितिहरदत्तः ॥

मंडलविचारः । मदनरत्नेब्राह्मे—अकृत्वामंडलंयेतुभुंजतेऽधमयोनयः । तेषांतुयक्षरक्षांसिहरंत्यन्नस्यतद्बलम् । तत्रैवशंखः—आदित्यावसवोरुद्राब्रह्माचैवपितामहः । मंडलान्युपजीवंतितस्मात्कुर्वीतमंडलम् । चतुष्कोणंद्विजाग्र्यस्यत्रिकोणंक्षत्रियस्यतु । मंडलाकृतिवैश्यस्यशूद्रस्याभ्युक्षणंस्मृतम् । मदनपारिजातेव्यासः—चतुरस्रंत्रिकोणंचवर्तुलंचार्धचंद्रकम् । कर्तव्यमानुपूर्व्येणब्राह्मणादिषुमंडलम् । तत्रैवब्राह्मे—मंडलंगोमयेनस्यादथवागौरमृत्स्नया । आचारादर्शेबौधायनः—भस्मनावारिणावापिकारयेन्मंडलंततः । अंगिरस्स्मृतौ—नासंदीभोजनेशस्ताविप्राणांतुकदाचन । चतुर्विंशतिमतसारे—प्राणाहुत्यूर्ध्वमुद्धृत्यपात्रंयंत्रेविनिक्षिपेदिति तद्धृत्रियादिपरं श्लोकेविप्रग्रहणादि

1 आसंदीलोहत्रिपदमुपवेश्यान्नदीपस्थापनादिसाधनम् ।

तिकेचित् । पंचग्रासांस्तुभुक्त्वादौकश्चिद्वेश्मनिसंकटे । पात्रमुद्धृत्यशेषंतुभक्षयेत्तांकरद्वयादितिग्रास्योक्तेः । आसंदीआपस्तंबेतिमदन
रत्ने । श्राद्धेआसंदीनिषेधोहेमाद्रौब्राह्मे—पिन्येकर्मणिभुंजानोभूमेःपात्रंनचालयेत् ॥ स्मृत्यर्थसारे—नंयन्त्रिकायांयतिर्व्रतीब्रह्मचारीवि
धवाभुंजीतेति ।

भोजनकालविचारः । श्रुतौ—सायंप्रातरश्नीयादिति । गौतमः—सायंप्रातस्त्वन्नमभिपूजितमनिंदन्भुंजीतेति । प्रातः
शब्दःपंचमभागपरः । सायंशब्दोघटिकात्रयोर्ध्वरात्रिपरः । चत्वार्येतानिकर्माणिसंध्यायांपरिवर्जयेत् । आहारंमैथुनंनिद्रांस्वाध्यायंचचतु
र्थकमितिशातातपोक्तेः । मुनिभिर्द्विरशनमुक्तंविप्राणांमर्त्यवासिनांनित्यम् । अहनिचतथातमस्विन्यांसार्धप्रहरयामांतइतिछंदोगपरि
शिष्टात् । अत्र सार्धप्रहरातुज्ञापद्विषया । निशायाःप्रथमेयामेजपयज्ञार्चनादिकम् । स्वाध्यायोभोजनंप्रोक्तवर्जयित्वामहानिशामिति
शौनकोक्तेः । महानिशाशब्देनयामद्वयमुच्यतइत्युक्तंप्राक् । दिवासायंभोजनद्वयम् । सायंप्रातर्द्विजातीनामशनंश्रुतिचोदितम् ।
नांतराभोजनंकुर्यादग्निहोत्रसमोविधिरितिगर्भोक्तेः । द्विजग्रहणाच्छूद्रस्यनायंनियमः । अतएवनिषेधादेवरात्रावपिभोजनद्वयंन । अत
एवापस्तंबेनहरदत्तेनचद्विर्भोजनविधिःपरिसंख्येत्युक्तं । परिसंख्यात्वोक्तेस्तन्मतेद्वितीयभोजनमनावश्यकम् । विज्ञानेश्वरेणतुद्विर्भु
ञ्जीयादेवेतिनियमविधित्वोक्तेः शक्तस्यद्विर्भोजनमावश्यकम् । चंद्रिकाप्येवम् । अशक्तौतुयत्किंचिद्दल्पभक्ष्यम् । औपवस्तमेवंका
लांतरेभोजनमित्यापस्तंबोक्तेः । औपवस्तंउपवासस्तत्तुल्यमितिहरदत्तः । तदशक्तौअद्भिर्वासायमिति बौधायनोक्तंज्ञेयम् ।
नांतरेतिफलमूलान्यपरम् । दिवाचनांतराभुंजीतान्यत्रमूलफलेभ्यइत्यापस्तंबोक्तेः । आचारादर्शेतुद्विरशननियमःप्राणाग्निहोत्रमा
त्रपरः अग्निहोत्रसाम्यादित्युक्तम् । साम्योक्तिरुपासनापरेतिवाचस्पत्ये । सान्निकब्रह्मचारिणोस्तुनद्विर्भोजननियमः । कर्हिताभिरनड्वां

१ एकस्मिन्काले ।

श्चब्रह्मचारीचतेत्रयः । अथंतएवसिध्यंतिनैषांसिद्धिरनश्नतामित्यपरार्केवसिष्ठस्मृतेः । ब्रह्मचारीतुउपकुर्वाणकोनैष्ठिकश्च । अनडुत्त
देनकालानियमउक्तइत्युज्ज्वला । यजु—ब्रह्मचारिणःसायंप्रातर्भिक्षेणाइतिनियमःसभिक्षायाएवनभोजनस्य । गृहस्थोब्रह्मचारीचयोनश्नंस्तु
तपश्चरेत् । प्राणाग्निहोत्रलोपेनअवकीर्णीभवेत्तुसइत्यपरार्केबौधायनोक्तेरुपवासादिरनयोर्न । एकादश्यादेस्तुनित्यत्वात्तयोरुपवासत्वा
भावाच्चानुष्ठानम् । अत्रगृहस्थःसाग्निः । अनग्नयस्तुयेविप्रास्तेषांश्रेयोविधीयते । व्रतोपवासनियमैर्नानादानैस्तथानृपेतिमदनरत्ने भविष्यो
क्तेः । अपरार्केबौधायनः—प्राणाग्निहोत्रमंत्रांस्तुनिरुद्धेभोजनेजपेत् । त्रेताग्निहोत्रमंत्रांस्तुद्रव्यालाभेयथाजपेत् । बृहस्पतिः—दि
वानिद्रांपरान्नंचपुनर्भोजनमैथुने । क्षौद्रंकांस्यामिषंतैलंद्वादश्यामष्टवर्जयेत् । पुनर्भोजनमध्वानंभारमायासमैथुने । श्राद्धकृच्छ्राद्धभुक्चैवस
र्वमेतद्विवर्जयेत् । हेमाद्रौव्यासः—आदित्येहनिसंक्रांतावसितैकादशीमिह । व्यतीपातेकृतेश्राद्धेपुत्रीनोपवसेद्गृही । अपरार्के—अयनेर
विसंक्रांतौरविवारेचपर्वसु । मृताहेजन्मदिवसेनकुर्याद्द्राग्निभोजनम् । हेमाद्रौजातूकर्ण्यः—अहन्येवतुभोक्तव्यंकृतेश्राद्धेनराधिप । हेमाद्रौ
कौर्मे—शाकंमांसंमसूरांश्चपुनर्भोजनमैथुने । द्यूतमत्यंबुपानंचदशम्यांससंत्यजेत् । कचिद्व्रतपरमितिहेमाद्रिः । दशम्यांपुनर्भोजननिषेधः
काम्यैकादशीव्रते । सायंप्रातर्यतयोरह्नोःसायंप्रातश्चमध्यमे । उपवासफलंप्रेप्सुरित्युक्तेरितिहेमाद्रिमाधवकालादर्शनिर्णयामृतादयः ।
चंद्रिकायांतुनिर्लेपिफलसत्वान्नित्यपरत्वमपीत्युक्तम् । इतिविज्ञायकुर्वीतावश्यमेकादशीव्रतम् । विशेषनियमाशक्तोहोरात्रंभुंजिवर्जितइतिमाध
वीयेब्रह्मवैवर्तात् । भूताष्टम्योर्दिवाभुक्त्वारात्रौभुक्त्वाचपर्वसु । एकादश्यामहोरात्रंभुक्त्वाचांद्रायणंचरेत् । अत्र—शुक्लाष्टमीकृष्णचतुर्दशी
चदर्शोऽथराकारविसंक्रमश्चेतिग्रंथांतरेशुक्लाष्टमीकृष्णचतुर्दश्योःपर्वत्वात्कृष्णाष्टमीशुक्लचतुर्दशीपरंभूताष्टमीपदम् । तेनतयोरेवदिनाभोजनंनेत्युक्तं 

१ भोजनन्तुवारत्वारम् । २ तपोरूपत्वाभावादितिपाठ । ३ आपोयत्वाहेत्यादय प्राणाग्निहोत्रमंत्रा । ४ एकादशीदिने । ५ दशमीद्वादश्यो । ६ एकावस्था ।

निर्णयामृते । स्मृत्यर्थसारे—अष्टमीचतुर्दश्योर्नक्तंकार्यमेकभक्तंचेति । अत्रकेचिदुपवासात्पूर्वदिनेदशम्यामल्पत्वेदशमीमध्यएकभोजनं कार्यम् । एकादश्यांनभुंजीतेत्येकादश्यांभोजननिषेधात् । निषेधस्तुनिवृत्त्यात्माकालमात्रमपेक्षतइतिन्यायाच्चेत्याहुः । तन्न । दशम्यामेकभ क्तस्तुमांसमैथुनवर्जितइतिचंद्रिकायांदेवलेनमध्याह्नकालिकैकभक्तमतविधानाद्विधिस्पर्शेचनिषेधानवकाशात् द्वादश्यादिवन्माध्याह्निकापक र्षकाभावाच्च । नचात्रनक्तविधिःकिंतुपुनर्भोजननिषेधमात्रमितिवाच्यम् । निषेधकल्पनेमानाभावात् । हविष्याशनमध्याह्नाद्यशास्त्रसंगात् । सर्वत्रैकभक्तादौतथाप्रसंगाच्च । नचहविष्यादिकाम्यैकादशीव्रतमात्रांगे संकोचेमानाभावात् । प्रयोगपारिजातेदेवलः—श्राद्धंकृत्वातुयो मर्त्योनचभुंक्तेकदाचन । देवाहविर्नगृह्णंतिकव्यानिपितरस्तथा । एकादश्यादौतुसएव—उपवासोयदानित्यःश्राद्धंनैमित्तिकंभवेत् । उपवासंत दाकुर्यादाघ्रायपितृसेवितम् । प्रयोगपारिजातस्त्वेकादशीमात्रपरम् । मातापित्रोःक्षयेप्राप्तेभवेदेकादशीयदा । संभाव्यपितृदेवांश्चआजिघ्रे त्पितृसेवितमितिकात्यायनोक्तेस्तेनशिवरात्र्यादौभोजनमेवेत्याह । पितृपदंजनकपरमिदं । तेनान्यश्राद्धेनावघ्राणम् । हेमाद्रिस्तु—चतुर्द श्यांयदानैवश्राद्धंनैमित्तिकंतथा । उपवासंतदाकुर्यादाघ्रायपितृसेवितमितिप्रभासखंडाच्छिवरात्रावप्यवघ्राणम् । एवंचयस्मिन्नुपवासेकृतेपुण्यं स्यात्तेमहत्स्यापिंतत्रावघ्राणम् । यत्रतुयमप्यल्पंतत्रायाचितमेकभक्तंनाकार्यम् । उपवासदिनेश्राद्धंकथंचिद्यदिजायते । उपवासेश्चमेधाख्यराजसूयम खाचिते । वाजपेयंलभेन्नोक्ताएकभक्तेऽग्निहोत्रमितिप्रभासखंडादित्याह ॥

अथभक्ष्याभक्ष्यनिर्णयः । याज्ञवल्क्यः—अदत्तमग्निहीनस्यनान्नमद्यादनापदि । कदर्यबद्धचौराणांक्लीबरंगावतारिणाम् । वैणाभि शस्तवार्धुष्यगणिकागणदीक्षिणाम् । अग्निहीनःशूद्रः । शूद्रान्ननिषेधोऽसच्छूद्रपरः । गोभूमिरत्नंहोमार्थंसच्छूद्रस्यगृहेग्रहेदितिस्मृत्यादिविरोधा दितिविज्ञानेश्वरानंदः । तन्न । राजान्नंतेजआदत्तेशूद्रान्नंब्रह्मवर्चसम् । आयुःसुवर्णकारान्नंयशश्चर्मावकर्तिनः । भुक्त्वाचोन्यतमस्यान्नममत्याक्षपणंत्र्यहमिति

मनुस्कंदः। आत्मानंधर्मकृत्यंचपुत्रान्दारांश्चपीडयेत्। लोभाद्यःपितरौभृत्यान्सकदर्यइतिस्मृतः। बद्धोवाचानिगडैश्च। गणोत्रानिमक्तमित्रानाम्। अन्यथातेषामपिस्तात्वामक्षणापत्तेः। चिकित्सकातुरक्रुद्धपुंश्चलीमत्तविद्विषाम्। क्रूरोग्रपतितव्रात्यदांभिकोच्छिष्टभोजिनाम्। अवीरास्त्रीस्वर्णकारस्त्रीजितग्रामयाजिनाम्। शस्त्रविक्रयिकर्मारतंतुवायश्ववृत्तिनाम्। नृशंसराजरजककृतघ्नवधजीविनाम्। चैलधावसुराजीविसहोपपतिवेश्मनाम्। पिशुनानृतिनोश्चैवतथाचाक्रिकबंदिनाम्। एषामन्नंनभोक्तव्यंसोमविक्रयिणस्तथा। क्रूरोभयानकः। उग्रःक्रूरकर्मेतिमिताक्षरा। राजन्याच्छूद्रायासुतश्चइतिमदनरत्ने। शंखः—गीतावगीतरुदितक्रंदितावघुष्टपरिशुष्कविस्मितोन्मत्तावधूतराजपुरोहितान्नानिवर्जयेदितिमदनरत्ने। यमः—सद्यस्तानंतुयोभुंक्तेसभुंक्तेपृथिवीमलम्। तत्रैवविष्णुपुराणे—विष्णुंजामातरंमत्वातस्यकोपंनकारयेत्। अप्रजायांतुकन्यायांनाश्नीयात्तस्यवैगृहे। मनुः—उग्रान्नंसूतिकान्नंचपर्याचांतमनिर्दशम्। नाद्याच्छूद्रस्यपक्वान्नंविद्वानश्राद्धिकोद्विजः। आददीताममेवास्मादवृत्तावेकरात्रिकम्। सूतिकान्नंसूतिकामुद्दिश्यपक्वं। पर्याचांतमुत्तराचमनोत्तरंपात्रस्थितम्। पार्श्वाचांतमितिपाठेपंक्तिस्थेउत्थितेस्वपात्रस्थमपिनभक्ष्यम्॥

निषिद्धभोजनेप्रायश्चित्तम्। शौनकः—श्राद्धेचैजपेन्मंत्रंदशवारंनसंशयः। सीमंतेचयदाभुंक्तेमुच्यतेकल्मषात्तदा। उपासानकासूक्तंतुजपेद्दशजलेपिवा। प्रमादाद्यस्ततोभुंक्तेसूतकान्नमकल्मषम्। अविघ्नःप्रजपेन्मंत्रंशतवारंशिवालये। सूतकान्नंयदाभुंक्तेतदापापात्प्रमुच्यते। पर्जन्यवातावर्गंचशतवारंजपेज्जले। सूतकस्यगृहेभुंक्तेतदापापात्प्रमुच्यते। इंद्रोअश्वायिमंत्रंचप्रयुतंचेत्यकल्मषम्। ज्ञानतोज्ञानतःस्पृष्ट्वाभुक्तिकालेरजस्वलाम्। इदंनमोजपेन्मंत्रंसहस्रंचेन्नदुष्कृतम्। ज्ञानतोज्ञानतोदृष्ट्वाभुक्तिकालेरजस्त्रियाः। अग्निंनमाजपेन्मंत्रंदशकृत्वोविशेषतः। अंत्यजानांध्वनिंश्रुत्वापश्चाद्भुक्तेनकल्मषम्। अभ्येग्रासोजपेन्मंत्रंदशवारंनकल्मषम्। श्वानादिदर्शनंकृत्वापश्चाद्भुंक्तेयदातदा। आयेतस्युर्जपेन्मंत्रंदशवैविष्णुमंदिरे। हस्तदत्तंयदाभुंक्तेतदापापात्प्रमुच्यते। तेअभ्येवाजपेन्मंत्रंशतंविद्यालयेसदा। दिवाद्विर्भोजनंकृत्वातस्मान्मुच्येतकल्म-

पात् । इयोनश्र जपेन्मंत्रंशतवारंजलेतथा । रात्रौद्विर्भोजनंकृत्वाकल्मषाच्चप्रमुच्यते । लसुमेधंजपेन्मंत्रंदशवारंशिवालये । अष्टम्यांवाचतुर्दश्यांदिवाभुक्तेनकिल्बिषम् । सहिद्वरोजपेन्मंत्रंशतंवैविष्णुमंदिरे । एकादश्यामहोरात्रेभुक्तेयदिचपातकम् । आपःपुनीतमंत्रंचशतवारंनकिल्बिषम् । रात्रौभुक्त्वावसरेतुमन्वादिषुयुगादिषु । अश्वाइमंजपेन्मंत्रंदशवारंजलेपिवा । नित्यश्राद्धेयदाभुंक्तेतदापापात्प्रमुच्यते । मयोभूश्चजपेत्सूक्तंभूयोत्सर्गेतुरौद्रकम् । भुक्त्वायदिविनश्येतविंशद्वारंजलेतदा । त्वेषंगणंजपेन्मंत्रंदशवैविष्णुमंदिरे । व्यतीपातेयदाभुक्तेतदादोषाद्विमुच्यते । आप्यायस्वजपेन्मंत्रंदशकृत्वःशिवालये । सूर्यग्रहेयदाभुक्तेतदापापात्प्रमुच्यते । चराइवेत्यजपेन्मंत्रंदशवारंयदातदा । गृहस्थैकपात्रेषुभुंजतेचान्न-कल्मषम् । अग्नेमरुद्भिर्मंत्रंचशतसंख्यंजपेद्यदि । भुंजतेसहपात्रेतुपत्नीब्रह्मचारिणः । मानस्तोकेजपेन्मंत्रंशतवारंनकिल्बिषम् । प्रमादाज्ज्ञानतोभुक्तेगणान्नंतुयदातदा । यज्ञायज्ञाजपेत्सूक्तंएकरात्रंजलेपिवा । गणकान्नंयदाभुंक्तेतदापापात्प्रमुच्यते । अच्छानइंद्रसूक्तंतुएकवारंजलेजपेत् । विद्गुरश्चयदाभुक्तेतदापापात्प्रमुच्यते । ईळेअग्निजपेन्मंत्रंदशवारंयदातदा । पंचयज्ञविहीनस्यगृहेभुक्तेनपातकम् । किमंगत्वाजपेन्मंत्रमच्युतंचैवलेखुधीः । ज्ञानतोपियदाभुक्तेकुष्ठान्नंचैवपातकम् । सत्येनोत्तभितामंत्रंजपेद्विष्णवालयेयदा । उच्छिष्टेतुयदाभुक्तेतदामुच्येतकिल्बिषात् सहस्रवारंगायत्रींन्याहृतीभिःससंपुटम् । किल्बिषान्नंयदाभुक्तेदोषोनास्तितदाजपेत् । इति ।

शूद्रादेर्भोज्यवस्तूनि । अपरार्केसुमंतुः—गोरसंचंवसक्तूश्चैतिलंपिण्याकमेवच । अपूपान्भक्षयेच्छूद्राद्यच्चान्यत्पयसाकृतम् । तथा—कंदुपक्वंस्नेहपक्वंपायसंदधिसक्तवः । एतान्यशूद्रान्नभुजोभोज्यानिमनुरब्रवीत् । तत्रैव कौर्मे—कंदुपक्वानितैलेनपायसंदधिसक्तवः । द्विजैरेतानिभोज्यानिशूद्रैरेवकृतान्यपि । मदनरत्नेगिराः—मांसंदधिघृतंवान्यंक्षीरमाज्यमथौषधम् । गुडोरसस्तथोदश्विन्भोज्यान्येता

---

१ घृतपक्वान्यपूपादीनि.

निर्लिप्तश: । अमृतंचारनालंचकंदुकाःसक्तवस्त्रिलाः । सक्तुपदमनार्द्रपक्वस्योपलक्षणम् । प्रायश्चित्तशूलपाणावंगिराः—स्वपात्रे यत्तुविन्यस्तंदुग्धंयच्छतिनित्यश: । पात्रांतरेणतद्ग्राह्यंशूद्रात्स्वगृहमागतम् । शूद्रवेश्मनिविप्रेणक्षीरंपेयंदिवादधि । निवृत्तेनभोक्तव्यंशूद्रान्नंतद पिस्मृतम् । तच्चभोज्यश्राद्धमितिशूलपाणि: ।

निषिद्धान्नादीनि । अपरार्केशातातपः—गोकारुकंदुशालायांतैलयंत्रेक्षुयंत्रयोः । अमीमांस्यानिशौचानिस्त्रीषुचानंतरेषुच । कंदुपक्वादिचकलौनिषिद्धम् । एतानिलोकगुप्त्यर्थंकलेरादौमहात्मभिः । निवर्तितानिकर्माणिव्यवस्थापूर्वकंबुधैरितितत्रैवशातातपोक्तेः । शंख:—नापणीयान्नमश्नीयादिति । सएव—अपूपाःसक्तवोधानास्तक्रंदधिघृतंमधु । एतत्पण्येषुभोक्तव्यंभांडलेपोनचेद्भवेत् । शूलपाणौ शातातपः—घृतंतैलंपयःक्षीरंतथैवेक्षुरसोगुडः । शूद्रभांडस्थितंतक्रंतथामधुनदुष्यति । पयस्तुनवभांडस्थमेव । नवभांडेषुपानीयंशूद्रनिर्दिष्ट त्रजन्मनाम् । पेयंतदपिविप्राणांपयोदधितथैवचेति तत्रैवजाबालोक्तेः । शंखः—घृतदधिपयस्तक्राणामाकरभांडस्थानामदोषइति । याज्ञ वल्क्यः—अनर्चितंवृथामांसंकेशकीटसमन्वितम् । शुक्तंपर्युषितोच्छिष्टंश्वस्पृष्टंपतितेक्षितम् । उदक्यास्पृष्टसंघुष्टंपर्यायान्नंचवर्जयेत् । गोघ्रातं शकुनोच्छिष्टंपदास्पृष्टंचकामतः । अनर्चितमवज्ञातम् । वृथामांसमात्मार्थमेवपक्वं । उपलक्षणमेतत् । नपचेदन्नमात्मानइत्यात्मार्थमन्नमात्रपाकस्य निषेधात् । पित्राद्युच्छिष्टंभोज्यम् । मातापित्रोरथोच्छिष्टंकलौभुंजन्भवेत्सुखीतिचंद्रिकायामादिपुराणात् । पितुर्ज्येष्ठस्यभ्रातुरित्यप्येके । इति आपस्तंबस्मृतेश्च शुक्तंदध्यादिभिन्नम् । नपर्यायान्नमश्नीयान्नद्विःपक्वंनशुष्कंनपर्युषितमन्यत्ररागषाडवसक्तुदधिगुडगोधूमयवपिष्टविकारेभ्यइ तिशंखोक्तेः । यस्यान्नस्यैकेनपाकेननस्वरूपसिद्धिस्तद्द्विःपक्वमपिभोज्यमितिमदनरत्नेश्राद्धहेमाद्रौच । एतेनयच्छाकादिसंस्कारार्थंजीरका दिसंस्कारेणयत्पुनःपच्यतेतत्पुनःपक्वमितिमदनपारिजातोक्तिःपरास्ता । पाकादावेवसंस्कारेपुनर्नसंस्कारः । यत्तुव्यंजनादेरात्मविनिगमार्थंपु

नःसंस्कारःसवर्ज्यएवेतिमदनपारिजातः । अन्यदीयंस्वीयत्वेनदत्तंपर्यायान्नम् । शातातपः—केशकीटश्वनास्पृष्टंपायसोपहतंचयत् । क्षीवाभिशस्तपतितैःसूतिकोदक्यनास्तिकैः । दृष्टंचस्पाद्यदन्नंतुतस्यनिष्कृतिरुच्यते । अभ्युक्ष्यकिंचिदुद्धृत्यतद्भुंजीतविशेषतः । भस्मनावापिसंस्पृश्यसंस्पृश्यद्भस्मुकेनच । सुवर्णरजताभ्यांवाभोज्यंप्रातमजेनवा । स्पृष्टमित्युक्तेःसहपाकेऽभोज्यं । नित्यमभोज्यंकेशकीटावपन्नमितिगौतमोक्तेः । हारीतः—पिपीलिकादिभिरन्नाद्युपघातेकांचनमस्मरजततामवज्रवैडूर्यगोवालाजिनदंतानामन्यतमेनाद्भिःसंस्पृष्टमन्नंप्रोक्षणपर्यग्निकरणादित्यद र्शनाच्छुद्धमिति । मनुः—पक्षिजग्धंगवाघ्रातमवधूतमवक्षुतम् । दूषितंकेशकीटैश्चमृत्प्रक्षेपेणशुध्यतीति । जमदग्निः—शूताद्यन्नंद्रोणमात्रं तुश्वकाकाद्युपघातितम् । ग्रासमुद्धृत्यप्रयोगात्प्रोक्षणतत्रशोधनम् । माधवीयेसंवर्तः—विडालमूषिकोच्छिष्टंपंचगव्यंपिबेद्द्विजः । तत्रैव उशनाः—ब्राह्मणोच्छिष्टेप्राणायामशतमितियाज्ञवल्क्यः । अन्नंपर्युषितंभोज्यंस्नेहाक्तंचिरसंस्थितम् । अस्नेहाअपिगोधूमयवगोरसविक्रियाः । चिरस्थितमविकृतंचेत् । पर्युषितःशाकोपिभोज्यइतिहरदत्तः । कल्पतरौयमः—अपूपाश्चकरंभश्चधानावटकसक्तवः । शाकमांसमपूपंच सूपंकृसरमेवच । यवागूंपायसंचैवयच्चान्यत्स्नेहसंयुतम् । सर्वपर्युषितभोज्यंशुष्कंचेत्परिवर्जयेत् । मिताक्षरायांयावकमप्युक्तम् ।

पलांड्वादिनिषिद्धवर्गः । भविष्ये—लशुनंगृंजनंचैवपलांडुंकवकानिच । वृंताकनालिकालाबुजानीयाज्जातिदूषकम् । गृंजनंलशुनाकारकंदविशेषइतिमिताक्षरायाम् । मदनरत्ने—यदीयंचूर्णगायकाःकंठशुद्ध्यर्थंभक्षयंतितानिपत्राणि । मूलविशेषोगाजरापरपर्यायइति माधवोहेमाद्रिश्च । तत्र । हेमाद्रावेवब्रह्मांडे—गृंजनंचुक्रिकांचैवगाजरंजीरकंतथेति । श्राद्धेगृंजनभिन्नगाजरनिषेधात् । गृंजनो

१ शूद्रान्नत्वाद्ब्राह्मणेनमदीयमितिकृत्वादत्तम् । २ कीटादिनासहपाकेनाते ।

यवनेष्वपलांडोर्देशजातत्वइतिसुश्रुतोक्तेरपिगाजरंगृंजनशब्दवाच्यम् । हेमाद्रावप्युत्तरत्रपलांडुविशेषएवगृंजनमित्युक्तम् । वैजयंत्यामप्येवम् । **राजनिघंटौ**—रसोनोहिमहाकंदोगृंजनोदीर्घपत्रकः । पृथुपत्रःस्थूलकंदोयवनेष्टोविलोहितः । गृंजनस्यमधुरंकटुकंदंनालमप्युपदिशंतिकषायम् । पत्रंशश्वयसुशंतिचतिक्तंसूरयोलवणमस्थिवदंति । गाजरंपिंडमूलंचपीतकंदःसुमूलकम् । स्वादुमूलंसुपीतंचनागरंपीतमूलकम् । गाजरंमधुरंरुच्यंकिंचित्कटुकफापहम् । आध्मानक्रिमिशूलघ्नंदाहपित्ततृषापहम् । **धन्वन्तरिसंग्रहे**—गृंजनंपीतकंचान्यत्स्थौणेयंरक्तपित्तघ्नम् । गृंजनंशीतलंग्राहिदाहमांद्यविषापहम् । तद्बीजंवीर्यदंश्रेष्ठमुष्णंगर्भहरंपरमिति । तत्र । गाजरेगृंजनशब्दोलाक्षणिकः । **वैद्यके**—गृंजनंशिखिमूलंचयवनेष्टंचवर्तुलम् । ग्रंथिमूलंशिखाकंदंकंदंडिंडीरमोदकम् । गृंजनंकटुकंचोष्णंकफवातरुजापहम् । रुच्यंचदीपनंहृद्यंदुर्गंधिगुल्मनाशनम् । **मदनविनोदेऽपि**—गृंजनःपित्तलोग्राहीतीक्ष्णोष्णोरोगनाशनः । गंधाकृतिरसैस्तुल्यःसूक्ष्मनालःपलांडुना । तथागृंजनोयोमहाकंदोजर्जरीदीर्घपत्रकइतिलशुनभेदोप्युक्तः । तथा—कासमर्दःकर्कराःस्याद्गृंजनोगाजरस्तथा । गृंजनःकटुकस्तीक्ष्णस्तिक्तोष्णोदीपनोलघुः । संग्राहीरक्तपित्तार्शोग्रहणीकफवातजित् । त्रिविधेपिगृंजनेगाजरेनांतरंभवति । गुणभेदात् । लवणयुतंदुग्धंदुग्धयुतंदधिचनभोज्यम् । विनायकशांतौवल्दिानेनब्राह्मणस्यसुरामांसस्थानेताद्दशयोस्तयोरुक्तेः । **चतुर्विंशतिमते**—मूलकंमातृमूलंचश्वेतरक्तौचसूरणौ । चत्वार्यभोज्यमूलानिपंचमीचार्द्रमूलिका । मातृमूलंमाइणीमूलमितिप्रसिद्धम् । **कल्पतरौब्राह्मे**—राजमाषाःस्थूलमुद्गास्तथावृषकवासकौ । मसूराःतथपुष्पाश्वकुसूलकनिकेतनम् । सस्यान्येतान्यभक्ष्याणिनचेद्यानिकस्यचित् । तत्रैवापस्तंबः—कृष्णधान्यंचशूद्रान्नंयेचान्येनाद्यसंमिताः । वर्जयेदितिसंबंधः । कृष्णधान्यंकलिंगकानि । **शूलपाणौदेवलः**—कुविंदांश्वेतवृंताकंकूष्मांडंचनभक्षयेत् । कुविंदा

१ कुमूला कुलित्थाः ।

चोदकः । तत्रैव हारीतः—श्लेष्मातकप्रशने सांतपनमिति । अपरार्के हारीतः—कुसुंभं श्वेतवृन्ताकं कुष्मांडं च विवर्जयेत् । हेमाद्रौ विष्णुः—श्वेत वर्जयेच्छ्वेतवृन्ताकमलाबुवर्तुलं त्यजेत् । श्वेतोक्तेः कृष्णवृन्ताकस्यानिषेध इति कल्पतरौ मदनरत्ने माधवीये च । स्मृत्यर्थसारेपि—शुभ्रश्वेत कटंकिवृन्ताकानि वर्जयेदिति । तत्रैव—यतिव्रतिभ्यां सदालाबुशिग्रुवृन्ताकानि जातिमात्रेण वर्ज्यानीति । तत्र हेमाद्रावग्निपुराणे—श्वेतं च कटंकिवृन्ताकानि वर्जयेदिति । मदनरत्ने पैठीनसिः—नलिकायौतकुसुंभाश्मन्तकाश्वेतशाकानामभोज्या इति । न्य—कूष्मांडालाबुवार्ताकपालकीज्योत्स्निकास्त्यजेत् । तत्रैव कौर्मे—गृंजनं किंशुकं चैव कडरं च तथैव च । उदुंबरमलाबुं च जग्ध्वा पतति वै द्विजः । अलाबुर्वर्तुलः । नलिकाकलंबिकेति शूलपाणिः । हारीतः—नवटप्लक्षाश्वत्थदविल्वमातुलिंगानि भक्षयेदिति । इत्रिरथंकपित्थम् । पूर्वोक्तविष्णुस्मृतेः । स्मृत्यर्थसारेप्येवम् । हारीतः—नवटप्लक्षाश्वत्थदविल्वमातुलिंगानि भक्षयेदिति । वर्जयेदिति शेषः । तत्रैव चतु माधवीये वृद्धयमः—नलिकानालिकेरीं च श्लेष्मातकफलानि च । भूतृणं शिग्रुकं चैव खट्वांकं कनकं तथा । वर्जयेदिति शेषः । तत्रैव चतु र्विंशतिमते—तृणराजफलं वल्लीं भुक्त्वा चांद्रं चरेद्द्विजः । कंदमूलफलादीनि भक्त्वाल्पोपवसेत्तथा । याज्ञवल्क्यः—देवतार्थं हविः शिग्रु लोहितान्व्रश्चनांस्तथा । लोहितपदमुभयत्रान्वितम् । तेन रक्तशिग्रुर्निषिद्ध इति माधवः । स्मृत्यर्थसारेप्येवम् । विट्जानि तंदुलीयादीनि नि षिद्धानि । विट्जानां फलानि भक्ष्याणीत्याह यौधायनः—अमेध्येषु च ये वृक्षा उप्ताः पुष्पफलोपगाः । तेषामपि न दुष्यंति पुष्पाणि च फलानि च । तथा चोशनाः—नलिकाशणछत्राककुसुंभालाबुविड्भवान् । कुंभीककेतुवृन्ताककोविदारांश्च वर्जयेत् । तथाकालप्ररूढानि पुष्पाणि च फलानि च । देवलः—नवीजान्युपभुंजीत रोगापद्यपि तेषु च । बीजानि कूष्मांडस्येत्युक्तं कल्पतरौ मदनरत्ने च । वर्ज्यान्युक्त्वौशनः—कुनखी कुष्ठि सस्पृष्टमिति । कृष्णभट्टीये स्कांदे—आज्यपात्रे स्थितं तक्रं मधुमिश्रं तु यत्कृतम् । ताम्रपात्रस्थितं क्षीरं तैलं घृतसर्पिः सुरासमम् । आर्द्रकं सगुडं मद्यसै

१ स्तुह्यकशाक । कलकमचूर्विल्वया ।

क्षीरंमदरंतथा । नारिकेलरसंकांस्येदभ्रासंमिश्रितोगुडः । वसिष्ठः—अभोज्यंस्वोच्छिष्टोपहतंवसनकेशकीटोपहतंचेति । स्वोच्छिष्टंस्वभुक्तशि
ष्टमुक्तं । वसनंशरीरहितमितिमदनरत्ने । सुमंतुः—क्षुतवचोभिहतमदधिपर्युषितंश्वचांडालवीक्षितमन्नमभोज्यमन्यत्रहिरण्योदकैःस्पृष्टादिति ।
वचोभिहतंतात्कालिकमुखवातादिदुष्टं । दधिस्नेहलक्षकं स्नेहरहितंपर्युषितमित्यर्थः । स्पृष्टात्प्रावेक्तः । श्वचांडालदृष्टंभोज्यमन्नांतराभावइतिमदन
रत्ने । वर्ज्यान्युपूचौयमः—लशुनंगृंजनंचैवविलयःसंमुखंतथा । विलयोघृतकिट्टम् । संमुखंघृतफेनस्तन्मंडश्च । विष्णुपुराणे—
भुंजीतोद्धृतसाराणिनकदाचिन्नरेश्वर । स्कांदे—वृंताकंबृहतीचैवदग्धमन्नंमसूरिका । यस्योदरेप्रवर्ततेतस्यदूरतरोहरिः । अलाबुंभक्षयेद्य
स्तुदग्धमन्नकलंबिकाम् । सनिर्लज्जःकथंमूढःपूजयामिजनार्दनम् । स्कांदे—शिरःकपालमंत्राणिनखचर्मतिलानिच । एतानिक्रमशोनित्यमद्भ्या
दिषुवर्जयेत् । चर्मपदेनमसूरिकाउच्यतइतिकालनिर्णयदीपिका । हरिभक्तिविलासेयामले—यत्नमद्यतथामांसंतथावृंताकमू
लकौ । निवेदयेन्नैवतन्नहरेरैकांतिकीरतिः । भारते—तिलान्पृथङ्नचाश्नीयात्तथासाधुर्नरिष्यति । गौतमः—उद्धृतस्नेहविलयनपिण्या
कमथितप्रभृतीनिनाश्नीयादिति । मथितंजलंविनालोडितंदधीतिमदनरत्ने । आमिषंपाद्मेकार्तिकमाहात्म्ये—प्राण्यंगमामिषंचूर्णेफले
जंबीरमामिषम् । धान्येमसूरिकाप्रोक्तान्नंपर्युषितंतथा । गोकांजिकंचमहिषीदुग्धादिचतथामिषम् । द्विजक्रीतारसाःसर्वेलवणंभूमिजंतथा ।
ताम्रपात्रस्थितंगव्यंजलंपल्वलसंभवम् । आत्मार्थंपाचितंचान्नमामिषंतत्स्मृतंबुधैः । नचेदंप्रकरणात्कार्तिकमात्रपरम् । अन्यत्रापितद्बाध
काभावात् । मदनरत्ने—घृतात्फेनंघृतान्मंडंपीयूषमथवाद्रंगोः । सगुडंमरिचाक्तंतुतथापर्युषितंदधि । दीर्णतक्रमपेयंचनष्टस्वादुचफेनवत् ।
गुडमरीचयुक्तंपर्युषितंदधिचनभक्षयेत् । दीर्णंस्फुटितम् । हारीतः—नरजस्वलयादत्तंनकुद्धयानमलवद्वाससानापरद्वारापन्नमिति ।
याज्ञवल्क्यः—वृथाकृसरसंयावपायसापूपशष्कुलीः । अत्र नपचेदन्नमात्मनेइत्यनेननिषेधेसिद्धेपुनर्निषेधोदोषाधिक्यार्थइतिमदनरत्ने -।

मनुः—अनिर्दशायगोःक्षीरमौष्ट्रमैकशफंतथा । आविकंसंधिनीक्षीरं विवत्सायाश्चगोःपयः । गोग्रहणमजामहिष्योरुपलक्षणम् । गोमहिष्याजानामनिर्दशानांपयोनपेयमितिवसिष्ठोक्तेरितिमदनरत्ने । वत्सग्रहणेनसवत्साधेनुरानीयतामितिवद्द्वोग्रहणेसिद्धेपुनर्गोग्रहणमजामहिष्योर्व्यपत्ययोःपयसोनिषेधार्थमितिमेधातिथिः ।

**संस्कारादिभोजननिषेधः**—मदनरत्नेगिराः—जन्मप्रभृतिसंस्कारेबालस्यान्नस्यभोजने । असपिंडैर्नभोक्तव्यंचूडायांचविशेषतः । नारीप्रथमगर्भेषुभुक्त्वाचांद्रायणंचरेत् । **पराशरमाधवीयेधौम्यः**—ब्रह्मौदनेचसोमेचसीमंतोन्नयनेतथा । जातकर्मनवश्राद्धेभुक्त्वाचांद्रायणंचरेत् । तत्रैव—निवृत्तचूडहोमेतुप्राङ्नामकरणात्तथा । चरेत्सांतपनंभुक्त्वाजातकर्मणिचैवहि । अतोन्येषुतुसंस्कारेषूपप्राशेनशुध्यति । **चंद्रिकायाम्**—नवश्राद्धस्ययच्छिष्टंगृहेपर्युषितंचयत् । दंपत्योर्भुक्तशिष्टंचभुक्त्वाचांद्रायणंचरेत् । **आचारदर्पणे**—भानुवारेतथारात्रावष्टम्यांचतथैवच । धात्रीफलंनरःखादन्नलक्ष्मीकोभवेत्सदा । सप्तम्यांरविवारेचदिवारात्रौतथैवचेतिकृष्णभट्टीपुस्तकेपाठः । अमावास्यापितृश्राद्धेसंक्रांतौपारणेतथा । परान्नैनभोक्तव्यंयस्यान्नंतस्यतत्फलम् । **हेमाद्रौ**—दिवादधित्थधानासुरात्रौचदधिसक्तुषु । श्लेष्मातकेतथाऽलक्ष्मीर्नित्यमेवकृतालया । **काशीखंडे**—नदिवोद्धृतसारंचभक्षयेद्दधिनोनिशि । **स्कांदे**—रात्रौदधिनभोक्तव्यंदिवाननवनीतकम् । **यमः**—नभिन्नभांडेभुंजीतनरात्रौदधिसक्तुकान् । **भारतेप्येवम्** । **आचारादर्शेलघुहारीतः**—पृथग्यानपुनर्दीनमांसेनपयसानिशि । दंतच्छेदनमुष्णंचसप्तसक्तुषुवर्जयेत् । सक्तूनतुदिनक्षयइतिभारतेचातपश्च । **सुमंतुः**—कूष्मांडबृहतीचैवतरुणीमूलकंतथा । श्रीफलंचकलिंगंचधात्रीप्रतिपदादिषु । शिरःकपालमंत्राणिनखचर्मकृतानिच । उदुंबरफलंचैवतिलान्नपितथैवच । यदीच्छेत्स्वर्गगमनमष्टम्यादिषुवर्जयेत् । **रत्नमालायाम्**—कूष्मांडमातुलिंगंचपटोलंबृहतीफलम् । श्रीफलंपिचुमंदंचधात्रीपक्षादितस्त्यजेत् ।

नालिकेरंशिरःप्रोक्तंकपालंतुंबकंस्मृतम् । अंत्राणिनलिकाशाकंनखानिग्रामशिंबिकाः । चर्माख्यंपोइकाशाकंवृंताकंतिलमुच्यतइति । धर्मसारे—धात्रीफलंभानुवारेश्रीफलंशुक्रवासरे । शमीफलंमंदवारेश्रीकामःपरिवर्जयेत् । गौडनिबंधे—रविवारेचसंक्रांतौषष्ठ्यांवैसप्तमीतिथौ । आरोग्यकामस्तुनरोनिष्पन्नंनभक्षयेत् । भारतेदानधर्मे—आज्याहुतिविनाचैवयत्किंचित्परिविष्यते । दुराचारैश्चयद्भुक्तंतंभागंरक्षसांविदुः । इदंश्राद्धपरमितिकेचित् ।

अथपरिवेषणम् । चंद्रोदयेंगिराः—नीलरक्तेनवस्त्रेणयःपाकःश्रपितोभवेत् । तेनभुक्तेनविप्राणांदिनमेकमभोजनम् । वैद्यः—भक्ष्यंचदक्षिणेपार्श्वेपेयंलेह्यंचवामतः । हस्तदत्तानिचान्नानिप्रत्यक्षंलवणंतथा । मृत्तिकाभक्षणंचैवगोमांसाशनवत्स्मृतम् । हेमाद्रौयमः—एकेनपाणिनादत्तंशूद्रादत्तंचयद्भवेत् । पैठीनसिः—लवणंव्यंजनंचैवघृतंतैलंतथैवच । लेह्यंपेयंचविविधंहस्तदत्तंनभक्षयेत् । एतदपवादः स्मृतिरत्नावल्याम्—अपक्वंस्नेहपक्वंचहस्तेनैवप्रदापयेत् । यत्किंचिदितरद्भक्ष्यंदर्व्यादेयंतुयत्नतः । कल्पतरौभविष्ये—आयसेनतुपात्रेणयदन्नमुपनीयते । भोक्ताविष्ठासमंभुंक्तेदाताचनरकंव्रजेत् । मात्स्येपि—उभाभ्यामपिहस्ताभ्यामाहृत्यपरिवेषयेत् । मनुः—दर्व्यादेयंघृतान्नंतुसमस्तव्यंजनानिच । उदकंयच्चपक्वान्नंयोदर्व्यांदातुमिच्छति । सभ्रूणहासुरापश्चसस्तेनोगुरुतल्पगः । काशीखंडे—फाणितंगोरसंचैवलवणंमधुकानिच । हस्तेनब्राह्मणोदत्वाकृच्छ्रंचांद्रायणंचरेत् । हेमाद्रौहारीतः—पङ्क्तौसहोत्थितानांतुभोजनादिसमंस्मृतम् । तत्रैववसिष्ठः—यएकपंक्तौविषमंददातिस्नेहाद्भयाद्वायदिवापिहेतोः । वेदेषुदृष्टामृषिभिश्चगीतांतांब्रह्महत्यांमुनयोवदंति ।

परिवेष्टुरुच्छिष्टस्पर्शेहारीतः—द्रव्यहस्तस्तुसंस्पृष्टउच्छिष्टेनाकदाचन । भूमौनिक्षिप्यतद्द्रव्यमपःस्पृष्ट्वाततःशुचिः । अद्भिरभ्युक्ष्यतद्द्रव्यंपुनरादायदापयेत् । यत्तुमनुः—उच्छिष्टेनतुसंस्पृष्टोद्रव्यहस्तःकथंचन । अनिधायैवतद्द्रव्यमाचांतःशुद्धिमाप्नुयादिति । आचार

चंद्रोदये—थंगधारणयोग्यमंगेनिधायाचामेत् तदयोग्यंस्पृष्ट्वा । यद्वाभक्ष्येतदूर्ध्वंभूमावनिधायाचम्यशुचिर्भवेत् । भक्ष्यंभूमानिधाया चामेत् । मार्कंडेयः—पकान्नेनगृहीतेनमूत्रोच्चारंकरोतियः । अनिधायैवतद्द्रव्यमंगेकृत्वासमाश्रितम् । शौचंकृत्वायथान्यायमपःस्पृश्ययथा विधि । अन्नमभ्युक्षयेच्चैवउद्धृत्यार्कंप्रदर्शयेत् । तत्कृत्वाग्रासमथैतस्माच्छेषंशुद्धिमवाप्नुयात् । द्रव्यस्यैनसाक्षाद्धुच्छिष्टस्पर्शेत्यागइतिचंद्रिका । स्मृत्यर्थसारे—परिवेषणंकुर्वन्मूत्रोच्छिष्टश्चेदन्नादिनिधायशौचाचमनेकृत्वान्नादिप्रोक्ष्याग्निमर्कंवासंस्पृश्यपरिविष्यादिति ।

आपोशानबलिप्राणाहुत्यादि । मार्कंडेयः—अन्नंदृष्ट्वाप्रणम्यादौप्रांजलिःकथयेत्ततः । अस्माकंनित्यमस्त्वेतदितिभक्त्याथवंदयेत् । आपस्तंबः—भापांकासंक्षवथुमित्यभिमुखोन्नवर्जयेदिति । भापांशब्दोच्चारणम् । याज्ञवल्क्यः—अपोशानेनोपरिष्टादधस्तादश्नतातथा । अनग्नममृतंचैवकार्यमन्नद्विजन्मना । मन्वयपि—यदतेचिचभूतानितस्मादन्नंतदुच्यतइतिश्रुत्यौदनमविशेषेणान्नत्वेनप्रतीयते तथापिजला दावपितदापत्तेः । भिःसाक्षीभक्तमंधोन्नमितिकोशादन्नमोदनः । अतएव—अन्नाश्रितानिपापानीत्यन्नाप्योदनवर्जनम् । तेनभक्तेएवापोशन मान्यत्रेतिकेचित् । अन्येतु – सस्यक्षेत्रगतंप्राहुःसतुषंधान्यमुच्यते । आमंवितुषमित्युक्तंस्विन्नमन्नमुदाहृतमितिनिश्चितत्वेनयसिद्धोक्तेः स्विन्नमात्रेआपोशनम् । नचैवगुडादावपितदापत्तिः । अन्नेनव्यंजनमित्यादिपुन्नीह्यादिनिकारएवान्नपदप्रयोगात् गुडादेश्चसरसत्वात् अतोगु- डादौनापोशनम् । मदनरत्नेमाधवीयेचकौर्मे—महाव्याहृतिभिस्त्वन्नंपरिषिच्योदकेनतु । अमृतोपस्तरणमसीत्यपोशानक्रियांचरेत् । मदनपारिजातेतु—व्याहृतिभिर्गायत्र्याचाचमनमिमंत्र्याभ्युक्ष्यपरिषिच्य धर्मराजादिबलीन्दद्यादिति । माधवीये—ऋतंत्वासत्य सत्येनऋतंपरिषिंचयेत् । भविष्ये—भोजनात्किंचिदन्नाग्रंधर्मराजायवैबलिम् । चित्रायचित्रगुप्तायप्रेतेभ्यश्चेदमुद्धरेत् । यत्रक्वचनस

१ पकमन्नमितिपाठः ।

स्थानांक्षुत्तृष्णोपहतात्मनाम् । प्रेतानांतुसमयेक्षय्यमिदमस्तुयथासुखम् । **स्कांदे**—श्रद्धायाऋतपतयेभुवनपतयेतथा । भूतानांपतयेस्वाहेत्युक्त्वाभूमौबलित्रयम् । **ब्राह्मे**—ब्रह्मणेनमइत्येवंब्रह्मादिभ्योबलीन्दद्यादिति । **स्मृत्यर्थसारे**—यमायनमःचित्रगुप्तायनमःसर्वेभ्योभूतेभ्यइतिबलीन्दद्यादिति । **श्रौतवृत्तिः**—यःकश्चनास्मिन्शास्त्रेदेवतोद्देशेनद्रव्यात्मकोव्यापारोयागोहोमोऽभ्यादानंबलिहरणादयोवामंत्रेणसाध्यंतेतत्रसर्वत्रस्वाहाकारःकर्तव्यइति । **आश्वलायनानां**स्वाहांतत्वमेवबलिदाने । एतानिबलिदानादीनियथाशाखंव्यवस्थितानि । इदंचपरिषेचनोत्तरंकार्यमित्युक्तंमाधवीयेमदनरत्नेच । **चतुस्मृत्यर्थसारे** वस्युत्तरंपरिषेचनमुक्तंतत्पदार्थगणनमात्रेनतत्रक्रमेतात्पर्यम् । परिषेचनोत्तरंपादक्षालनोक्तेः । अत्रब्रह्मरुद्रेंद्रचंद्रार्कवसवोमंडलांतरात् । निवेदितनरैरन्नंयस्माद्दत्तंतिनान्यथेतिब्राह्मात् ब्रह्मादिभ्योभुजिकाले बलिर्देयः । मंडलार्थवादोयमितिचेत् तस्यापि सालंबनत्वात् । अर्थाभावोपिस्तुतिरितिचेत्असंभवेद्वेवंस्यात् । नचवाक्यभेदः । सूक्तवाकादौदृष्टत्वादित्याचारादर्शः । तन्न । तद्धितादीनामेवदेवतात्वबोधकत्वात् । सूक्तवाकस्यकरणत्वेप्युक्तं इतरौदेवताकल्पकत्वम् । अर्थवदेवतुदेवताकल्पत्वमसंतासंभवीत्यलंमीमांसागंधशून्यहृदयप्रलापेन । **श्राद्धेबलिदानाभावमाहहेमाद्रावत्रिः**—दत्तेवाप्यथवादत्तेभूमौयोनिक्षिपेद्बलिम् । तदन्नंनिष्फलंयातिनिराशैःपितृभिर्गतैः । **स्मृत्यर्थसारे**—पायसेनतथाज्येनमाषान्नेनतथैवच । नकुर्याद्बलिदानंतुयोदनेनप्रकल्पयेत् । **कृष्णभट्टीये**—भोजनादौबलिंमुक्त्वासमुद्धृत्यैवभोजयेत् । अनुद्धृत्यतुयोभुंक्तेप्राणायामाष्टकंचरेत् । आध्रुमाजरिसंस्पर्शेप्येवमेवतथाचरेत् । तत्रैव—दत्वाथचित्रगुप्तायहस्तंप्रक्षालयेत्ततः । अप्रक्षाल्यकरौभुंजन्नरौरवेनरकेवसेत् ।

**अपोशानविचारः** । **ब्राह्मे**—अपोशनंचगृह्णीयात्सर्वतीर्थमयंचतत् । हस्तेनलंघयेत्पात्रंसोदकेनकदाचन । अपोशनाकरणेदोषः **चिंतामणौ**—अपोशानमकृत्वातुयोभुंक्तेऽनापदिद्विजः । भुंजानोयदिवान्यादायाव्यष्टशतंजपेत् । इदंचबलिंदत्वाहस्तंप्रक्षाल्यकार्यमि

त्युक्तमाधवीये—हस्तंप्रक्षाल्यचैवपश्चात्प्रयतमानसः । धारयेत्सव्यहस्तेनपात्रंतद्वाग्यतोद्विजः । अपोशानस्यहस्तेनकार्यम् । द्विजश्रुतेः ।
नैवेद्यमक्षणमन्नमिथ्या । लोके—उच्छिष्टभोजिनस्तस्यनयमच्छिष्टकारिणः । येनलीलावराहेणहिरण्याक्षोनिपातितः । स्मार्तोपीदंलिलेख । पात्र
धारणेविशेषश्चिंतामणौ—अंगुष्ठस्तर्जनीचैवमध्यमाचतृतीयका । तिस्रोद्वेनांगुलीचैवप्रशस्ताःपात्रधारणे । वृद्धनारदीये—याव
द्विप्रोऽन्नमश्नीयात्पात्रंनैवपरित्यजेत् । आपस्तंबः—नापजिहीतापजिहीतवेति । अपजिहीतत्यजेत् । अतःपात्रधारणेविकल्पः । सोपि
प्राणाहुत्युत्तरमिति । मदनरत्ने—प्राणाहुत्युत्तरंपात्रंधृत्वानमुंचेदन्यथामुंचेदितिकल्पतरुः । यत्तुषट्त्रिंशन्मते—समुत्थितस्तुयो
भुंक्तेयोभुंक्तेमुक्तभाजने । एवंवैवस्वतःप्राहभुक्त्वासांतपनंचरेदिति तद्भोजनोपक्रमेपात्रंधृत्वातन्मध्यत्यागे । स्मृतिमंजर्याम्—पात्रस्य
धारणंमौनंज्येष्ठभ्रातुमान्गृही । शातातपः—अग्रासनोपविष्टस्तुयोभुंक्तेप्रथमंद्विजः । बहूनांभुंजतांसोतःपंक्त्याहरतिकिल्बिषम् ।
अत्रिः—मौनव्रतमहाकाष्ठहुंकारेणविनश्यति । एतत्पंचग्रासपरम् । पंचग्रासान्महामौनंप्राणाद्याप्यायनंचतदितिविष्णुपुराणादिति
माधवः । महामौनंकाष्ठमौनम् । तथाचस्मृतिमंजर्याम्—काष्ठमौनेनभुंजीतप्राणादिग्रासपंचकम् । प्राणाहुत्युत्तरंनमौननियमः ।
मौनीवाप्यथवामौनीप्रहृष्टःसंयतेंद्रियः । भुंजीतविधिवद्विप्रोनचोच्छिष्टानिदापयेदितिव्यासोक्तेरितिमदनरत्ने । रत्नावल्याम्—यवी
यान्सपितायश्चभुक्त्वाश्राद्धादिभोजनम् । प्राणाग्निहोत्रादन्यत्रनासौमौनंसमाचरेत् । यवीयान्कनिष्ठः । अतोभ्रातृमतोमौननिषेधोजीव
ज्ज्येष्ठभ्रातृकपरः । तत्रैव—यदिभुंजीततूष्णींतुसर्वंनैवतुभोजने । सपापोभ्रातरंहंतिसंततिंचाचिराद्ध्रुवम् । गोभिलः—अथातःप्राणाहु
तिकल्पोभ्याहृतिभिर्गायत्र्याचान्नमभिमंत्र्यऋतंत्वासत्येनपरिषिंचामीतिसायं सत्यंत्वर्तेनपरिषिंचामीतिप्रातरंतश्चरतिभूतेषुगुहायांविश्वतोमुखः ।

---

१ आह्निकभोजनम् । २ विश्वमूर्तिषु ।

त्वंयज्ञस्त्वंवषट्कारस्त्वंब्रह्मत्वंप्रजापतिस्त्वंतदापआपोज्योतीरसोऽमृतंब्रह्मभूर्भुवःसुवरोममृतोपस्तरणमसीत्यपःपीत्वा दशहोतारंमनसाऽनुद्रुत्यात्वरन्पं
चग्रासान्गृह्णीयात् प्राणायस्वाहाऽपानायस्वाहाव्यानायस्वाहोदानायस्वाहासमानायस्वाहेति । दशहोत्राश्चित्तिःस्रुगित्याद्याः । अमृतोपस्तरणम
सिस्वाहेत्याचारादर्शः कृष्णभट्टश्च । तन्न । स्वाहांतत्वेमानाभावात् । गोभिलाद्यलिखनाच्च ।

प्राणाहुतिविचारः । कौर्मे—स्वाहाप्रणवसंयुक्तांप्राणायाद्याहुतिंततः । शौनकः—तर्जनीमध्यमांगुष्ठलग्नाप्राणाहुतिर्भवेत् । मध्य
मानामिकांगुष्ठैरपानेजुहुयाद्धुवः । कनिष्ठानामिकांगुष्ठैर्व्यानेतुजुहुयाद्धविः । तर्जनीचबहिःकृत्वाउदानेजुहुयाद्धुवः । समानेसर्वहस्तेनसमुदाया
हुतिर्भवेत् । एताश्चदंतैर्नच्छेद्याः । प्राणायस्वाहेतिसमस्तानिगिरतीत्याचारादर्शोहारीतोक्तेः । अंगुष्ठानामिकामात्रग्राह्यानान्येनताआहुतयइ
तिहारीतव्याख्यातारः । सर्वाभिरंगुलीभिरश्नीयादितिसामान्यविधेःपंचग्रासपितथैवेत्याचारादर्शः । उभयमप्ययुक्तम् । पूर्वोक्तशौ
नकविरोधात् । भारते—यथारसंनजानातिजिह्वाप्राणाहुतौनृप । तथासमाहितंकुर्यात्प्राणाहुतिमतंद्रितः । अपरार्केबौधायनः—
अथशालीनयायावरात्मयाजिनांप्राणाहुतिंव्याख्यास्यामः प्रक्षालितपाणिपादआचम्यशुचौदेशेप्राङ्मुखउपविश्य भुवाद्यौरितिपृथिवीमानाहयेद्भूत
वतीमितिभूमौपात्रंनिधायमूर्ध्नंदिवइत्युद्धृत्यमाह्रियमाणंभूर्भुवःस्वरोमित्युपस्थायवाचंयच्छेत्पात्रुमहाव्याहृतिभिःप्रदक्षिणमन्नमुदकंपरिषि
च्यसव्येनपाणिनाविमुंचन्नमृतोपस्तरणमसीत्यपःपीत्वापंचान्नेनप्राणाहुतीर्जुहोतिप्राणेनिविष्टोऽमृतंजुहोमिशिवोमाविशाप्रदाहायप्राणायस्वाहाऽपा
नेनिविष्टोऽमृतंजुहोमिशिवोमा०व्यानेनिविष्टो०उदाने०इतिसमाने०हुत्वातूष्णींभूयोव्रतयेत् प्रजापतिंमनसाध्यायन्नांतरावाचंविसृजेत्भूर्भुवःस्व
रोमितिजपित्वापुनर्भुंजीत त्वक्केशनखकीटाखुपुरीषाणिदृष्ट्वातद्देशात्पिंडमुद्धृत्याभ्युक्ष्यभस्मावकीर्यपुनःप्रोक्ष्यवाचाशस्तंभुंजीतसर्वभक्ष्यापूपकंदमू
लमांसानांदंतैर्नावद्यातिसुहितोमृतापिधानमसीत्युपरिष्टादपःपीत्वाचांतोहृदयमभिमृशतिप्राणानांग्रंथिरसिरुद्रोमाविशांतकइत्यस्तस्तेनान्नेनाप्यायय

१ त्वमग्नस्त्वविष्णुस्त्ववषट्कार । २ विश्वातर्गतेमानेन ।

स्वेतिपुनराचम्यदक्षिणपादांगुष्ठेपाणिंस्रावयति । अंगुष्ठमात्रःपुरुषोंऽगुष्ठंचसमाश्रितः । ईशःसर्वस्यजगतःप्रभुःप्रीणातुविश्वभुगितिहुत्वानु मन्त्रणमूर्ध्वहस्तःसमाचरेत्—श्रद्धायांप्राणेनिविश्यामृतंहुतंशिवोमाविशाप्रदाहायप्राणेनाप्यायस्वेतिपंचब्रह्मणिमआत्मामृतत्वायेत्यनेनचाक्षरे णात्मानंयोजयेदेवमेवाहरहःसायंप्रातर्जुहुयाद्‌ब्रह्मनिर्वाणायमिति । अत्रिः—अपोशानंवामभागेसुरापानसमंभवेत् । दक्षभागेतुयःकुर्यात्सो मपानसमंभवेत् । पुनरापूर्वापोशानंसुरापानसमंभवेत् । इदंश्राद्धपरमितिकेचित् । नित्यभोजनेपीतिकृष्णभट्टः ।

**भोजनविचारः** । प्राणाहुत्युत्तरमाह वसिष्ठः—सर्वाभिरंगुलीभिरश्नीयादितिबौधायनः । यावद्‌ग्रासंसन्नयन्नस्कंदयन्कृत्स्नंग्रासं ग्रसीत । **विष्णुपुराणे**—अश्नीयात्तन्मनाभूत्वापूर्वंतुमधुरंरसम् । लवणाम्लौतथामध्येकटुतिक्तादिकंततः । प्राक्द्रवंपुरुषोऽश्नीयान्मध्येतुक ठिनंपुनः । अंतेपुनर्द्रवाशीतुबलारोग्येनमुंचति । **कौर्मे**—ततोऽन्यदन्नमश्नीयात्पूरणायोदरस्यच । **स्मृतिमंजर्यांकाशीखंडे**—दर्भ पाणिस्तुयोभुंक्तेतस्यदोषोनविद्यते । केशकीटादिसंभूतंतदश्नीयात्सदर्भकः । **यत्त्वाश्वलायनः**—ग्रंथीकृतपवित्रेणनभुंजीयान्नचाचमेदिति तद्वर्तुलान्यपरम् । भोजनेवर्तुलत्वस्यस्मृतेः । **विष्णुः**—नतृतीयमथाश्नीयान्नापथ्यंचकदाचन । अपश्यन्नंधकारादौ । **कौर्मे**—नाश्नी यात्प्रेक्षमाणानामप्रदायैवदुर्मतिः । नायज्ञशिष्टमथवानक्रुद्धोनान्यमानसः । आत्मार्थंभोजनंयस्यरत्यर्थंयस्यमैथुनम् । वृत्त्यर्थंयस्यचाधीतं निष्फलंतस्यजीवितम् । नोच्छिष्टोघृतमादद्यान्नमूर्धानंस्पृशेदपि । नब्रह्मकीर्तयन्वापिननिःशेषंनभार्यया । नैकवस्त्रस्तुभुंजीतनचापिशयन स्थितः । नपादुकानिर्गतोवानहसन्विलपन्नपि । **पराशरः**—अद्युग्रासंततोधाराचांतोद्धृतःश्वरेणवः । भोजनपात्रसुव्रत्यजलादिनपेयमित्युक्तं **माधवीयेबृहन्नारदीये**—द्विजोनाभोज्यमश्नीयात्पात्रंनैवपरित्यजेत् । संस्थाप्यचासनेपादौवस्त्रार्धंपरिधायच । मुखेनधमितंभुक्त्वासु रापीत्युच्यतेबुधैः । खादिताधैपुनःखादन्मोदकानिफलानिच । प्रत्यक्षलवणंखादन्गोमांसाशीनिगद्यते । **नृसिंहाब्धिमहोदधौ**—चासुद्र

सैंधवंचैवलवणेपरमाद्भुते । प्रत्यक्षेअपितेग्राह्येनिषेधस्त्वन्यगोचरः । **हेमाद्रौब्रह्मांडे**—सैंधवंलवणंयच्चतथामानससंभवम् । पवित्रेपरमे ध्येतेप्रत्यक्षेअपिनित्यशः । **देवलः**—नभुंजीताधृतंनित्यंगृहस्थोभोजनंस्वयम् । पवित्रमथहृद्यंचसर्पिराहुरघापहम् । **ब्राह्मे**—यस्तुपाणि तलेभुक्तेयश्चफूत्कारसंयुतम् । प्रसृतांगुलिभिर्यश्चतस्यगोमांसवच्चतत् । हस्त्यश्वरथयानोष्ट्रमास्थितोनैवभक्षयेत् । श्मशानाभ्यंतरस्थोवादे वालयगतोपिवा । शयनस्थोनभुंजीतनपाणिस्थंनचासने । **तत्रैव**—नार्द्रवासानार्द्रशिरानचायज्ञोपवीतवान् । नप्रसारितपादस्तुपादारोपि तपाणिमान् । नावसक्थिकसंस्थश्चनचपर्यंकिकास्थितः । नवेष्टितशिराश्चापिनोत्संगकृतभाजनः । नचर्मोपरिसंस्थश्चचर्मवेष्टितपार्श्ववान् । अत्रस्य भारते—निषण्णश्चापिखादेतनतुगच्छन्कदाचन । **क्षत्रियेविशेषस्तत्रैव**—क्षत्रियःप्रावृतशिराभुंजीतासन्नशस्त्रभृदिति । अन्नस्य जन्मकालुष्यंदुष्यत्किंचनकुत्सयेत् । ग्रासशेषंचनाश्नीयात्पीतशेषंपिबेन्नतु । शाकमूलफलेक्ष्वादिदंतच्छेदैर्नभक्षयेत् । संवपेन्नान्नमन्नेनविक्षि प्तपात्रसंस्थितम् । बहूनांभुंजतांमध्येनाश्नीयात्त्वरयान्वितः । वृथानविकिरेदन्नंनोच्छिष्टंतुघृतंत्यजेत् । तिलकल्कंजलंक्षीरंदधिक्षौद्रंघृतानिच । नत्यजेदर्धजग्धानिसक्तूंश्चाथकदाचन । संवपेद्ग्रासशीकुर्यात् । **त्रिकांडमंडनः**—शिरोवेष्टयतुयोभुंक्तेयोभुंक्तेदक्षिणामुखः । वामपादेकरं न्यस्यतद्वैरक्षांसिगच्छति ।

**भोजनकालेस्पर्शास्पर्शौ । शुद्धितत्त्वेवृद्धशातातपः**—यदाभोजनकालेतुअशुचिर्भवतिद्विजः । भूमौनिक्षिप्यतंग्रासंस्नात्वाविप्रो विशुध्यति । भक्षयित्वातुतंग्रासमहोरात्रेणशुध्यति । अशित्वासर्वमेवान्नंत्रिरात्रेणविशुध्यति । अशुचिपदंनस्नानार्हमात्रपरंस्नानविधिवैय र्थ्यापत्तेरित्युक्तम् । **तत्रैवमार्कंडेये**—अंगुलिंचोद्धरेद्यस्तुगोमांसाशनवत्स्मृतम् । **अत्रिः**—मुखेनचान्नमश्नातितुल्यंगोमांसभक्षणैः । मुखेनगवादिवत् । **चंद्रिकायांवृद्धमनुः**—नपिबेन्नचभुंजीतद्विजःसव्येनपाणिना । नैकहस्तेनचजलंशूद्रेणावर्जितंपिबेत् । पीत्वावशेषितं

कृत्वाब्राह्मणःपुनरापिबेत् । निरासंतुमतंकुर्याद्वामहस्तेनवापुनः । इदंभोजनकालएव । अन्यत्रास्य प्रायश्चित्तोक्तेः । कौर्मे—नवाम हस्तेनोद्धृत्यपिबेद्वक्त्रेणवैजलम् । वामहस्तेनकेवलेनेत्यर्थः । एकहस्तेनेत्यस्यवामहस्तेनोपसंहारइतिकश्चित् । तन्न । पुनरेकहस्तनिषेधात् । अतःसव्येननपिबेत् । एकहस्तेनासव्येनापिनपिबेदित्यर्थः । ननुभोजनेपात्रधारणेसव्यहस्तस्यव्यापृतत्वाद्दक्षिणहस्तस्यचोच्छिष्टत्वात्कथंजल पानमितिचेत्—दक्षिणेनपात्रंधृत्वावामेनद्रोणादौजलंकृत्वावामेनपात्रंधृत्वादक्षिणेनजलपानसंभवात् । एकहस्तनिषेधोभोजनभिन्नकालविषयः । नचैकहस्तनिषेधाद्धस्तद्वयप्राप्तौजलंपिबेन्नाञ्जलिनेत्यादिवाक्यविरोधः । तस्याञ्जलिकृतजलपानपरत्वात् । एतस्यपात्रादिद्वाराजलपानपरत्वात् हस्त द्वयप्राप्तावपिसव्येनान्वारम्भणात् आचमनादौतथैवदर्शनादितिचंद्रिका ।

भोजनेग्रासप्रमाणम् । अपरार्केवसिष्ठः—अष्टौग्रासामुनेर्भक्ष्याःषोडशारण्यवासिनः । द्वात्रिंशतंगृहस्थस्यअमितंब्रह्मचारिणः । मक्षप्रमाणपिंडंचग्रसेदेकैकशःपुनः । मक्षाधिकस्तुयःपिंडआत्मोच्छिष्टःसउच्यते । पिंडावशिष्टमन्नंचवक्त्रनिःसृतमेवच । अभोज्यंतद्द्विजानां भुक्त्वाचांद्रायणंचरेत् । आदित्यपुराणे—नोच्छिष्टंग्राहयेदाज्यमन्नंवशेषंनसंत्यजेत् । शूद्रभुक्तावशिष्टंतुनाद्यादाज्यंस्थितंत्वपि । भारतेदानधर्मे—समानमेकपात्रेतुभुंजेन्नान्नंकदाचन ।

भार्यासहभुक्तिनिषेधः । मनुः—नाश्नीयाद्भार्ययासार्धंनैनामीक्षेतचाश्नतीम् । नभार्यादर्शनेऽश्नीयादिति । वसिष्ठः— भार्ययासहनाश्नीयादवीर्यवदपत्यंभवतीति । इदंचासवर्णाविषयम् । तथाचांगिराः—ब्राह्मण्यासहयोऽश्नीयादुच्छिष्टंवाकदाचन । न तत्रदोषंमन्यंतेसर्वएवमनीषिणः । उच्छिष्टमितरस्त्रीणांयोऽश्नीयाद्ब्राह्मणःक्वचित् । प्रायश्चित्तीसविज्ञेयःसंकीर्णोमूढचेतनः[1] । ब्राह्मणीपदंमर्तुः सवर्णोपलक्षणम् । अतएवाग्रेब्राह्मणग्रहणम् । तेनक्षत्रियादिरप्यसवर्णयासहनाश्नीयादित्यर्थइतिपृथ्वीचंद्रः । ब्राह्मेपि—ब्राह्मण्या

---

1 शुद्धचेतन ।

भार्ययासार्धंकचिद्भुंजीतचाध्वनि । असवर्णस्त्रियासार्धंभुक्त्वापततितत्क्षणात् । चंद्रिकायामादित्यपुराणेतु—अधोवर्णस्त्रियासार्धमिति तृतीयपादउक्तः । क्वचिदितिदेशकालाद्यसंभवविषयंविवाहविषयंवेतिविज्ञानेश्वरः । इदमपिदाक्षिणात्यभिन्नपरम् । पंचधाविप्रतिपत्तिर्दक्षिणातोऽनुपनीतेनभार्ययासहभोजनमित्युक्त्वाइतरइतरस्मिन्दुष्यतिनेतरइतरस्मिन्देशप्रामाण्यादितिमाधवीयेबौधायनोक्तेः । यत्तुमाधवीयेवृहद्यमः—माताचभगिनीवापिभार्याचान्याश्चयोषितः । नताभिःसहभोक्तव्यंभुक्त्वाचांद्रायणंचरेदितितदसवर्णापरम् । यदपिप्रायश्चित्तहेमाद्रौगालवः—एकयानसमारोहएकपात्रेचभोजनम् । विवाहेपथियात्रायांकृत्वाविप्रोनदुष्यति । अन्यत्रदोषमाप्नोतिपश्चाच्चांद्रायणंचरेदितितदप्यसवर्णापरम् ।

पंक्तिभेदावश्यकता । मदनरत्नेबृहस्पतिः—अप्येकपंक्त्यानाश्नीयात्संयुतःस्वजनैरपि । कोहिजानातिकिंकस्यप्रच्छन्नंपातकंभवेत् । एकपङ्क्त्युपविष्टानांदुष्कृतंयद्दुरात्मनाम् । सर्वेषांतत्समंतावद्यावत्पंक्तिर्नभिद्यते । बृहस्पतिः—अग्निनाभस्मनाचैवस्तंभेनसलिलेनवा । द्वारेणचैवमार्गेणपंक्तिभेदोबुधैःस्मृतः । तृणेनापिपंक्तिभेदइतिमाधवीयेमदनरत्नेच । तथाचचंद्रिकायांश्रीधरः—तृणेनांतरितंकृत्वापंक्तिदोषोनविद्यते । सएव—नस्पृशेद्वामहस्तेनभुंजानोहिकदाचन । नपादौनशिरोवस्तिंनपदाभाजनंतथा । गोभिलः—एकपंक्त्युपविष्टानांविप्राणांसहभोजने । यद्येकोपित्यजेत्पात्रंनाश्नीयुरपरेप्यतु । मोहाद्भुंक्तेतुयस्तत्रससांतपनमाचरेत् । सहएककाले ।

उदक्यादिशब्दश्रवणनिषेधः । माधवीयेआश्वमेधिके—उदक्यामपिचांडालंश्वानंकुक्कुटमेववा । भुंजानोयदिपश्येतक

---

१ इतरेतिदाक्षिणात्यअनुपनीतेनभार्ययाचसहइतरस्मिन्नुत्तरदेशेनदुष्यतिऔदीच्योक्तइतरस्मिन्दक्षिणेनदुष्यतीत्यर्थः ।

तदन्नंतुपरित्यजेत् । कात्यायनः—चांडालपतितोदक्यावाक्यंश्रुत्वाद्विजोत्तमः । भुंजीतग्राससमात्रंतुदिनमेकमभोजनम् । उत्तरार्धेयदीति शेषः । बृहन्नारदीये—स्नानदानजपादीनांभोजनाध्वरयोस्तथा । मध्येशृणोतिचेत्तेषांशब्दंकुर्यात्कदाचन । उद्वमेद्भुक्तमखिलंस्नात्वाचोपवसेत्तदा । द्वितीयेह्निघृतंप्राश्यशुद्धिमाप्नोतिमानवः । माधवीयेगौतमः—काहलश्रवणंप्राप्याचांत्वाश्वसोलूखलस्वच । एतेषांनिनदायानतावत्कालमभोजनम् । कात्यायनः—नृणांभोजनकालेतुयदिदीपोविनश्यति । पाणिभ्यांपात्रमालभ्यभास्करंमनसास्मरेत् । पुनश्चदीपिकांकृत्वातच्छेषंभोजयेन्नरः । पुनरन्नंनभोक्तव्यंभुक्त्वापापैर्विलिप्यते । अन्नंगृहीत्वेत्यर्थः । स्मृत्यर्थसारे—अन्नभोजनकालेऽस्माद्दूषिते स्नानंघृतप्राशनंच दंतपातेचैवमिति । विष्णुपुराणे—जठरंपूरयेदर्धमन्नैर्भागंजलेनच । वायोःसंचरणार्थायचतुर्थमवशेषयेत् । पुलस्त्यः—भोजनंतुननिःशेषंकुर्यात्प्राज्ञःकथंचन । अन्यत्रदधिसक्त्वाज्यपललक्षीरमध्वपः । चंद्रिकायांवृद्धमनुः—भार्याभर्तृकदासेभ्यउच्छिष्टशेषयेत्ततः । भारते—पानीयंपायसंसक्तून्सर्पिर्मधुदधीन्यपि । निरस्यशेषमेतेषांनप्रदेयंतुकस्यचित् । टोडरानंदेविष्णुपुराणे—नाशेषंपुरुषोश्नीयादन्यत्रजगतीपतेः । ओदनोपिसशेषोभोज्यइतिटोडरानंदे । मदनरत्नेब्राह्मे—कुर्यात्क्षीरांतमाहारंनदध्यंतंकदाचन । काशीखंडे—अनुपीयततःक्षीरंतक्रंपानीयमेवच । अमृतापिधानमसीत्येनंप्राश्योदकसकृत् । पीतशेषंक्षिपेद्भूमौतोयमंत्रमिमंपठन् । अप्रक्षालितहस्तस्यदक्षिणांगुष्ठमूलतः ।—रौरवेपूयनिलयेपद्मार्बुदनिवासिनाम् । उच्छिष्टोदकमिच्छूनामक्षय्यमुपतिष्ठताम् । देवलः—भुक्तोच्छिष्टारसमादायसर्वस्मात्किंचिदाचमनं । उच्छिष्टभागधेयेभ्यःसोदकंनिर्वपेद्भुवि । उत्तराचमनंचाक्षालितहस्तेनकार्यम् । हस्तंप्रक्षाल्यगंडूषंयःपिबेत्त्वापमोहितः । सदैवेचैवपित्र्येचआत्मानमवसादयेत् । अर्धंपीत्वातुगंडूषमर्धंत्यक्त्वामहीतले । रसातलगतानागास्तेनप्रीणंतिनित्यशइति व्यासोक्तेः । गंडूषममृतापिधानमसीतिजलपानम् । एतदकरणेप्रायश्चित्तमुक्तंभारते—यस्तुचित्तव्यनाचांतोभुक्तवानासनात्ततः । सद्यः

स्नानंप्रकुर्वीतसोन्यथाप्रयतोभवेत् । शातातपः—आचम्यपात्रमुत्सार्यकिंचिदार्द्रेणपाणिना । केचिदुत्तरापोशनोत्तरंप्रथमंगंडूषःपश्चाद्धस्तप्रक्षाल
नमाहुः । तन्न । पूर्वोक्तग्रंथविरोधात् । देवलः—भोजनेदंतलग्नानिनिर्हृत्याचमनंचरेत् । दंतलग्नमसंहार्यंलेपंमन्येतदंतवत् । नतत्रबहुशः
कुर्याद्यत्नमुद्धरणंप्रति । मार्कंडेये—अनुत्तिष्ठन्नकुर्वीतभुक्त्वादंतविशोधनम् । दंतलग्नेकालांतरच्युतेबौधायनः—तत्यक्त्वैवंशुचिर्नपुन
स्तागोत्तरमाचामेदिति । निगिरन्नेवतच्छुचिरितियाज्ञवल्क्यः । अतस्त्यागनिगिरणयोर्विकल्पः । मदनरत्नेगौतमः—गंडूषस्याथसम
येतर्जन्यानक्रमघर्षणम् । यःकरोतिसमूढात्मारौरवेनरकेवसेत् । हस्तक्षालनोत्तरंहस्तादोषेदृष्टेनदोषः । द्वावेवोष्ठौश्मश्रुकरौसक्लेदौभोजनादनु ।
अदुष्टान्श्मश्रुकिंचःप्राहबालवृद्धस्त्रियोमुखमितिवृद्धपराशरोक्तेः । गंडूषप्रक्षेपश्चकांस्यपात्रेणकार्यः । तथाचांगिराः—गंडूषंपादशौचंचकु
र्यान्नैवकांस्यभाजने । भूमौनिक्षिप्यषण्मासान्पुनराहारमादिशेत् । उत्तरार्धेकांस्यपात्रमितिशेषः । पुनराहारंतत्क्षणंपात्रांतरानयनंवा । माध
वीयेव्यासः—तस्माद्देशान्मनागपसृत्यविधिवदाचामेदिति । तदुत्तरंद्विराचामेदित्युक्तं । विष्णुपुराणे—अन्नंबलायमेभूमेरपामग्न्य
निलस्यच । भवत्वेतत्परिणतंममास्त्वव्याहतंसुखम् । अगस्तिःकुंभकर्णश्चशनिश्चवडवानलम् । आहारपरिणामार्थंसंस्मरामिवृकोदरम् । वाता
पिर्भक्षितोयेनवातापिश्चमहासुरः । समुद्रःशोषितोयेनसमेऽगस्त्यःप्रसीदतु । इत्युच्चार्यस्वहस्तेनपरिमृज्यात्तथोदरम् । अत्रिः—आचांतोप्य
शुचिस्तावद्यावत्पात्रमनुद्धृतम् । उद्धृतेप्यशुचिस्तावद्यावद्भूमिर्नलिप्यते । भूमावपिहिलिप्तायांतावत्स्यादशुचिःपुमान् । आसनादुत्थितस्तस्मा
द्यावन्नस्पृशतेमहीम् । आपस्तंबः—यत्रभुज्यतेतत्समूह्यनिहृत्यावोक्ष्यतंदेशंलेपानसंहृत्याद्भिःसंश्लिष्योत्तरतःशुचौदेशेरुद्रायनिनयेदेवंवा
स्तुशिवंभवतीति । आश्वलायनः—ततःशतपदंगत्वावीक्ष्यादित्यंशनैःशनैः । पाणिनोदकमालभ्यमंत्रमेनंसमुच्चरेत् । काशीखंडे—
इत्यन्नपरिसंकल्प्यप्रक्षाल्यचरणौकरौ । ततोन्नपरिणामार्थंमंत्रानेतानुदीरयेत् । अग्निराप्याययन्धातून्पार्थिवान्पवनेरितः । दत्तावकाशोनभसा

जरयत्वस्तु मे सुखम् । प्राणापानसमानानामुदानव्यानयोस्तथा ॥ अन्नं पुष्टिकरं चास्तु मम अप्यव्याहतं सुखम् ॥ समुद्रो वडवाग्निश्च नश्योऽस्यस्ते दनः । मयाप्यन्नहुतं यच्च दशेषं जरयंत्वमी । विष्णुः—विष्णुः समस्तेंद्रियदेहदेही प्रधानभूतो भगवान्यथैकः । सत्येन तेनान्नमशेषमेतदारोग्यदं मे परिणाममेतु । इत्युच्चार्य स्वहस्तेन परिमृज्यात्तथोदरम् । अनायासप्रदायीनि कुर्यात्कर्माण्यतंद्रितः ॥ ऋषिभिर्धाने शक्तो भवेति द्वाभ्यां तु भुक्त्वान्नं प्रयतः शुचिः । हृदयं पाणिना स्पृष्ट्वाऽभ्योऽजीवेद गदः सुखी । हारीतः—पश्चात्तदन्नशेषं मलिं हरेदिति । एतच्च पाकविशिष्टेन रौद्रबलिहरणमिति जयस्वामी । धर्मप्रश्ने ब्रह्मचारिप्रकरणे—भुक्त्वा स्वयममत्रं प्रक्षाल्यीतेति । अमत्रं भोजनस्य । मिश्रपात्रस्य स्वस्यैव प्रक्षालनेन दोष इत्युज्ज्वला । उभयोरपि पात्रयोर्ग्रहणमित्यन्ये । स्नातकादीनामप्येतत् ।

तांबूलभक्षणविचारः । विशेषात्तु प्रक्रमेण मार्कंडेये—भूयोऽप्याचम्य कुर्वीत ततस्तांबूलभक्षणम् ॥ माधवीये वसिष्ठः—सुपूगं च सुपर्णं च सुचूर्णेन समन्वितम् । अदत्त्वा द्विजदेवेभ्यस्तांबूलं वर्जयेद्द्विजः ॥ एकपूगं सुखारोग्यं द्विपूगं निष्फलं भवेत् ॥ अतिश्रेष्ठं त्रिपूगं च अधिकं नैव दुष्यति । मार्कंडेये—पर्णाग्रं पर्णपृष्ठं च चूर्णपर्णं द्विपर्णकम् । दंतधावनपर्णं च शक्रस्यापि श्रियं हरेत् । अकृत्वा च मुखे पर्णं पूगं खादति यो नरः । दशजन्म दरिद्रः स्यादंते च न हरिं स्मरेत् । नित्यं खादति तांबूलं वक्रभूषाकरं नरः । न मुच्यते च श्रुतसेवतस्य मंदिरमिंदिरा । चूर्णपूगदलाधिक्ये साम्ये चापि सतिक्रमात् । दुर्गंधारागसौगंध्यबहुरंगान्विदुर्बुधाः ॥ मदनरत्ने वसिष्ठः—पर्णमूले भवेद्व्याधिः पर्णाग्रे पापसंभवः । चूर्णपर्णं हरेदायुः शिरा बुद्धिविनाशिनी । तस्मादग्रं च मूलं च शिराश्चैव विशेषतः । चूर्णपर्णं वर्जयित्वा तांबूलं भक्षयेद्बुधः ॥ आश्वलायनः—यतेश्च विधवायाश्च दीक्षितस्य च टोरपि ।

---

१ पात्रे सर्वभूतानां चरति सम्भवता । तद्विहीनाः पिनाकाममनारदस्य सराम्यहम् । इत्थं चिन्त्य सुमानदृष्टिदोषो न बाधते ॥ अवनीपर्मश्च भूतकुमारं भवचारिणम् । दृष्टिदोषविनाशाय हनूमतं स्मराम्यहम् ।

तांबूलभक्षणंवर्ज्यंमैथुनंचविशेषतः । विद्याकामोऽनिशंराञौतांबूलंतुनभक्षयेत् । कृष्णभट्टीये—मातापित्रोःक्षयश्राद्धेतथैवक्षयसूतके । तांबूलंचवर्जयेद्यस्तुपितृहासनिगद्यते । हेमाद्रौजाबालः—दंतधावनतांबूलंतैलाभ्यंगमभोजनम् । रत्यौषधपरान्नंचश्राद्धकृत्सप्तवर्जयेत् । यत्तुकृष्णभट्टीये—नित्यश्राद्धेत्वमाश्राद्धेश्राद्धेचापरपक्षिके । तांबूलचर्वणेदोषोनेतिशातातपोऽब्रवीदिति तन्निर्मूलम् । उक्तविरोधात् । लघुनारदीये—दशम्यादिमहीपालत्रिदिनंपरिवर्जयेत् । गंधतांबूलपुष्पाणिस्त्रीसंभोगंमहाशयः ।

दिनशेषभागकृत्यम् । विष्णुरहस्ये—गात्राभ्यंगंशिरोभ्यंगंतांबूलंचानुलेपनम् । व्रतस्थोवर्जयेत्सर्वंयच्चान्यच्चनिराकृतम् । दक्षः—भुक्त्वातुसुखमास्थायतदन्नपरिणामयेत् । इतिहासपुराणाद्यैःषष्ठसप्तमकौनयेत् । अष्टमेलोकयात्रातुबहिःसंध्याततःपुनः । आयुर्वेदे—भुक्त्वोपविशतस्तुंदंबलमुत्तानशायिनः । आरोग्यंवामकुक्षौतुमृत्युर्धावतिधावतः । इतिश्रीमन्नारायणभट्टात्मजश्रीमद्रामकृष्णभट्टसुतलक्ष्मणभट्टकृताचाररत्नेभोजनप्रकरणम् ॥

सायंसंध्याविचारः । व्यासः—सच्छास्त्रादिविनोदेनसन्मार्गैरविरोधिना । दिनंनयेत्ततःसंध्यामुपतिष्ठेत्समाहितः । यमः—चत्वारिखलुकर्माणिसंध्याकालेषुवर्जयेत् । आहारंमैथुनंनिद्रांस्वाध्यायंचचतुर्थकम् । संवर्तः—सादित्यांपश्चिमांसंध्यामर्धास्तमितभास्कराम् । अत्रसायंसंध्यायाःकालकर्तव्यतादिसंध्याप्रकरणेज्ञेयम् । विशेषमाहचंद्रिकायांव्यासः—प्रत्यङ्मुखोपविष्टस्तुगायत्रींतुजपेत्ततः । बह्वृचसूत्रेपि—उत्तरापराभिमुखोन्वष्टमदेशंसावित्रींजपेदिति । श्राद्धेभुक्तवतःसंध्यानिषेधमाहश्राद्धचंद्रोदयेयमः—पुनर्भोजनमध्वानं

१ शुक्लाम्बरधरांकृष्णापीतवस्त्राचतुर्भुजाम् । शङ्खचक्रगदापद्महस्तांगरुडवाहनाम् । वद्यांश्रमवासांतामायांतींसूर्यमंडलात् । वैष्णवीमक्षरांसाक्षाद्देवीमावाहयाम्यहम् ॥ इति ।

गारमायासमैथुने । संध्यांप्रतिग्रहंहोमंश्राद्धभोक्ताप्यवर्जयेत् । अयंसंध्यानिषेधःप्रायश्चित्ताकरणे । तदाह—सायंसंध्यांप्रक्रम्य—दशाकृत्वः
पिबेदापोगायत्र्याश्राद्धभुग्द्विजः । ततःसंध्यामुपासीतशुध्येतत्तदनंतरम् । अत्रदशकृत्वःपिबेदितिसंबंधः । इदंमनूक्तप्रायश्चित्तंश्राद्धीयविषय
मितिमाधवः । संध्याधिकारार्थमितिपृथ्वीचंद्रः । गौडास्तु—सायंसंध्यापराह्णंचछेदनंचवनस्पतेः । अमावास्यांनकुर्वीतगत्रिभोजनमेवच ।
शूतचकरहंचैवसायंसंध्यादिवाशयम् । श्राद्धकर्ताचभोक्ताचपुनर्भुक्तिंचवर्जयेदितिकामधेनौत्वाराहात् कर्तुरपिसायंसंध्यानिषेधमाहुस्तन्नि
र्मूलम् । यत्तु—द्वादश्यांपंचदश्यांचसंक्रांतौश्राद्धवासरे । सायंसंध्यांनकुर्वीतकुर्वंश्चपितृहामवेदितिकालकौमुद्यांवचनतदपिनिर्मूलम् ।
शुक्तंचैतत् । ततःसंध्यामुपासीतेत्युक्तेः । तेनश्राद्धभोजननिमित्त अन्यत्प्रायश्चित्तम् । पार्वणश्राद्धेतुपद्प्राणायामाइतिविश्वादर्शः ।
तदिदंनसंध्याधिकारार्थंकिंतुश्राद्धभोजननिमित्तम् । यत्तु—प्राणायामत्रयंकृत्वाप्रणवेनाभिमंत्र्यपद् । ततःसंध्यामुपासीतशुद्धिःस्याच्छ्राद्ध
भोजिनामिति तन्नश्राद्धपरम् । प्रायश्चित्तगौरवादितिप्रयोगपारिजातः । याज्ञवल्क्यः—उपास्यपश्चिमांसंध्यांहुत्वाग्नींस्समुपास्यच ।
भृत्यैःपरिवृतोभुक्त्वानातितृप्त्याथसंविशेत् । चकारोवैश्वदेवादेरपिग्रहणार्थम् । सायंवैश्वदेवःपाकांतरेणकार्योनपुनर्भुक्तशिष्टेन । नवश्रा
द्धस्यचच्छिष्टंगृहेपर्युषितंचयत् । दंपत्योर्भुक्तशिष्टंचभुक्त्वाचांद्रायणंचरेदितिचंद्रिकायांवचनात् । यदार्याणामभोज्यस्यान्नतेनयजेतहस्ता
यस्तंवोचत्तेम । विष्णुपुराणे—तत्रापिश्वपचादिभ्यस्तथैवान्नापवर्जनम् । तत्रैव—पुनःपाकमुपादायसायमप्यवनीपते । वैश्वदेव
निमित्तंवैपत्न्यासार्धंबलिंहरेत् । सायंत्वन्नस्यसिद्धस्यपत्न्यमंत्रंबलिंहरेत् । दक्षः—प्रदोषपश्चिमौयामौवेदाभ्यासरतोनयेत् । यामद्वयंशयान
स्तुब्रह्मभूयायकल्पते । शौनकः—निशायाःप्रथमेयामेजपयज्ञार्चनादिकम् । स्वाध्यायोभोजनंभोक्तवर्जयित्वामहानिशाम् । व्यासः—
महानिशातुविज्ञेयामध्यमयामद्वयंनिशि । शौनकः—पश्चात्तनेतथायामेजपयज्ञार्चनादिकम् । अभ्यासोपितत्रैवपवर्जयित्वातुभोजनम् । इति

**शयनविचारः ।** **हारीतः**—नसंधिवेलायांशयीतनननोनाशुचिर्नभग्नेनोच्चैर्निशायांभार्येतेति । प्रगेप्रातः । अतएवपृथ्वीचंद्रोदयेस्मृत्यंतरे—आसनंशयनंयानंजायापत्यंकमंडलुम् । शुचीन्यात्मनएतानिपरेषामशुचीनितु । **कौर्मे**—अश्रद्धोऽशुचिःशयितःस्वाध्यायंस्नानंभोजनम् । बहिर्निष्क्रमणंचैवनकुर्वीतकदाचन । नवीजयेच्चवस्त्रेणनदेवायतनेस्वपेत् । **चंद्रिकायांगोभिलः**—स्नातकःस्वापकालेवैणवंदंडमुपनिदधातीति । स्वप्यादिष्वनुवृत्तौ**शंखलिखितौ**—नदीर्णायांखट्वायांनान्यसेवितायामनग्नुश्च्यनभूतग्रहायतनेनश्मशानवृक्षच्छायासु नपर्वणिरभसोत्सवेचेति । पर्वणिप्रतिपत्संचदश्योःसंधौ । रससोत्सवेपुत्रजन्मादौ । **हारीतः**—नप्रत्यक्तिर्यगुदक्शिराःकोणशिराःपश्चिमशिराउत्तरशिराश्चेति । **मार्कंडेये**—प्राक्शिरःशयनेविंद्याद्धनमायुश्चदक्षिणे । पश्चिमेप्रबलांचिंतांहानिमृत्यूतथोत्तरे । शून्यालयेश्मशानेचपथिवृक्षेचतुष्पथे । महादेवगृहेवापिमातृवेश्मनिनस्वपेत् । नयक्षनागायतनेस्कंदस्यायतनेतथा । कूलच्छायासुचतथाशर्करालोष्ठपांसुषु । नस्वपेच्चतथादर्भेविनादीक्षांकथंचन । धान्यगोदेवविप्राणांगुरूणांचतथोपरि । नाकाशेसर्वतःशून्येनचचैत्यद्रुमेतथा । **गार्ग्यः**—स्वगृहेप्राक्शिराःशेतेश्वाशुर्येदक्षिणाशिराः । प्रत्यक्शिराःप्रवासेतुनकदाचिदुदक्शिराः । **भारते**—शय्यार्थंतस्यचाप्यन्नस्त्रीपूर्वमधितिष्ठति । तद्दक्षिणेशयीतेति । **उशना**—नतैलेनाभ्यक्तशिराःस्वपेदिति । **पैठीनसिः**—नादीक्षितःकृष्णचर्मणिसुप्यादिति । **आपस्तंबः**—सदानिशायांदारान्प्रत्यलंकुर्वीतेति । **विष्णुपुराणे**—शुचौदेशेविविक्तेतुगोमयेनोपलेपिते । प्रागुदक्प्रवणेचैवसंविशेत्तुसदाबुधः । मंगल्यंपूर्णकुंभंचशिरोदेशेनिधायतु । वैदिकैर्गारुडैर्मंत्रैरक्षांकृत्वास्वपेत्ततः । **हारीतः**—क्षालितचरणःसर्वतोरक्षांकृत्वोदकपूर्णघटादिमंगलोपेतशय्यामभिरुचितामनुपहतांसुत्रामाणमितिपठन्शय्यामधिष्ठायरात्रिसूक्तंजप्त्वाविष्णुंनमस्कृत्य । सर्पापसर्पभद्रंतेदूरंगच्छमहाविष । जनमेजयस्ययज्ञांतेआस्तीकवचनंस्मर । आस्तीकवचनंश्रुत्वायःसर्पोननिवर्तते । शतधाभिद्यतेमूर्ध्निशिंशवृक्षफलंयथा । इत्येतच्छ्लोकद्वयंजप्त्वेष्टदेवतांस्मृत्वा

रात्रिसूक्तं जपन्स्मृत्वा देवांश्च सुखशा
साधिमाश्च यान्यांश्च वैदिकान्मंत्रान्जप्त्वा मंगलश्रुतिशंखं च शृण्वन्दक्षिणशिराः स्वपेदिति । विष्णुपुराणे— रात्रिसूक्तं जपन्स्मृत्वा देवांश्च सुखशा
यिनः । तानाह गोभिलः— अगस्तिर्माधवश्चैव मुचुकुंदो महामुनिः । कपिलो मुनिरास्तीकः पंचैते सुखशायिनः । शयीतैस्य धिकृत्य दा
रीतः— नान्यपूर्वे नानुवंशाद्दीर्णे नाश्मपीठोपधानेन चासने इति । अन्यपूर्वे अन्योपभुक्ते । चंद्रोदये स्मृतिः— आसनं शयनं यानं जायाप
त्यं कमंडलुम् । शुचीन्यात्मन एतानि परेषामशुचीनि तु । विष्णुः— नाकाशे न पालाशे न पंचदारुकृते न गजभग्नकृते न भिन्ने नाग्निप्लुष्टे न घटसिक्तद्रुमजे
न देवायतने न गणमध्ये न हुताशोपरि न भस्मनि नाशुचौ देशे न पर्वतमस्तके शयीतेति । पंचदारुजे पंचजातीयदारुकृते इति टोडरानंदः । तन्न ।
वक्ष्यमाणविष्णुपुराणविरोधात् । शंखलिखितौ— न विशीर्णखट्वायामनभ्युक्ष्य न भूतयक्षग्रहायतने पुनः श्मशानवृक्षच्छायासु शयीतेति ।
चंद्रिकायां प्रचेताः— न विशीर्णखट्वायां नान्यवर्णोपशायितायां स्वपेदिति । विष्णुपुराणे— नैकांशालां नवां भग्नां नासमां मलिनां तथा ।
न च दंतमयीं शय्यामधितिष्ठेदनास्तृताम् । मृतदंतमये विद्युद्दग्धे वेदमे पलाशजे । न शयीत नरो धान्ये शयने पंचदारुजे । पंचदारूणि चोक्तानि चूत
जंबूद्रुमास्तथा । अश्मपीठोस्थितांश्चैव घटसिक्ततरूंस्तथा । करिभग्नकृते चैव न शयीत कदा नरः ।

संयोगे निषिद्धदेशादिनादि माधव्यामादित्यपुराणे संयोगे निषिद्धदेशा उक्ताः— चैत्यचत्वरसौवेषु नैव देवचतुष्पथे । नैव

श्मशानोपवनसलिलेषु महीपते । काशीखंडे— एककाष्ठमयीं शय्यां नातितृप्तोऽध्यसंविशेत् । विष्णुः— न विद्युद्दग्धेन वा लपधान्योपरि नसं
ध्यायां नाद्रेति । कल्पतरौ कात्यायनः— पौर्णमास्याममावास्यामधःशय्या विधीयते । अनाहिताग्नेरप्येषा पश्चाद्गेर्विधीयते । टोडरानंदे
तीर्थसौख्ये स्कांदे— वार्षिकांश्चतुरो मासान्प्रसुप्ते वै जनार्दने । पंचखट्वादिशयनं वर्जयेत्किमाकरः । अनृतौ वर्जयेद्भार्यां मांसं मधु परौदनम् ।

तिथितत्त्वे स्कांदे—खंडनंनखकेशानांमैथुनाध्वगमेतथा। आमिषंकलहंहिंसांवर्षवृद्धौविवर्जयेत्। **पराशरः**—नर्मदायैनमःप्रातर्नर्मदायैनमोनिशि। नमोस्तुनर्मदेतुभ्यंत्राहिमांविषसर्पतः। **यमः**—भुंजीतद्यार्द्रपाणिस्तुनार्द्रपाणिःस्वपेन्निशि। **विष्णुः**—निद्रासमयमासाद्यतांबूलंवदनात्त्यजेत्। पर्यंकात्समदांमालांपुंड्रंपुष्पाणिमस्तकात्। **बौधायनः**—नपर्वणिनश्राद्धेनव्रतीनदीक्षितश्चेति। दीक्षितोदीक्षाख्यसंस्कारवान्। सोप्यवभृथेष्टिंयावत्। **पर्वाणिविष्णुपुराणे**—चतुर्दश्यष्टमीचैवअमावास्याचपूर्णिमा। पर्वाण्येतानिराजेंद्ररविसंक्रांतिरेवच। तैलस्त्रीमांससंभोगीपर्वस्वेतेषुवैपुमान्। विण्मूत्रभोजनंनामनरकंप्रतिपद्यते। सामान्यतश्चतुर्दश्यष्टमीप्रदेपिकृष्णपक्षस्थतेग्राह्ये। कृष्णाष्टमीचतुर्दश्योःपूर्णिमादर्शसंक्रमइतिस्कांदादितिपृथ्वीचंद्रः। तत्र। षष्ठ्यष्टम्यावमावास्याउभेपक्षेचतुर्दशी। मैथुनंचनसेवेतद्वादशींचममप्रियामितिटोडरानंदेवाराहविरोधात्। **संस्कारटोडरानंदेकौर्मे**—ब्रह्मचारीभवेन्नित्यंतद्वज्जन्मत्रयाहनि। **कल्पतरौचंद्रिकायांवामने**—नाभ्यंगमर्केनचभूमिपुत्रेक्षौरंचशुक्रेथकुजेचमांसम्। बुधेचयोषित्परिवर्जनीयाशेषेषुसर्वाणिसदैवकुर्यात्। मूलेष्टगेमाद्रपदासुमांसंयोषिन्मघाकृत्तिकयोत्तरासु। वर्ज्येतिपूर्वार्धानुषंगः। **याज्ञवल्क्यः**—एवंगच्छन्स्त्रियंक्षामांमघांमूलंचवर्जयेत्। यत्तुरत्नमालायां मूलोत्तरयोरुक्तिःसैतद्विरोधादनिला। **ऋतुः**—ऋतुकालाभिगामीस्यात्स्वदारनिरतःसदा। यःस्वदारानृतुस्नातान्स्वस्थःसन्नोपगच्छति। भ्रूणहत्यामवाप्नोतिनात्रकार्याविचारणेतिदेवलोक्तेः।

**ऋतुदिननियमः संभोगोत्तरंशौचंच। ऋतुमाहयाज्ञवल्क्यः**—षोडशर्तुर्निशाःस्त्रीणांतस्मिन्युग्मासुसंविशेत्। ब्रह्मचार्येवप

1 विष्णुपुराणे—नरत्कारोर्जरत्कार्यांसमुत्पन्नोमहायशाः। आस्तीकःसत्यसंधोमांपन्नगेभ्योभिरक्षतु। रात्रौन्यस्यदायसीदशिरात्रीसूक्तजप्त्वा नमोनदिकेयरायैतिनत्वाग्नात्स्यादक्षिणतोवाशिरः कृत्वास्वपेदितिकमलाकारः। 2 वामनपुराणे—बुधेचयोषानरमाल्भेतपूर्णासुयोषित्परिवर्जनीया।

चतुर्दशीचशेषाःस्युःप्रशस्तादशरात्रयः। मैथुनप्रशस्तऋतुकालिकद
र्वेध्यावाअतस्तश्चवर्जयेत्। मनुः—तासामाद्याश्चतस्रस्तुनिंदितैकादशीचया। ऋतावपिपर्वादिस्वर्वतायोगाऽयोगव्यवच्छेदस्वि
शराश्रमध्येमैथुननिषिद्धतिथिनक्षत्रवारादीनांदर्शनांक्रमेणसंभवस्तत्रपर्वस्वपिमैथुनेदोषाभावः। ऋतावुपेयादित्यर्थशास्त्रयोर्विरोधेवातत्रार्थशास्त्रवाधः। बौधायनः—
व्यर्थत्वादितिशंकरोपाध्यायाः। तच्च। पर्वस्वपिनिषेधात्। अतोयत्रदृष्टार्थोनिषेधःस्मृत्यर्थशास्त्रयोर्विरोधेवातत्रार्थशास्त्रवाधः। यावत्स्खलनंतावत्सहवाशय्या
एवमर्थरोव्रजेत्काम्यंयावत्सन्निपातंचसहशय्याततोनानोदकस्पर्शनमपिवालेपान्प्रक्षाल्याचम्यप्रोक्षणमंगानामिति। ऋतौतुगर्भशंकित्वात्स्नानंमै
ततोनाना पृथक्शयीयातामित्यर्थः। उदकस्पर्शनेस्नानमितिहरदत्तः। एतद्दतौ। अन्यत्रलेपान्प्रक्षाल्येत्यादि। अनृतावपिस्नान
शुनिनःस्मृतम्। अनृतौतुयदागच्छेच्छौचंमूत्रपुरीषवदितिवृद्धशातातपात् मूत्रपुरीषवच्छौचद्वयंकार्यमित्यर्थइतिचंद्रिका। याज्ञवल्क्यः—नग्नःस्नात्वाच
मुक्तंचंद्रिकायाम्—अष्टम्यांचचतुर्दश्यांदिवापर्वणिमैथुनम्। कृत्वासचैलंस्नात्वातुवारुणीमिश्चमार्जयेत्। नक्षत्रंपरस्त्रियंदृष्ट्वादिनमेकंव्रतीभवेदिति तदभ्यासपर
सुप्त्वाचगत्वाचैवदिवाश्रियम्। यत्तुशंखः—दिवातुमैथुनंगत्वानग्नःस्नात्वातथांभसि। पृथक्शय्यातुनारीणामशु
मितिशूलपाणिः। अत्रमैथुनोत्तरंसहशय्यानिषेधात्तदभावेसहशय्या। सन्निहितभर्तृकायाःपृथक्शयनस्यदंडत्वात्। हारैश्चकंठसंसक्तैःसहचेद्विप
श्रवदुच्यतइतिवचनात्—तस्मात्सर्वास्त्रियोयालेभर्त्रासहापिवापृथक्। निशिनोशयनंकुर्युःकंचुकीकर्णभूषणैः। स्नानंपुंसःनस्त्रियाः। तस्याःशुचित्वात्।
वास्तुताः। भविष्यंतिनसंदेहःकुर्युःशय्यांपतिव्रताइतिसत्यादिस्त्रंदाच्च हारादिभिःसहेत्यर्थः। वृद्धपराशरः—
तदाहयोगयाज्ञवल्क्यः—उभावप्यशुचीस्यातांदंपतीशयनंगतौ। शयनादुत्थितानारीशुचिःस्यादशुचिःपुमान्। स्त्रियाविशेषमा
चातुर्वर्ण्यंशुचिर्नारीकृताभिगमनापिवा। विप्रेमैथुनिनिस्नानंराजकेपिशिरोविना। नाभियावद्विशस्तद्वच्छिरःशौचंचशूद्रके। मनुः—अमावास्यामष्टमींचपौर्णमासी
दृसएव—नचकुर्वीतसास्नानंनाभेरधस्तुशोधयेत्। गौतमः—नमैथुनीभूयशौचंप्रतिविलंबेदिति।

चतुर्दशीम् । ब्रह्मचारीभवेन्नित्यमप्तौस्नातकोद्विजः । ऋतौनिरवकाशेश्राद्धादावपिगच्छेत् । यथापोडशेहनिपरदेशादागतस्याश्रेन्ऋत्वभा वादगमनेदोषोगमनेदातुर्भोक्तुश्चादोषः । तथाचविज्ञानेश्वरः—एवंगच्छन्ब्रह्मचार्येवभवतीति । यत्तुहेमाद्रौशिवरहस्ये—दिवाज न्मदिनेचैवनकुर्यान्मैथुनंमती । श्राद्धंदत्वाचभुक्त्वाचश्रेयोर्थीनचपर्वसुइति तदनृतुपरम् । ब्रह्मचार्येवभवतियत्रतत्राश्रमेवसन्नितिमनूक्तेः । माधवीयेतु—ऋतुकालंनियुक्तोवानैवगच्छेत्स्त्रियंक्वचित् । तत्रगच्छन्समाप्नोतिह्यनिष्टफलमेवचेतितद्वृद्धमनूक्तेः । श्राद्धेब्रह्मचर्यमावश्यकमि त्युक्तम् । यत्तुधर्मप्रदीपे—आमेहेमैतथानित्येनांदीश्राद्धेतथैवच । व्यतीपातादिकेश्राद्धेनियमान्परिवर्जयेदिति तन्निर्मूलम् । भारते— स्नातांचतुर्थेदिवसेरात्रौगच्छेद्विचक्षणः । यत्तुनारदः—रजोदर्शनतोऽस्पृश्यानार्यादिनचतुष्टयम् । ततःशुद्धक्रियाश्चैताःसर्वंचर्णंव्ययंविवि रिति । तत्रास्पृश्यत्वंकर्मानधिकाररूपंज्ञेयम् । स्मृत्यंतरेचतुर्थनिषेधोऽपत्यालपायुष्ट्वादिदोषार्थः । चतुर्थीप्रभृत्युत्तरोत्तराःप्रजानिःश्रेयसार्थ मित्यापस्तंबोक्तेः । रात्रौचतुर्थ्यांपुत्रःस्यादल्पायुर्धनवर्जितइतिव्यासोक्तेश्चेतिदोडरानंदः । अन्येतुस्नानंरजस्वलायास्तुचतुर्थेहनि शस्यते । गम्यानिवृत्तेरजसिनानिवृत्तेकथंचनेत्यापस्तंबोक्तेःरजोनिवृत्त्यनिवृत्तिभ्यांव्यवस्थेत्याहुः । सर्वास्वयुग्मासुगमनं युग्मास्वितिबहुवचना दितिविज्ञानेश्वरः । अनृतावपिगमनमाहगौतमः—ऋतावुपेयात्सर्वत्रवाप्रतिषिद्धवर्जमिति । यत्तुभारते—अनृतौमैथुनं गच्छेद्बीजस्तैन्यंकरोम्यहमिति तत्त्वनिच्छापरम् । वाराहे—यस्तुपाणिगृहीतायांमासेकुर्वीतमैथुनम् । भवंतिपितरस्तस्यतंमासं रेतसोभुजः ॥

अगम्याःस्त्रियः । आश्वलायनः—भ्रप्रजोदर्शनात्पत्नींनेयाद्गत्वापतत्यधः । एतदपवादःव्यवहारचमत्कारेकश्यपसंहि तायाम्—वर्षाद्द्वादशकादूर्ध्वंयदिपुष्पंबहिर्नहि । अंतःपुष्पंभवत्येवपनसोदुंबरादिवत् । अतस्तत्रप्रकुर्वीततत्संगंबुद्धिमान्नरः । छंदोगपरि

नदिवासंध्ययोर्न शिष्टे—अजातव्यंजनालोम्नीनतयासहसविशेत् । बौधायनः—स्वदारेषुनातीर्थेउपेयादिति । तीर्थयोनिः । सएव—नदिवासंध्ययोर्न शिष्टे—अजातव्यंजनालोम्नीनतयासहसविशेत् । अप्रियामप्रि मलिनांनवयोधिकांनाम्यक्तोनरोगपरइति । वयोधिकागतरजस्का । आयुर्वेदे—ग्राम्यधर्मेत्यजेत्सर्वामनुत्तानांरजस्वलाम् । अप्रियामप्रि मलिनांनवयोधिकांनाम्यक्तोनरोगपरइति । वर्णिनीमन्ययोनिंचगुरुदेवनृपालये । चैत्यश्मशानायतनचत्वरांबु याचारांह्यसंकीर्णमैथुनाम् । अतिस्थूलांकृशांसूतांगर्भिणीमन्ययोषितम् । बालवृद्धोन्यवेगार्तस्त्यजेद्रोगीचमैथुनम् । चतुष्पथे । पर्वण्यनगदिवसेशिरोहृदयताडिनिम् । अत्याशितोधृतःक्षुद्वान्दुःखितांगःपिपासितः । तस्मात्तुयत्नेनगयादितीर्थयागादिकंवास्तुविधिंन ग्राम्यधर्मोमैथुनम् । वेगोविण्मूत्रादिः । अभ्यक्ताभोपतिरन्वियानंस्नातस्यवाहंक्षुरकर्मसंगम् । अत्राजिनीनो कुर्यात् । अभ्यक्तार्भावनितामवेन्मासत्रयात्परम् । संगतेत्यर्थः । स्कांदपुराणे—नदिवामैथुनंगच्छेद्रंधकीमनिवक्षिताम् । गारुडे—शुष्कमांसाःस्त्रियोवृद्धाबालार्कस्तरुणंदधि । स्कृष्टांपिंगलांकुष्ठिनीयोगिनींचिन्निर्णांस्वकुलजांसंबंधिनींहीनामपस्मारिणींचवर्जयेदिति । प्रभातेमैथुनंनिद्रासद्यःप्राणहराणिषड्इति ।

अनग्नशालित्वमपर्वमैथुनंचिरसनष्टाश्रियमान

सुखसंभोगयोगः । तथा—शिरःसुधौतंचरणौसुमार्जितौवरांगनासेवनमल्पभोजनम् । अनग्नशायित्वमपर्वमैथुनंचिरप्रनष्टाश्रियमानयंति । तथा—सामार्यायागृहेदक्षासाभार्यायाप्रियंवदा । सामार्यायाप्रियप्राणासाभार्यायापतिव्रता । नित्यस्नातासुगंधाचनित्यंचप्रियवादिनी । अल्पभुक्चाल्पवादाचसततंमंगलैर्युता । सततंधर्मबहुलासततंश्चतुगामिनी । एवंयासत्क्रियायुक्तासर्वसौभाग्यवर्धिनी । यस्येदृशीभवेद्भार्यासदेवेंद्रोनमानुषः । कौर्मे—इत्येतदखिलंप्रोक्तमहन्यहनियद्द्विजाः । ब्राह्मणानांकृत्यजातमपवर्गफलप्रदम् । नास्तिक्यादथवालस्याद्ब्राह्मणोनकरोतियः । सयातिनरकान्घोरान्काकयोनौचजायते ।

अथदुःस्वप्नशांतिः । शौनकः—स्वप्नोत्पातेषुचैतेषुकालरात्र्यविदेस्वता । पूजाविधानंपूर्वोक्तंकुर्याद्यत्नापियत्नतः । पूर्वोक्तंरात्रिसूक्तक

ल्पवत् । होमंकुर्यात्स्वयमेनराश्चावेवद्विजोत्तमः । उक्तेनैवविधानेनसघृतंपायसंहुनेत् । गत्यूचंपायसंहुत्वारात्रीव्यस्व्यदितिक्रमात् । अष्टोत्तरशतंहुत्वासूक्तेनानेनवित्तथा । स्वसाधिपतिमंत्रेणहुनेदष्टोत्तरंशतम् । कालरात्रेर्नाममंत्रेणेत्यर्थः । गुरवेदक्षिणांदद्याद्वस्त्रंहेमपशूनपि । तदुक्तदक्षिणाभावेप्यशक्तोहोमकर्मणि । हिरण्यंदक्षिणांदद्यात्तदानीमेवसाधुवः । वस्त्रकुंभादिसकलंतस्त्रीनेप्रतिपादयेत् । ब्राह्मणान्भोजयेच्छक्त्यासुशीलान्वेदपारगान् । भक्ष्यैश्चपायसाद्यैश्चरत्नानिसुबहूनिच । अनेनविधिनायस्तुशांतिंकुर्वीतसंयतः । तस्यवर्षशतायुष्यंभवत्येवनसंशयः । इतिदुःस्वप्नशांतिः ।

अथाशौचेकार्याकार्यनिर्णयः । तत्रप्रयोगपारिजातेजाबालिः—संध्यांपंचमहायज्ञान्नैत्यकंस्मृतिकर्मच । तन्मध्येहापयेत्तेषांदशाहांतेपुनःक्रिया । नैत्यकंनित्यश्राद्धम् । पंचयज्ञसाहचर्यात् । स्मृतिकर्मस्मृत्युक्तंदेवतार्चनादि । पुनस्त्यर्थं । यत्तुपुलस्त्यः—संध्यामिष्टिंचरुंहोमंयावज्जीवंसमाचरेत् । नत्यजेत्सूतकेवापित्यजन्गच्छेदधोगतिमिति । यच्चयोगीश्वरः—संध्यास्नानंत्यजन्विप्रःसप्ताहाच्छूद्रतांव्रजेत् । तस्मात्संध्यांचस्नानंचसूतकेपिनसंत्यजेदिति तन्मानससंध्यापरम् । निषेधस्तुमंत्रोच्चारणपरः । सूतकेमृतकेचैवसंध्याकर्मसमाचरेत् । मनसोच्चारयेन्मंत्रान्प्राणायाममृतेद्विजइतिपुलस्त्योक्तेः—मनसेत्यर्घ्यदानान्यपरम् । सूतकेसावित्र्यांजलिंप्रक्षिप्यप्रदक्षिणंकृत्वासूर्यंध्यायन्नमस्कुर्यादितिपैठीनसिस्मृतेः । अर्घ्ये सावित्र्याःप्राप्तावपिपुनर्वचनंमानसोच्चारनिवृत्त्यर्थम् । अत्रदशसंख्ययागायत्रीजप्या । आपत्स्वशुचौकालेतिष्ठन्नपिजपेद्दशेत्याश्वलायनोक्तेरितिप्रयोगपारिजातः । अष्टाविंशतिकृत्वोत्रगायत्रींमनसाजपेदितिदेवजानीयेभरद्वाजः । सूतकेमृतकेकुर्यात्प्राणायाममंत्रकम् । तथामार्जनमंत्रांस्तुमनसोच्चार्यमार्जयेत् । गायत्रींसम्यगुच्चार्यसूर्यायार्घ्यंनिवेदयेत् । मार्जनंतुनवाकार्यमुपस्थानंनचैवहि । अमंत्रकमितिप्राणायामेमानसोच्चारस्यापिनिवृत्त्यर्थम् । मनसोच्चार्येतितुसर्वत्रमानसोच्चारेप्राप्तेपिस्मृत्यंतरत्वाद

दोषः । तेनार्घ्यदानजंसर्वंमनसाकार्यमुपस्थानंतुनेतिमाधवप्रयोगपारिजातस्मृतिरत्नावल्यादयः । संध्यायामर्घ्यदानस्यश्रौतत्वात्तदे
वाशौचेनुष्ठेयमितिचंद्रिका । विज्ञानेश्वरस्तु—उक्तवचनेपुपदार्थगणनंतदन्यपरिसंख्यार्थम् । अन्यथाविशेषगणनस्यवैयर्थ्यापत्तेः ।
तेनयावदुक्तमेवमनसाकार्यं उपस्थानंनेतिविकल्पार्थमित्याह । दशगायत्रीजपस्तुचंडालादिस्पृष्टस्नानाद्यंगत्वपरः । एकादशाहमासःसंध्या
स्याशौचवदेव तत्कालस्यदशरात्रांतःपातात् । तदूर्ध्वंतुशुद्धिदर्शनात् अशुचित्वाभावात् । नचमुख्यकालस्यैवगौणकालेपितत्करणमिति
युक्तं उक्तहेतोरितिकेचित् । निष्कर्षस्तु सूर्योदयोत्तरंदंडत्रयस्यमुख्यकालत्वोक्तेः प्रधानविध्यनुग्रहाच्च सूर्योदयोत्तरंशुद्धकालत्वंसांगसंध्या
वदनमिति । अर्घ्यांतामानसींसंध्यांप्राणायामविवर्जितामितिच्यवनोक्तेरर्घ्यांतासंध्येति तच्चचंद्रिकाद्यलिखनान्निर्मूलम् । एतेनाशौचेर्घ्यांता
संध्येतिवदन्विधानपारिजातोप्यपास्तः । कात्यायनः—सूतकेमृतकेचैवरोगोत्सवेतथाध्वनि । मानसींतुजपेत्संध्यांकुशवारिविवर्जि-
ताम् । आशार्के—आशौचेकर्मणांत्यागःसंध्यादीनांविधीयते । होमःश्रौतेतुकर्तव्यःशुष्कान्नेनापिवाफलैः । होमःसायंप्रातर्नतुवैश्वदेवः ।
जन्महानौसमोत्रस्यकर्मत्यागोनविद्यते । शालाग्नौकेवलेहोमःकार्यएवान्यगोत्रजैरितिजाबालस्मृतेः । त्रिरोदशाहमासीतवैश्वदेवविवर्जित
इतिसंवर्तोक्तेश्च । पंचयज्ञविधानंतुनकुर्यान्मृत्युजन्मनोरितिसंवर्तेनपंचयज्ञनिषेधाद्वैश्वदेवनिषेधेसिद्धेपुनःपृथङ्निषेधस्तैत्तिरीयाद्यर्थः । तेप
पंचयज्ञभिन्नवैश्वदेवोक्तेः । हरदत्तस्तु—बह्वृचानांसूतकेपिवैश्वदेवोभवति—तानेतान्यज्ञानहरहःकुर्वीतेतिसर्वेषांनित्यत्वोक्तावपि—तस्याद्वाच
नध्यायीयदात्मार्द्रपाणिर्यद्देशइत्यनेनाशौचादौब्रह्मयज्ञस्यैवविशेषतोनिषेधादित्याह । तन्न । द्वावेवत्वनध्यायेनानध्यायांतरस्यैवव्यावृत्तेः । अत
एवश्रुतिः—व्रजन्नासीनःशयानोवेति । नतुतस्यैवेत्वनध्यायांतरव्यावृत्तिर्नस्यात् । वैश्वदेवादिनिषेधविरोधाच्च । अत्रवैश्वदेवनिषेधेप्यसंस्कृ
तान्नभोजननिषेधादन्नसंस्कारोभवत्येव । तत्रापि—वैश्वदेवासंभवेतुकुक्कुटांडप्रमाणकमितिमृतपितृकस्यपाकांतरपक्षइनसूतकिनोपिभवतीत्याहुः ।

**आशौचिनोदीक्षाश्रौतयोर्विचारः** । **मदनपारिजाते**—शिवविष्ण्वर्चनंदीक्षायस्यचाग्निपरिग्रहः । श्रौतकर्माणिकुर्वीतनातः शुद्धिमवाप्नुयात् । श्रौतातिदेशादुपासनादीन्यहरहःस्वाहाकुर्यादन्नाभावेयेनकेनचिदाकाष्ठादितिश्रुतावुपासनहोमोक्तेः । अत्र—कर्मवैतानिकं कार्यस्नानोपस्पर्शनात्स्वयमितिहारीतोक्तौ अग्निहोत्रस्यहोमार्थंशुद्धिस्तात्कालिकीभवेदितिगोभिलोक्तौचवैतानिकपदस्योपलक्षणार्थत्वादाशौचेश्रौतंस्वयंकुर्यात् । स्मार्तंतुत्यागएवनस्वयंकर्तृत्वमितिप्रयोगपारिजातः । अन्यएतानिकुर्युरितिपैठीनसिस्मृतेः । सूतकेमृतकेचैव अशुचौश्राद्धभोजने । प्रवासादिनिमित्तेपुहावयेन्नतुहापयेदितिबृहस्पतिस्मृतेश्चश्रौतंस्मार्तंचान्येनकारयितव्यम् । त्यागमात्रेतुस्वयंकर्तृत्वम् ।

**यज्ञादावाशौचिनोभ्यनुज्ञा** । **याज्ञवल्क्यः**—ऋत्विजांदीक्षितानांचयज्ञियंकर्मकुर्वताम् । सत्रिव्रतिब्रह्मचारिदातृब्रह्मविदां तथा । सद्यःशौचमितिसर्वत्रानुषंगः । दीक्षितस्यवैतानोपासनाःकार्याइत्यनेनसिद्धेप्यधिकारे पुनर्वचनंयाजमानेषुस्वयंकर्तृत्वविधानार्थं सद्यःस्नानविध्यर्थंचेतिविज्ञानेश्वरः । वस्तुतस्तुहारीतवचनादिषुवैतानिकग्रहणादुपलक्षणार्थत्वेमानाभावादन्यद्वाराकरणस्यवचननिनानुपपत्तेश्च स्वयंहोमःश्रौतविषयः । अन्यएतानिकुर्युरित्यादीनांविशेषोपादानात् । सूतकेतुसमुत्पन्नेस्मार्तकर्मकथंभवेत् । पिंडयज्ञंचरुंहोममसगोत्रेणकारयेदितिकर्मप्रदीपेजातूकर्ण्योक्तेश्चनस्मार्तविषयत्वम् । श्रौतेतात्कालिकशुद्ध्याम्नानाच्च । **निर्णयामृतेपि**—स्मार्तउद्देशत्यागंस्वयंकुर्यादन्यद्वाराहोमादिकारयेत् नित्याग्निहोत्रादीनिस्वयमेवकुर्यादित्युक्तम् । तात्कालिकशुद्धिस्तुसंकल्पात्पूर्वक्षणमारभ्यकर्मापवर्गपर्यंतंधर्मयोग्यत्वलक्षणाज्ञेया । अतएवगोभिलः—अग्निहोत्रस्यहोमार्थंशुद्धिस्तात्कालिकीभवेत् । पंचयज्ञान्नकुर्वीतह्यशुद्धःपुनरेवसइति । **हारीतोपि**—कर्मवैतानिकंकार्यंस्नानोपस्पर्शनात्स्वयम् । एतेनाशौचेसंपूर्णाग्निहोत्रेस्वयंकर्तृत्वमुक्तम् । नचवैतानिकत्वेनदर्शेपिस्वयंकर्तृत्वापत्तिः । तत्रकार्यत्वमात्रोक्त्यासमाख्याप्राप्तकर्तृबाधेनानुपपत्तेः । अग्निहोत्रेतुलाघवाद्विकल्पप्राप्तस्वकर्तृकत्वनियामकत्वेनोपपत्तेः । **यत्तुप्रयोगपारि**

जातः—अग्निहोत्रेस्वकर्तृकत्वान्यकर्तृकत्वविकल्पः । यच्चस्मृत्यंतरम्—यद्यैयेसूतकेकर्मनित्यनैमित्तिकादिकम् । आहिताग्नेःसदाशुद्धिःसद्य
एवविधीयतइति तत्रपूर्वार्धमाशौचेकर्तव्यत्वेनाभिहितनित्यनैमित्तिकपरम् । उत्तरार्धंतुवैतानिकपरमिति । तन्न । श्रौतेऽन्यकर्तृकत्वविध्यभावात् ।
स्वकर्तृकत्वनिषेधाभावाच्च । नचैवंश्रौतंकार्यमितिवचनवैयर्थ्यं श्रौतनिषेधाभावादितियुक्तम् । अशुचित्वेनप्रमभासश्रौतनिवृत्तिनिरासार्थत्वात् ।
वैतानोपासनाइतियाज्ञवल्क्योक्तिर्नित्यकर्मपरा । दीक्षितानामित्यादितुआरब्धकर्मणियाजमानप्राप्त्यर्थमितिस्मृत्यर्थसारः । स्नानशौचाचम
नभोजननियमास्पृश्यस्पर्शेस्नानंकुर्यादितिदोडरानंदे । कालिकापुराणे—जानूर्ध्वंक्षतजेजातेनित्यकर्मनचाचरेत् । नैमित्तिकंचतदधःस्रवद्र
क्तोनचाचरेत् । आर्त्विज्यंब्रह्मयज्ञंचश्राद्धंदेवयुतंचयत् । गुरुमाक्षिप्यविप्रंचब्रह्मस्वैवचपाणिना । नकुर्यान्नित्यकर्माणिरेतःपातेचभैरव ।

अथभोजनोत्तरंकार्याकार्यविचारः । स्नानकार्येसायंसंध्यादेःपूर्वंतदधिकारार्थंतदूर्ध्वंतु । प्रदोषपश्चिमेयामेदिनस्नानंसमाचरेदिति
पराशरोक्तेः । एतच्चदिनासंभवेइतिहेमाद्रिश्राद्धकाण्डे । अतःसकल्पःस्नानांगतर्पणाद्यपिभवति । नचान्नशुद्धधिकारित्वाल्लोपः । स्ना
धिकारेतदशक्तौलोपप्रसंगात् । अतएवगौणस्नानाद्यंगीकारइतिचेत् । अत्रापिगौणकालांगीकारइतितुल्यम् । नह्यस्यभोजनार्थत्वेकिंचित्प्रमा
णमस्ति । अतएवस्नानेजीवदधिकारित्वमित्याचारादर्शः । संध्यात्रयंचकार्यम् । संध्यात्रयंचकर्तव्यंद्विजेनात्मविदासदेतिमनूक्तेः ।
सर्वकालउपस्थानंसंध्ययोःपार्थिवेष्यते । अन्यत्रसूतकाशौचविभ्रमातुरभीतितइतिविष्णुपुराणेसूतकादिमध्येपिकथितत्वाच्च । सायंसंध्यायाभो
जनोत्तरत्वेप्यविरोधाच्च । नचैवंसर्वदातदापत्तिः कालनियमात् । ब्रह्मयज्ञस्तुन—अनिवर्त्यमहायज्ञान्योभुंक्तेभवत्यहंगृही । अनातुरःसतिधने
सकृच्छ्रार्धेनशुध्यतीतिदक्षोक्तावभोजनेप्रत्यवायोक्तेः । अकृत्वापंचयज्ञांस्तुभुक्त्वाचांद्रायणंचरेदितिच । अतएवोज्ज्वलायांहर
दत्तः—ब्रह्मयज्ञस्यनित्यत्वेपिप्रातरादौकृतेप्रायश्चित्तमेवनब्रह्मयज्ञः । सर्वत्रान्नशुद्धधिकारित्वनियमेपिब्रह्मयज्ञप्रकरणेआपस्तंबकृतावकृतप्रात

राइतिविशेषोक्तिरिति । अंगत्वेतर्पणमपिन अंनमत्वेतुभवति । देवताश्चमुनींश्चैवपितॄन्यैयोनतर्पयेत् । देवादीनामृणीभूत्वानरकंसमज त्यध्रुतिहेमाद्रौश्राद्धवैश्वदेवकरणेप्रत्यवायश्रुतेः । नचाश्नभुंजानस्यप्रत्यवायउक्तः । प्रातर्होमस्तुद्वादशदिनोर्ध्वमपिकिमुत—भोजनोर्ध्वं देवपूजामकृत्वादेवतार्चनम् । भुक्तेसयातिनरकान्सूकरेष्विहजायतइत्यनर्चनेभोजनकरणेप्रत्यवायोक्तेरिति । तत्रएकरात्रपूजाविच्छेदेबौधाय नेनपुनःप्रतिष्ठोक्तेः । अतःपूजापिभवति । प्रातर्वैश्वदेवस्तुन अनश्नतेत्युक्तेरितिकेचित् । तन्न । पंचैतान्योमहायज्ञान्कुर्याद्दहरहर्द्विजइतिसं वर्तोक्तेः—आपद्यपिचकष्टायांपंचयज्ञान्नहापयेदितिव्यासोक्तेश्चावश्यकत्वावगतेर्भोजनोर्ध्वमपिभवति । अतोसंस्कृतान्नभोजननिमित्तमेवप्रा यश्चित्तंनतुवैश्वदेवाकरणनिमित्तमिति । अभुक्त्वाप्यलिकर्मचेति भारताद्बलिदानंनेतिकेचित् ॥ प्राच्यानुदीच्यानयदाक्षिणात्यान्ज्ञात्वाप्रती च्यान्महतोनिबंधान् । आचाररत्नंसुधियाव्यधायिश्रीरामकृष्णात्मजलक्ष्मणेन ॥ निगदितमिहसाध्वसाधुवायद्धुतमतिनाप्रविचार्यलक्ष्मणेन । तदखिलमपहायदोषदुष्टंचिरमवलोक्यविलोकयंतुसंतः ॥ इतिश्रीमन्नारायणभट्टात्मजश्रीमद्रामकृष्णभट्टसुतलक्ष्मणभट्टकृताचाररत्नेसायंकर्त व्यप्रकरणम् ॥ आचाररत्नग्रंथःसंपूर्णः ॥

इदमाचाररत्नम्—
गोमांतकांतर्गतपेडणेग्रामवास्तव्येन पणशीकरोपाह्वविद्वद्वरश्रीमल्लक्ष्मणशर्मतनुजनुषा वासुदेवशर्मणा संस्कृतं तच्च मुंबय्यां श्रेष्ठिवरैः
तुकाराम जावजीत्यभिख्यैः स्वीये निर्णयसागराख्यमुद्रणयंत्रे रामचंद्र येसु शेडगेद्वाराङ्कयित्वाप्राकाश्यंनीतम् ।
शाकः १८३७, सन १९१५
Published by Tukaram Javaji, and Printed by Ramchandra Yesu Shedge at the
Nirnaya-sagar Press, 23, Kolbhat Lane, Bombay

॥ इति आचाररत्नंसंपूर्णम् ॥